
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M717 विषय वैदिक

नाव. निरुवत, (M88)

लेखक/लिपीकार चिंतामणी दीक्षित भडकंबकर

पृष्ठ 124 काळ सन 1786 पूर्ण/अपूर्ण

नि॰पू॰१

॥ अथ निरुक्त पूर्वषट्कमारंभः ॥

हृ.१

१

॥श्रीमहागणाधिपतये नमः॥ ॥ॐ॥ ॥समाम्नायः समाम्नातः स व्याख्यातव्यस्तमिमं स
माम्नायं निघंटव इत्याचक्षते निघंटवः कस्मान्निगमा इमे भवंति छंदोभ्यः समाहृत्य समाहृत्य
समाम्नातास्ते निगंतव एव संतो निगमनान्निघंटव उच्यंत इत्यौपमन्यवोपि वाहननादेव स्युः समा
हृता भवंति यद्वा समाहृता भवंति तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाता
श्चेतानीमानि भवंति तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशंति भावप्रधानमाख्यातं सत्वप्रधानानि
नामानि तद्यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रम
प्रभृत्यपवर्गपर्यंतं मूर्तं सत्वभूतं सत्वनामभिर्व्रज्या पक्तिरित्यद इति सत्वानामुपदेशो गौरश्वः
पुरुषो हस्तीति भवतीति भावस्यास्ते शेते व्रजति तिष्ठतीतींद्रियनित्यं वचनमौदुंबरायणः॥१॥
तत्र चतुष्ट्वं नोपपद्यते युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः शास्त्रकृतो योगश्च व्याप्ति

मा

मत्वात्तु शब्दस्याऽणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके तेषां मनुष्यवद्देवताभिधानं
पुरुषविद्यानित्यत्वात्कर्मसंपत्तिर्मंत्रो वेदे षड्भावविकारा भवंतीति वार्ष्यायणिर्जायतेस्ति विपरि
णमते वर्द्धतेपक्षीयते विनश्यतीति जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषे
धत्यस्तीत्युत्पन्नस्य सत्वस्यावधारणं विपरिणमत इत्यप्रच्यवमानस्य तत्वाद्विकारं वर्द्धत इति स्वां
गाभ्युच्चयं सांयोगिकानां वार्थानां वर्द्धते विजयेनेति वा वर्द्धते शरीरेणेति वापक्षीयत इत्येतेनैव व्या
ख्यातः प्रतिलोमं विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति॥२॥अतो
न्ये भावविकारा एतेषामेव विकारा भवंतीति ह स्माह ते यथावचनमभ्यूहितव्या न निर्बद्धा उपसर्गा अ
र्थान्निराहुरिति शाकटायनो नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवंत्युच्चावचाः पदार्था भवंती
ति गार्ग्यस्तद्य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थविकरणमा इत्यर्वागर्थे प्र परेत्येतस्य प्राति

नि॰पू॰१

लोम्यमभासाभिमुख्यंमतीत्येतस्यप्रातिलोम्यमतिस्कइत्यस्मिन्पूजितार्थेनिर्दुरित्येतयोःप्रातिलोम्यं
न्यवेतिविनिग्रहार्थीयावुदित्येतयोःप्रातिलोम्यंसमित्येकीभावंअपेत्येतस्यप्रातिलोम्यमन्वितिसादृ
श्यापरभावमपीतिसंसर्गमुपेत्युपजननंपरीतिसर्वतोभावमधीत्युपरिभावमैश्वर्यंवैवमुच्चावचानर्था

२

न्प्राहुस्तउपेक्षितव्याः॥३॥अथनिपाताउच्चावचेष्वर्थेषुनिपतंत्यप्युपमार्थेपिकर्मोपसंग्रहार्थेपिपद
पूरणास्तेषामेतेचत्वारउपमार्थेभवंतीवेतिभाषायांचान्वध्यायंचाग्निरिवेंद्रइवेतिनेतिप्रतिषेधार्थी
योभाषायामुभयमन्वध्यायंनेंद्रंदेवममंसतेति[illegible]प्रतिषेधार्थीयःपुरस्तादुपाचारस्तस्ययत्प्रतिषे
धतिदुर्मदासोनसुरायामित्युपमार्थीयउपरिष्टादुपाचारस्तस्ययेनोपमिमीतेचिदित्येषोनेककर्मा
चार्यश्चिदिदंब्रूयादितिपूजायामाचार्यःकस्मादाचार्यआचारंग्राहयत्याचिनोत्यर्थानाचिनोतिबु
द्धिमितिवादधिचिदित्युपमार्थेकुल्माषांश्चिदाहरेत्यवकुत्सितेकुल्माषाःकुलेषुसीदंतिनुइत्येषोनेक

२

कर्मेदंनुकरिष्यतीतिहेत्वपदेशेकथंनुकरिष्यतीत्यनुपृष्टेनन्वेतदकार्षीदितिचाथाप्युपमार्थे
भवति॥वृक्षस्यनुतेपुरुहूतवयाः॥वृक्षस्येवतेपुरुहूतशाखावयाःशाखावेतेर्वातायनाभवं
तिशाखाःखशयाःशक्नोतेर्वाथयस्यागमादर्थपृथक्त्वमहविज्ञायतेनत्वौद्देशिकमिवविग्र
हेणपृथक्त्वात्सकर्मोपसंग्रहश्चेतिसमुच्चयार्थउभाभ्यांसंप्रयुज्यतेहंचत्वंचवृत्रहन्नित्येतस्मि
न्नेवार्थेदेवेभ्यश्चपितृभ्यएत्याकारोवेतिविचारणार्थेहंताहंपृथिवीमिमांनिदधानीहवेहवे
त्यथापिसमुच्चयार्थेभवति॥४॥वायुर्वात्वामनुर्वात्वेति॥अहइतिचहइतिचविनिग्रहार्थीयौपू
र्वेणसंप्रयुज्येतेअयमहेदंकरोत्वयमिदमिदंहकरिष्यतीदंनकरिष्यतीत्यथाप्युकारएतस्मि
न्नेवार्थउत्तरेणमृषेमेवदंतिसत्यमुतेवदंतीत्यथापिपदपूरणइदमुतदुहीत्येषोनेककर्मेदंहिक
रिष्यतीतिहेत्वपदेशेकथंहिकरिष्यतीत्यनुपृष्टेकथंहिव्याकरिष्यतीत्यसूयायांकिलेतिविद्याप्र

ने॰पू॰१

कर्ष एवं किले त्यथापि न ननु इत्येताभ्यां संप्रयुज्यतेनुपृष्टे न किलैवं नन्वु किलैवं मेति प्रतिषेधे
मा कार्षीर्मा हार्षीरिति च खल्विति च खलु कृत्वा खलु कृतमथापि पदपूरण एवं खलु तद्बभूवेति शश्व
दिति विचिकित्सार्थीयो भाषायां शश्वदेवमित्यनुपृष्टे एवं शश्वदित्यस्वयंपृष्टे नूनमिति वि
चिकित्सार्थीयो भाषायामुभयमन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्चागस्त्य इन्द्राय
हविर्निरुप्य मरुद्भ्यः संप्रदित्सां चकार स इन्द्र एत्य परिदेवयां चक्रे ॥ ५ ॥ न नूनमस्ति नो श्वः क
स्तद्वेद यदद्भुतं ॥ अन्यस्य चित्तमभिसंचरेण्यमुताधीतं विनश्यति ॥ न नूनमस्त्यद्यतनं नो ए
व श्वस्तनमद्यास्मिन्द्यवि द्युरित्यह्नो नामधेयं द्योतत इति सतः श्व उपाशंसनीयः कालो ह्यो
हीनः कालः ॥ कस्तद्वेद यदद्भुतं ॥ कस्तद्वेद यदभूतमिदमपीतरदद्भुतमभूतमिवान्यस्य चि
त्तमभिसंचरेण्यमभिसंचारि अन्यो नानेयश्चित्तं चेततेरुताधीतं विनश्यतीत्याध्यातं विन

२

श्यत्याध्यानमभिप्रेतमथापि पदपूरणः ॥ ६ ॥ नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघो
नी ॥ शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ सा ते प्रति दुग्धां वरं जरित्रे व
रो वरयितव्यो भवति जरिता गरिता दक्षिणा मघोनी मघवती मघमिति धननामधेयं मंहतेर्दान
कर्मणो दक्षिणा दक्षतेः समर्द्धयति कर्मणो व्यृद्धं समर्द्धयतीत्यपि वा प्रदक्षिणागमनाद्दिशमभि
प्रेत्य दिग्घस्तप्रकृतिर्दक्षिणो हस्तो दक्षतेरुत्साहकर्मणो दाशतेर्वा स्याद्दानकर्मणो हस्तो हन्तेः प्राशुर्हन
ने देहि स्तोतृभ्यः कामान्मास्मानतिदहीर्मास्मानतिहाय दा भगो नोस्तु बृहद्वदेम स्वे वेदने भगो भज
तेर्बृहदिति महतो नामधेयं परिवृढं भवति वीरवन्तः कल्याणवीरा वा वीरो वीरयत्यमित्रान्वेतेर्वा
स्याद्गतिकर्मणो वीरयतेर्वा सीमिति परिग्रहार्थीयो वा पदपूरणो वा ॥ प्र सीमादित्यो असृजत् ॥ प्रा
सृजदिति वा प्रासृजत्सर्वत इति वा वि सीमतः सुरुचो वेन आवरिति च व्यवृणोत्सर्वत आदित्यः सुरु

नि॰पू॰१

४

चआदित्यरश्मयः स्यूरोचनादपि वा सीमेत्येतदनर्थकमुपबंधमाददीत पंचमीकर्मणि सीम्नः
सीमतः सीमातो मर्यादातः सीमा मर्यादा विषीव्यति देशाविति त्व इति विनिग्रहार्थीयं सर्वनामानुदा
त्तमर्द्धनामेत्येके॥७॥ ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु॥ ब्रह्मा त्वो वदति जात
विद्यां यज्ञस्य मात्रां विमिमीत उ त्वः॥ इत्यृत्विक्कर्मणां विनियोगमाचष्टे ऋचामेकः पोषमास्ते पुपुष्वा
न्होतर्गर्चनी गायत्रमेको गायति शक्वरीषूद्गाता गायत्रं गायते स्तुतिकर्मणः शक्वर्य ऋचः शक्नो
तेस्तद्यदाभिर्वृत्रमशकद्धंतुं तच्छक्वरीणां शक्वरीत्वमिति विज्ञायते ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा
सर्वविद्यः सर्वं वेदितुमर्हति ब्रह्मा परिवृढः श्रुततो ब्रह्म परिवृढं सर्वतो यज्ञस्य मात्रां विमिमीत एको
ध्वर्युरध्वर्युरध्वरयुरध्वरं युनक्ति अध्वरस्य नेताध्वरं कामयत इति वापि वाधीयाने युरुपबंधो ध्वर
इति यज्ञनाम ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधो निपात इत्येके तत्कथमनुदात्तप्रकृति नाम स्याद्दृष्टव्ययं

४

तु भवति उत त्वं सख्ये स्थिरपीतमाहुरिति द्वितीयायामुतो त्वस्मै तन्वं वि सस्र इति चतुर्थ्यामथापि प्र
थमाबहुवचने॥८॥ अक्षण्वंतः कर्णवंतः सखायो मनोजवेष्वसमा बभूवुः॥ आदघ्नास उपकक्षास
उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे॥ अक्षिमंतः कर्णवंतः सखायो क्षि चष्टेरनक्तेरित्याग्रायणस्तस्मादेते
व्यक्ततरे इव भवत इति ह विज्ञायते कर्णः कृंततेर्निकृत्तद्वारो भवत्यृच्छतेरित्याग्रायण ऋच्छंतीव खे
उदगंतामिति ह विज्ञायते मनसां प्रजवेष्वसमा बभूवुरास्यदघ्ना अपर उपकक्षदघ्ना अपरे आस्य
मस्यतेरास्यंदत एनदन्नमिति वा दघ्नं दघ्यतेः स्रवतिकर्मणो दस्यतेर्वा स्याद्विदस्ततरं भवति प्रस्ने
या ह्रदा इवैके प्रस्नेया ददृश्रिरे स्नानार्हाः ह्रदो ह्रादतेः शब्दकर्मणो ह्लादतेर्वा स्याच्छीतीभावकर्मणो
थापि समुच्चयार्थे भवति पर्याया इव त्वदाश्विनमाश्विनं च पर्यायाश्चेत्यथ ये प्रवृत्तेर्थे मिताक्षरेषु ग्रंथेषु
वाक्यपूरणा आगच्छंति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति॥९॥ निष्टृक्वासश्चिदिन्न

नि॰ शृ॰

रोभूरिति तोकावृकादिव॥ विभ्यस्यंतो ववाशिरे शिशिरं जीवनाय कं॥ शिशिरं जीवनाय॥ शि
शिरं शृणातेः शम्नातेर्वा॥ एमेनं सृजता सुते॥ आसृजतैनं सुते॥ तमिद्वर्द्धंतु नो गिरः॥ तं वर्द्ध
यंतु नो गिरः स्तुतयो गिरो गृणातेः॥ अयमु ते समतसि॥ अयं ते समतसी वोपिदन्स्यते स्म विदु

५

रिव स्म विज्ञायेते इ वाथापि नेत्येष इदित्येतेन संप्रयुज्यते परिभये॥१०॥ हविर्भिरेके स्वरितः
सचंते सुन्वंत एके सवनेषु सोमान्॥ शचीर्मदंत उत दक्षिणाभिर्नेज्जिह्मायंत्यो नरकं पताम॥
इति नरकं न्यरकं नीचैर्गमनं नास्मिन्रमणं स्थानमल्पमप्यस्तीति वाऽथापि न चेत्येष इदित्ये
तेन संप्रयुज्यते नु पृष्टे न चेत्सुरां पिबंतीति सुरा सुनोतेरेवमुच्चावचेष्वर्थेषु निपतंति त उपेक्षि

५

तव्याः॥११॥ इतीमानि चत्वारि पदजातान्यनुक्रांतानि नामाख्याते चोपसर्गनिपाताश्च तत्र ना
मान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वैयाकरणानां चैके त

द्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि यथा गौरश्वः पुरु
षो हस्तीति यथ चेत्सर्वाण्याख्यातजानि नामानि स्युर्यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्त्वं तथाचक्षीरन्यः
कश्चाध्वानमश्नुवीताश्वः स वचनीयः स्याद्यत्किंचित्तृंद्यात्तृणं तदथापि चेत्सर्वाण्याख्यातजानि ना
मानि स्युर्यावद्भिर्भावैः संप्रयुज्येत तावद्भ्यो नामधेयप्रतिलंभः स्यात्तत्रैवं स्थूणा दरशया वा संजनी
च स्यात्॥१२॥ अथापि य एषां न्यायवान्कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैना
न्याचक्षीरन्पुरुषं पुरिशय इत्याचक्षीरन्नष्टेत्यश्वं तर्दनमिति तृणमथापि निष्पन्नेऽभिव्याहारेऽभि
विचारयंति प्रथनात्पृथिवीत्याहुः क एनामप्रथयिष्यत्किमाधारश्चेत्यथानन्वितेऽर्थेऽप्रादेशिके विका
रे पदेभ्यः पदेतरार्द्धान्संचस्कार शाकटायन एतेः कारितं च यकारादिं चांतःकरणमस्तेः शुद्धं च सका
रादिं चाथापि सत्त्वपूर्वो भाव इत्याहुरपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति तदेतन्नोपपद्य

नि·मू·१

तं॥१३॥ यथो हि नु वा एतत्तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां सर्वं प्रादेशि
कमित्येवं सत्यनुपालंभ एष भवति यथो एतद्यः कश्चन तत्कर्म कुर्यात्सर्वं तत्सत्त्वं तथाचक्षीरन्निति पश्यामः ति
समानकर्मणां नामधेयप्रतिलंभमेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भूमिज इत्येतेनैवोत्तरः
प्रत्युक्तो यथो एतद्यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति संत्यल्पप्रयोगाः कृतोप्यैक
पदिका यथा व्रततिर्दमूना जाट्य आट्णारो जागरूको दर्विहोमीति यथो एतन्निष्पन्नेभिव्याहारेभि
विचारयंतीति भवति हि निष्पन्नेभिव्याहारे योगपरीष्टिः प्रथनात्पृथिवीत्याहुः क एनामप्रथयिष्यत्कि ना
माधारश्चेत्यथ वेदर्शनेन पृथुरप्रथिता चेदप्यन्यैस्थाप्येवं सर्व एव दृष्टप्रवादा उपालभ्यंते यथो
एतत्पदेभ्यः पदेतरार्द्धान्संचस्कारेति यो नन्वितेर्थे संचस्कार स तेन गर्ह्यः सैषा पुरुषगर्हा न शास्त्र
गर्हेति यथो एतदपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति पश्यामः पूर्वोत्पन्नानां सत्वानामप

६

रस्माद्भावान्नामधेयप्रतिलंभमेकेषां नैकेषां यथा बिल्वादो लंबचूडक इति बिल्वं भरणाद्वा भेदना
द्वा॥१४॥ अथापीदमंतरेण मंत्रेष्वर्थप्रत्ययो न विद्यतेऽर्थमप्रतियतो नात्यंतं स्वरसंस्कारोद्दे
स्तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं च यदि मंत्रार्थप्रत्ययायानर्थकं भवती
ति कौत्सोऽनर्थका हि मंत्रास्तदेतेनोपेक्षितव्यं नियतवाचो युक्तयो नियतानुपूर्व्या भवंत्यथापि ब्रा
ह्मणेन रूपसंपन्ना विधीयंत उरु प्रथस्वेति प्रथयति प्रोहाणीति प्रोहत्यथाप्यनुपपन्नार्था भवंत्यो
षधे त्रायस्वैनं स्वधिते मैनं हिंसीरित्याह हिंसन्नथापि विप्रतिषिद्धार्था भवंति॥ एक एव रुद्रोऽवतस्थे
न द्वितीयः॥ असंख्याता सहस्राणि ये रुद्रा अधि भूम्यां॥ अशत्रुरिंद्र जज्ञिषे॥ शतं सेना अजयत्सा
कमिंद्र इत्यथापि जानंतं संप्रेष्यत्यग्नये समिध्यमानायानुब्रूहीत्यथाप्याहादितिः सर्वमित्यदितिर्द्यौ
रदितिरंतरिक्षमिति तदुपरिष्टाद्व्याख्यास्यामोऽथाप्यविस्पष्टार्था भवंत्यम्यक्याद्रिमिन्जार

श्रि

नि॰ भू॰ १

याथिकाणुकेति॥१५॥ अर्थवंतः शब्दसामान्यादेतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृ
ग्यजुर्वाभिवदतीति च ब्राह्मणं क्रीळंतौ पुत्रैर्नप्तृभिरिति यथो एतन्नियतवाचोयुक्तयो नियतानुपूर्व्या
भवंतीति लौकिकेष्वप्येतद्यथेंद्राग्नी पितापुत्राविति यथो एतद्ब्राह्मणेन रूपसंपन्ना विधीयंत इत्यु
दितानुवादः स भवति यथो एतदनुपपन्नार्था भवंतीत्याम्नायवचनादहिंसा प्रतीयेत यथो एतद्विप्र
तिषिद्धार्था भवंतीति लौकिकेष्वप्येतद्यथा सपत्नोयं ब्राह्मणोऽनमित्रो राजेति यथो एतज्जानंतं संप्रे
ष्यतीति जानंतमभिवादयते जानते मधुपर्कं प्राहेति यथो एतददितिः सर्वमिति लौकिकेष्वप्येतद्यथास
र्वरसा अनुप्राप्ताः पानीयमिति यथो एतदविस्पष्टार्था भवंतीति नैष स्थाणोरपराधो यदेनमंधो न पश्य
ति पुरुषापराधः स भवति यथा जानपदीषु विद्यातः पुरुषविशेषो भवति पारोवर्यवित्सु तु खलु वेदितृ
षु भूयोविद्यः प्रशस्यो भवति॥१६॥ अथापीदमंतरेण पदविभागो न विद्यते॥ अवसाय पद्वते रुद्र

७

मृळेति पद्वद्वसं गावः पथ्यदनमवतेर्गत्यर्थस्यासो नामकरणस्तस्मान्नावगृह्णंत्यवसायाश्वा
निति स्यतिरुपसृष्टो विमोचने तस्मादवगृह्णंति दूतो निर्ऋत्या इदमाजगामेति पंचम्यर्थप्रेक्षा वा
षष्ठ्यर्थप्रेक्षा वाः कारांतं परो निर्ऋत्या आ चक्ष्वेति चतुर्थ्यर्थप्रेक्षे कारांतं परः संनिकर्षः संहिता
पदप्रकृतिः संहिता पदप्रकृतीनि सर्वचरणानां पार्षदान्यथापि याज्ञे दैवतेन बहवः प्रदेशा भवंति त
देतेनोपेक्षितव्यं ते चेद्ब्रूयुर्लिंगज्ञा अत्र स्म इति॥ इंद्रं न त्वा शवसा देवता वायुं पृणंतीति वायुलिंगं चें
द्रलिंगं चाग्नेये मंत्रे अग्निरिव मन्यो त्विषितः सहस्वेति तथाग्निर्मान्यवे मंत्रे त्विषितो ज्वलितस्त्विषि
रित्यप्यस्य दीप्ति [illegible] नाम भवत्यथापि ज्ञानप्रशंसा भवत्यज्ञाननिंदा च॥१७॥ स्थाणुरयं भारहारः
किलाभूदधीत्य वेदं न विजानाति योर्थं॥ योर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा
॥यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते॥ अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥ स्थाणुस्तिष्ठ

नि॰पू॰१

तेरर्थोत्तैरेरणस्थो वा ॥१८॥ उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां ॥ उतो त्वस्मै तन्वं
विसस्रे जायेव पत्य उशती सुवासाः ॥ अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनामित्यवि
द्वांसमाहार्द्धमप्येकस्मै तन्वं विसस्र इति स्वमात्मानं विवृणुते ज्ञानं प्रकाशनमर्थस्याहानया वाचोपमोत्त
मया वाचा जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु सुवासाः कल्याणवासाः कामयमाना ऋतुका
लेषु यथा स एनां पश्यति स शृणोतीत्यर्थज्ञप्रशंसा तस्योत्तरा भूयसे निर्वचनाय ॥१९॥ उत त्वं सख्ये
स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ॥ अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पां ॥
अप्येकं वाक्सख्ये स्थिरपीतमाहू रममाणं विपीतार्थं देवसख्ये रमणीये स्थान इति वा विज्ञातार्थं देवसख्ये र
मणीये स्थान इति वा विज्ञातार्थं यं नाप्नुवंति वाग्ज्ञेयेषु बलवत्स्वप्यधेन्वा ह्येष चरति मायया वाक्प्रति
रूपया नास्मै कामान्दुग्धे वाग्दोह्यान्देवमनुष्यस्थानेषु यो वाचं श्रुतवान्भवत्यफलामपुष्पामित्य

फलास्मा अपुष्पा वाग्भवतीति वा किंचित्पुष्पफलेति वार्थं वाचः पुष्पफलमाह याज्ञदैवते पुष्पफले देवताध्या
त्मे ति वा साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मंत्रान्संप्रादुरुपदेशा
य ग्लायंतोऽवरे बिल्मग्रहणायेमं ग्रंथं समाम्नासिषुर्वेदं च वेदांगानि च बिल्मं भिल्मं भासनमिति वैतावंतः
समानकर्माणो धातवो धातुर्दधातेरेतावंत्यस्य सत्वस्य नामधेयान्येतावतामर्थानामिदमभिधानं नैघं
टुकमिदं देवतानाम प्राधान्येनेदमिति तद्यदन्यदेवते मंत्रे निपतति नैघंटुकं तत् ॥ अश्वं न त्वा वारवंतं ॥ अ
श्वमिव त्वा वालवंतं वाला दंशवारणार्था भवंति दंशो दशतेः ॥ मृगो न भीमः कुचरो गिरिष्ठाः ॥ मृग
इव भीमः कुचरो गिरिष्ठा मृगो मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्माद्भीष्मोप्येतस्मादेव कुचर
इति चरति कर्म कुत्सितमथ चेद्देवताभिधानं क्वायं न चरतीति गिरिष्ठा गिरिस्थायी गिरिः पर्वतः
समुद्गीर्णो भवति पर्ववान्पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वार्द्धमासपर्व देवानस्मिन्प्रीणंतीति त

नि·द्र·१

स्मृतीतरत्संधिसामान्यान्मेघस्थायी मेघोपि गिरिरेतस्माद्दैवतानि नामानि प्राधान्यस्तुती
नां देवतानां तद्दैवतमित्याचक्षते तदुपरिष्टाद्व्याख्यास्यामो नैघंटुकानि नैगमानीहेह ॥२०॥ ॥
समाम्नायस्तत्र चतुष्टूमतोन्येथ निपाता वाप्युर्वात्वान नूनं नूनं सातत्रूचांत्वोक्षण्वतो निष्टूक्रासो
हविर्भिरिमान्यथापि येयाम्यथो हिन्वथापीदमर्थवंतो थापीदं स्थाणुरयमुतत्वः पश्यन्नुतत्वं सरव्ये
विंशतिः ॥ ॥इति निरुक्ते पूर्वषट्के प्रथमोध्यायः ॥ ॥ॐ॥ ॥अथ निर्वचनं तद्येषु पदेषु स्वर
संस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादथानन्वितेर्थे प्रादेशिके वि
कारेर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येप्यक्षर वर्णसामान्यान्निर्ब्रूया
न्नत्वेव न निर्ब्रूयान्न संस्कारमाद्रियेत विशयवत्यो हि वृत्तयो भवंति यथार्थं विभक्तीः सन्नमयेत्
प्रत्तमवत्तमिति धात्वादी एव शिष्येते अथाप्यस्तेर्निवृत्तिस्थाने ष्वादिलोपो भवति स्तः संती त्यथाप्यं

१ ती

१

तलोपो भवति गत्वा गतमि त्यथाप्युपधालोपो भवति जग्मतुर्जग्मुरित्यथाप्युपधाविकारो भवति
राजा दंडीत्यथापि वर्णलोपो भवति तत्वा यामीत्यथापि द्विवर्णलोपस्तृच इत्यथाप्यादिविपर्ययो भ
वति ज्योतिर्घनो बिंदुर्वाट्य इत्यथाप्याद्यंतविपर्ययो भवति स्तोका रज्जुः सिकतास्तर्क्वित्यथाप्यंतव्या
पत्तिर्भवति ॥१॥ ओघो मेघो नाधो गाधो वधूर्मध्वित्यथापि वर्णोपजन आस्थद्वारो भरूजेति तत्
द्यत्र स्वरादनंतरांतस्थांतर्धातुर्भवति तद्द्विप्रकृतीनां स्थानमिति प्रदिशंति तत्र सिद्धायामनुपपद्य
मानायामितरयोपपिपादयिषेत्तत्राप्येके अल्पनिष्पत्तयो भवंति तद्यथैतदूतिर्मृदुः पृथुः पृषतः कुणा
रुमित्यथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यंते दमूनाः क्षेत्रसाधा इत्यथापि नैगमे
भ्यो भाषिका उष्णं घृतमित्यथापि प्रकृतय एवैकेषु भाष्यंते विकृतय एकेषु शवतिर्गतिकर्मा कं
बोजेष्वेव भाष्यते कंबोजाः कंबलभोजाः कमनीयभोजा वा कंबलः कमनीयो भवति विकारम

नि॰पू॰२

१०

स्यार्थेषु भाषंते शवइति दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येषु एवमेकपदानि निर्ब्रूयात् अथ तद्धितस
मासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात् दंड्यः पुरुषो दंडपुरुषो दं
डमर्हतीति वा दंडेन संपद्यत इति वा दंडो ददतेर्धारयतिकर्मणोऽक्रूरो ददते मणिमित्यभिभाषंते
दमनादित्यौपमन्यवो दंडमस्याकर्षतेति गर्हायां कक्ष्या रज्जुरश्वस्य कक्षं सेवते कक्षो गाहतेः
क्स इति नामकरणः ख्यातेर्वानर्थकोऽभ्यासः किमस्मिन् ख्यानमिति कषतेर्वा तत्सामान्यान्मनुष्य
कक्षो बाहुमूलसामान्यादश्वस्य॥२॥ राज्ञः पुरुषो राजपुरुषो राजा राजतेः पुरुषः पुरिषादः पुरि
शयः पूरयतेर्वा पूरयत्यंतरित्यंतरपुरुषमभिप्रेत्य॥ यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो
न ज्यायोऽस्ति कश्चित्॥ वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वमित्यपि निगमो भवति
विश्वकद्राकर्षो वीति चकद्र इति श्वगतौ भाष्यते द्रातीति गतिकुत्सना कद्रातीति द्राति कुत्सनाच्च कद्राति

१०

कद्रातीति सतोऽनर्थकोऽभ्यासस्तदस्मिन्नस्तीति विश्वकद्रः कल्याणवर्णरूपः कल्याणवर्णस्येवास्य
रूपं कल्याणं कमनीयं भवति वर्णो वृणोतेः रूपं रोचतेः एवं तद्धितसमासान्निर्ब्रूयान्नैकपदानि निर्ब्रूया
न्नावैयाकरणाय नानुपसन्नायानिदंविदे वा नित्यं ह्यविज्ञातुर्विज्ञानेऽसूयोपसन्नाय तु निर्ब्रूयाद्यो वा
ऽलं विज्ञातुं स्यान्मेधाविने तपस्विने वा॥३॥ विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि॥ अ
सूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्यां॥ य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं
संप्रयच्छन्॥ तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्चनाह॥ अध्यापिता ये गुरुं नाद्रियंते विप्रा वा
चा मनसा कर्मणा वा॥ यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत्॥ यमेव विद्याः शुचिमप्र
मत्तं मेधाविनं ब्रह्मचर्योपपन्नं॥ यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्निति नि
धिः शेवधिरिति॥४॥ अथातोऽनुक्रमिष्यामो गौरिति पृथिव्या नामधेयं यद्दूरंगता भवति यच्चास्यां

नि॰ पू॰ २

११

भूतानि गच्छंति गातेर्वौकारो नामकरणोऽथापि पशुनामेह भवत्येतस्मादेवाऽथाप्यस्यां ताद्धितेन कृ
त्स्नवं निगमा भवंति गोभिः श्रीणीत मत्सरमिति पयः सोमत्सरः सोमो मंदतेस्तर्पतिकर्मणो मत्सर इति
लोभनामाभिमत्त एनेन धनं भवति पयः पिबतेर्वा प्यायतेर्वा क्षीरं क्षरतेर्घसेर्वेरो नामकरणमुशी
रमिति यथा अंशुं दुहंतो अध्यासते गवीत्यधिषवणचर्मणोंऽशुः शमष्टमात्रो भवत्यननाय शं भवतीति
वा चर्म चरतेर्वोच्चृत्तं भवतीति वाथापि चर्म च श्लेष्मा च गोभिः सन्नद्धो असि वीळयस्वेति रथस्तुतौ व
थापि स्नाव च श्लेष्मा च गोभिः सन्नद्धा पतति प्रसूतेति इषुस्तुतौ ज्यापि गौरुच्यते गव्या चेत्ताद्धितमथ चे
न्न गव्या गमयतीषूनिति॥ ५॥ वृक्षे वृक्षे नियता मीमयद्गौस्ततो वयः प्रपतान्पूरुषादः॥ वृक्षे वृक्षे ध
नुषि धनुषि वृक्षो व्रश्चनात् वृत्वा क्षां तिष्ठतीति वा क्षा क्षियतेर्निवासकर्मणो नियता मीमयद्गौः श
ब्दं करोति मीमयतिः शब्दकर्मा ततो वयः प्रपतंति पुरुषानदनाय विरिति शकुनिनाम वेतेर्गति

११

ती

कर्मणोऽथापीषुनामेह भवत्येतस्मादेवादित्योऽपि गौरुच्यते॥ उतादः परुषे गवि॥ पर्ववति भा
स्वतीत्यौपमन्यवोऽथाप्यस्यैको रश्मिश्चंद्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यमादित्यतोऽस्य दीप्ति
र्भवतीति सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्व इत्यपि निगमो भवति सोऽपि गौरुच्यते॥ अत्राह गोरम
न्वतेति तदुपरिष्टाद्व्याख्यास्यामः सर्वेऽपि रश्मयो गाव उच्यंते॥ ६॥ ता वां वास्तून्युश्मसि गमध्यै
यत्र गावो भूरिशृंगा अयासः॥ अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि॥ तानि
वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृंगा बहुशृंगा भूरीति बहुनो नामधेयं
प्रभवतीति सतः शृंगं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्ग
तमिति वाऽयासोऽयनास्तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्ध्यस्थमवभाति
भूरि॥ पादः पद्यतेस्तन्निधानात्पदं पशुपादप्रकृतिः प्रभागपादः प्रभागपादसामान्यादि

तराणिपदान्येवमन्येषामपिसत्वानांसंदेहाविद्यंतेतानिचेत्समानकर्माणिसमाननिर्वचना
निनानाकर्माणिचेन्नानानिर्वचनानियथार्थंनिर्वक्तव्यानीतीमान्येकविंशतिःपृथिवीना
मधेयान्यनुक्रांतानितत्रनिर्ऋतिर्निरमणादृछतेःकृछ्रापत्तिरितरासापृथिव्यासंदिह्यतेतयो
र्विभागस्तस्याएषाभवति॥७॥यईंचकारनसोअस्यवेदयईंददर्शहिरुगिन्नुतस्मात्॥स
मातुर्योनापरिवीतोअंतर्बहुप्रजानिर्ऋतिमाविवेश॥बहुप्रजाःकृछ्रमापद्यतइतिपरिव्रा
जकावर्षकर्मेतिनैरुक्तायईंचकारेतिकरोतिकिरतीसंदिग्धौवर्षकर्मणानसोस्यवेदमध्य
मःसएवास्यवेदमध्यमोयोददर्शादित्योपहितंसमातुर्योनौमातांतरिक्षंनिर्मीयंतेस्मिन्भूता
नियोनिरंतरिक्षंमहानवयवःपरिवीतोवायुनाऽयमपीतरोयोनिरेतस्मादेवपरिवृतोभव
तिबहुप्रजाभूमिमापद्यतेवर्षकर्मणाशाकपूणिःसंकल्पयांचक्रेसर्वादेवताजानामीतितस्मैदेव

तोभयलिंगाप्रादुर्बभूवतांनजज्ञेतांपप्रछविविदिषाणित्वेतिसास्माएतामृचमादिदेशैषामद्देवतेति॥८॥अ
यंसशिङ्क्तेयेनगौरभीवृतामिमातिमायुंध्वसनावधिश्रिता॥साचित्तिभिर्निहिचकारमर्त्यंविद्युद्भवंती
प्रतिवव्रिमौहत॥अयंसशब्दायतेयेनगौरभिप्रवृत्तामिमातिमायुंशब्दंकरोतिमायुमिवादित्यमितिवा
वागेषामाध्यमिकाध्वंसनेमेघेधिश्रितासाचित्तिभिःकर्मभिर्नीचैर्निकरोतिमर्त्यंविद्युद्भवंतीप्रत्यू
हतेवव्रिंवव्रिरितिरूपनामवृणोतीतिसतोवर्षेणप्रछाद्यपृथिवींतत्पुनरादत्ते॥९॥हिरण्यनामान्युत्त
राणिपंचदशहिरण्यंकस्माद्ध्रियतआयम्यमानमितिवाह्रियतेजनाज्जनमितिवाहितरमणंभवतीतिवा
हृदयरमणंभवतीतिवाहर्यतेर्वास्यात्प्रेप्साकर्मणोंतरिक्षनामान्युत्तराणिषोडशांतरिक्षंकस्मादंतराक्षां
तंभवत्यंतरेमेइतिवाशरीरेष्वंतरक्षयमितिवातत्रसमुद्रइत्येतत्पार्थिवेनसमुद्रेणसंदिह्यतेसमुद्रःक
स्मात्समुद्द्रवंत्यस्मादापःसमभिद्रवंत्येनमापःसंमोदंतेस्मिन्भूतानिसमुदकोभवतिसमुनत्तीतिवात

नि॰दू॰२

यो र्विभागस्तत्रेतिहासमाचक्षते देवापिश्चार्ष्टिषेणः शंतनुश्च कौरव्यौ भ्रातरौ बभूवतुः स शंतनुः कनीया
नभिषेचयांचक्रे देवापिस्तपः प्रतिपेदे ततः शंतनो राज्ये द्वादशवर्षाणि देवो न ववर्ष तमूचुर्ब्राह्मणा अ
धर्मस्त्वया चरितो ज्येष्ठं भ्रातरमंतरित्याभिषेचितं तस्मात्ते देवो न वर्षतीति स शंतनुर्देवापिं शिशिक्ष राज्ये

१२

न तमुवाच देवापिः पुरोहितस्तेसानि याजयानि च त्वेति तस्यैतद्वर्षकामसूक्तं तस्यैषा भवति॥१०॥ आर्ष्टि
षेणो होत्रमृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान्॥ स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या
अभि॥ आर्ष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा सेना सेश्वरा समानगतिर्वा पुत्रः पुरु त्रायते
निपरणाद्वा पुं नरकं ततस्त्रायत इति वा होत्रमृषिर्निषीदन्नृषिर्दर्शनात् स्तोमान्ददर्शेत्यौपमन्यवस्त
घदेनां स्तपस्यमानान्ब्रह्म स्वयंभ्वभ्यानर्षत्त ऋषयोभवंस्तदृषीणामृषित्वमिति विज्ञायते देवापिर्देवा
नामाप्याः स्तुत्या च प्रदानेन च देवसुमतिं देवानां कल्याणीं मतिं चिकित्वांश्चेतनावान्॥ स उत्तरस्मादध

१२

रं समुद्रं॥ उत्तर उद्धततरो भवत्यधरोधोरोधो न धावती त्यूर्ध्वगतिः प्रतिषिद्धा तस्योत्तरा भूयसे निर्वचनाय॥
॥११॥ यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत्॥ देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचम
स्मा अयच्छत्॥ शंतनुः शं तनोस्त्विति वा शमस्मै तन्वा अस्त्विति वा पुरोहितः पुर एनं दधति होत्राय वृतः कृप
यमाणोन्वध्यायद्देवश्रुतं देवा एनं शृण्वंति वृष्टिवनिं वृष्टियाचिनं रराणो रातिरभ्यस्तो बृहस्पतिर्ब्रह्मासी
त्सो स्मै वाचमयच्छद्बृहदुपव्याख्यातं॥१२॥ साधारणान्युत्तराणि षड्दिवश्चादित्यस्य च यानि त्वस्य प्राधान्ये
नोपरिष्टात्तानि व्याख्यास्यामः आदित्यः कस्मादादत्ते रसानादत्ते भासं ज्योतिषामादीप्तो भासेति वादितेः पुत्र
इति वाल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक् सूर्यमादितेय मदितेः पुत्रमेवमन्यासामपि देवतानामा
दित्यप्रवादाः स्तुतयो भवंति तद्यथैतन्मित्रस्य वरुणस्यार्यम्णो दक्षस्य भगस्यांशस्येत्यथापि मित्रावरुण
योः॥ आदित्या दानुनस्पती दानपती॥ अथापि मित्रस्यैकस्य॥ प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आ

नि॰पू॰२ दि॰ शिक्षति व्रतेनेत्यपि निगमो भवत्यथापि वरुणस्यैकस्य ॥ अथा वयमादित्य व्रते तव ॥ व्रत
मिति कर्मनाम निवृत्तिकर्म वारयतीति सतः इदमपीतरद्व्रतमेतस्मादेव वृणोतीति सतोऽन्नमपि
व्रतमुच्यते यदावृणोति शरीरं ॥१३॥ स्वरादित्यो भवति सु अरणः सु ईरणः स्वृतो रसान् स्वृतो
१४ भासं ज्योतिषां स्वृतो भासेति वैतेन द्यौर्व्याख्याता ॥ पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरु
क्ताः संस्प्रष्टा रसान् संस्प्रष्टा भासं ज्योतिषां संस्पृष्टो भासेति वाथ द्यौः संस्पृष्टा ज्योतिर्भिः पु
रु ण्यकृद्भिश्च ॥ नाक आदित्यो भवति नेता रसानां नेता भासां ज्योतिषां प्रणयोऽथ द्यौः कमिति सुखना
म तत्प्रतिषिद्धं प्रतिषिध्येत न वा अमुं लोकं जग्मुषे किंच नाकं ॥ न वा अमुं लोकं गतवते किंच नासुखं १४
पुण्यकृतो ह्येव तत्र गच्छन्ति ॥ गौरादित्यो भवति गमयति रसान् गच्छत्यन्तरिक्षेऽथ द्यौर्यत्पृथिव्या अधि
दूरं गता भवति यच्चास्यां ज्योतींषि गच्छन्ति ॥ विष्टबादित्यो भवत्याविष्टो रसानाविष्टो भासं ज्योतिषा

माविष्टो भासेति वाथ द्यौराविष्टा ज्योतिर्भिः पुण्यकृद्भिश्च ॥ नभ आदित्यो भवति नेता रसानां ने
ता भासां ज्योतिषां प्रणयोऽपि वा भन एव स्याद्विपरीतो न न भातीति वैतेन द्यौर्व्याख्याता ॥१४॥
रश्मिनामान्युत्तराणि पंचदश रश्मिर्यमनात्तेषामादितः साधारणानि पंचाश्वरश्मिभिर्दिङ्ना
मान्युत्तराण्यष्टौ दिशः कस्माद्दिशतेरासदनादपि वाभ्यशनात् तत्र काष्ठा इत्येतदनेकस्यापि सत्वस्य
नाम भवति काष्ठा दिशो भवंति क्रान्त्वा स्थिता भवंति काष्ठा उपदिशो भवंतीतरेतरं क्रान्त्वा स्थिता भवं
त्यादित्योऽपि काष्ठोच्यते क्रान्त्वा स्थितो भवत्याज्यंतोऽपि काष्ठोच्यते क्रान्त्वा स्थितो भवत्यापोऽपि काष्ठा
उच्यन्ते क्रान्त्वा स्थिता भवंतीति स्थावराणां ॥१५॥ अतिष्ठंतीनामनिवेशनानां काष्ठानां मध्ये नि
हितं शरीरं ॥ वृत्रस्य निण्यं विचरंत्यापो दीर्घं तम आशयदिंद्रशत्रुः ॥ अतिष्ठंतीनामनिविशमा
नानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः शरीरं शृणातेः शम्नातेर्वा वृत्रस्य
निण्यं निर्णामं विचरंति विजानंत्याप इति दीर्घं द्राघतेस्तमस्तनोतेराशयदाशेतेरिंद्रशत्रुरिंद्रोऽस्य

नि॰ अ॰ २

रामपितावाश्रातभिता वीतस्मादिंद्रशत्रुस्तत्को वृत्रो मेघइति नैरुक्तास्त्वाष्ट्रोसुरइत्यैतिहासिकाअपां
च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवंत्यहिवत्तु खलु मंत्रवर्णा
ब्राह्मणवादाश्च विवृध्या शरीरस्य स्रोतांसि निवारयांचकार तस्मिन्हते प्रसस्यंदिरआपस्तदभि
वादिन्येषर्ग्भवति॥१६॥ दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः॥ अपां बिलमपि
हितं यदासीद्वृत्रं जघन्वाँ अपतद्ववार॥ दासपत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदासयति कर्माण्य
हिगोपा अतिष्ठन्नहिना गुप्ता अहिरयनादेत्यंतरिक्षेयमपीतरोहिरेतस्मादेव निर्ह्रसितोपसर्ग आहं
तीति॥ निरुद्धा आपः पणिनेव गावः॥ पणिर्वणिग्भवति पणिः पणनाद्वणिक्पण्यं नेनेक्ति॥ अपां बि
लमपिहितं यदासीत्॥ बिलं भरं भवति बिभर्तेर्वृत्रं जघ्निवानपववार तद्वृत्रो वृणोतेर्वा वर्त्ततेर्वा व
र्द्धतेर्वा यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते यदवर्त्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते यदव
र्द्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते॥१७॥ रात्रिनामान्युत्तराणि त्रयोविंशती रात्रिः कस्मात्प्र र

मयति भूतानि नक्तंचारीण्युपरमयतीतराणि ध्रुवीकरोति रातेर्वा स्याद्दानकर्मणः प्रदीयंतेस्या
मवश्यायाः उषो नामान्युत्तराणि षोडश उषाः कस्मादुच्छतीति सत्या रात्रेरपरः कालस्तस्या एषा
भवति॥१८॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा॥ यथा प्रसूता सवितुः
सवायँ एवा रात्र्युषसे योनिमारैक्॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं प्रज्ञाततममज
निष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्स्थानं
स्त्रीयोनिरभियुत एनां गर्भस्तस्या एषापरा भवति॥१९॥ रुशद्वत्सा रुशती श्वेत्यागादारैगु कृ
ष्णा सदनान्यस्याः॥ समानबंधू अमृते अनूची द्यावा वर्णं चरत आमिनाने॥ रुशद्वत्सा सूर्य
वत्सा रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः सूर्यमस्या वत्समाह साहचर्याद्रसहरणाद्वा
रुशती श्वेत्यागात्॥ श्वेत्या श्वेततेररिचत्कृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः कृष्णं कृष्य

नि॰पू॰२

तेर्निरुद्धोऽभवर्णार्थेनेसंस्तोतिसमानबंधूसमानबंधने अमर्त्ते अमरणधर्माणावन्रूची अनूच्यावितीतरेतरमभिप्रेत्य द्यावावर्णंचरतस्तेएव द्यावौद्योतनादपिवाद्यावाचरतस्तया सहचरतइतिस्यात्ममिनाने आमिन्वाने अन्योन्यस्याध्यात्मंकुर्वाणे अहर्नामान्युत्तराणिद्वा दशाहःकस्मादुपाहरंत्यस्मिन्कर्माणि तस्यैषनिपातोभवति वैश्वानरीयायामृचि॥२०॥ अहश्चकृष्णमहरर्जुनंचविवर्त्ततेरजसीवेद्याभिः॥ वैश्वानरोजायमानोनराजावातिरज्ज्यो तिषाग्निस्तमांसि॥ अहश्चकृष्णंरात्रिःशुक्लंचाहरर्जुनंविवर्त्ततेरजसीवेद्याभिर्वेदितव्याभिः प्रवृत्तिभिर्वैश्वानरोजायमानइवोद्यन्नादित्यःसर्वेषांज्योतिषांराजावाहन्नग्निर्ज्योतिषा तमांसिमेघनामान्युत्तराणित्रिंशन्मेघःकस्मान्मेहतीतिसतआउपरउपलइत्येताभ्यां साधारणानिपर्वतनामभिरुपरउपलोमेघोभवत्युपरमंतेस्मिन्नभ्राण्युपरताआपइति

१६

वातेषामेषाभवति॥२१॥ देवानांमानेप्रथमा अतिष्ठन्कृंतत्रादेषामुपराउदायन्॥ त्रयस्तपंतिपृ थिवीमनूपाद्वाबृबूकंवहतःपुरीषं॥ देवानांनिर्माणेप्रथमाअतिष्ठन्माध्यमकादेवगणाःप्रथमइतिमुख्य नामप्रतमोभवतिकृंतत्रमंतरिक्षंविकर्त्तनंमेघानांविकर्त्तनेनमेघानामुदकंजायते॥ त्रयस्तपंतिपृ थिवीमनूपाः॥ पर्जन्योवायुरादित्यःशीतोष्णवर्षैरोषधीःपाचयंत्यनूपाअनुवपंतिलोकान्स्वेनस्वेन कर्मणायमपीतरोनूपएतस्मादेवानूप्यतउदकेनापिवान्वाविदितिस्याद्यथाप्रागितितस्यानूपइतिस्या द्यथाप्राचीनमिति॥ द्वाबृबूकंवहतःपुरीषं॥ वाय्वादित्यावुदकंबृबूकमित्युदकनामब्रवीतेर्वाभ्रंशक र्मणोवाभ्रंशतेर्वापुरीषंपृणातेःपूरयतेर्वा॥२२॥ वाङ्नामान्युत्तराणिसप्तपंचाशद्वाक्कस्माद्वचेस्तत्रस रस्वतीत्येतस्यनदीवद्देवतावच्चनिगमाभवंतितद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामोऽथैतन्नदीवत्॥ ॥२३॥ इयंशुष्मेभिर्बिसखाइवारुजत्सानुगिरीणांतविषेभिरूर्मिभिः॥ पारावतघ्नीमवसेसुवृक्तिभिःस

१६

रस्वतीमाविवासेमधीतिभिः॥ इयंशुष्मेभिःशोषणैःशुष्ममितिबलनामशोषयतीतिसतोबिसंबिस्यते
र्भेदनकर्मणोवृद्धिकर्मणोवासानुसमुच्छ्रितंभवतिसमुन्नुन्नमितिवामहद्भिरूर्मिभिःपारावतघ्नीपारा
वारघातिनीपारंपरंभवत्यवारमवरमवनायसुवृक्तिभिःशोभनाभिस्तुतिभिःसरस्वतीनदीकर्म
भिःपरिचरेमोदकनामान्युत्तराण्येकशतमुदकंकस्मादुनत्तीतिसतोनदीनामान्युत्तराणिसप्तत्रिंशन्न
द्यःकस्मान्नदनाइमाभवंतिशब्दवत्योबहुलमासांनैघंटुकंवृत्तमाश्चर्यमिवप्राधान्येनतत्रेतिहासमा
चक्षतेविश्वामित्रऋषिःसुदासःपैजवनस्यपुरोहितोबभूवविश्वामित्रःसर्वमित्रःसर्वंसंसृतंसुदाः
कल्याणदानःपैजवनःपिजवनस्यपुत्रःपिजवनःपुनःस्पर्द्धनीयजवोवामिश्रीभावगतिर्वासवित्तंगृ
हीत्वाविपाट्छुतुद्र्योःसंभेदमाययावनुययुरितरेसविश्वामित्रोनदीस्तुष्टावगाधाभवतेत्यपिद्विवदपि
बहुवत्तद्यद्द्विवदुपरिष्टात्तद्व्याख्यास्यामोऽथैतद्बहुवत्॥२४॥रमध्वंमेवचसेसोम्यायऋतावरीरुपमुहू

र्तमेवैः॥प्रसिंधुमच्छाबृहतीमनीषावस्युरह्वेकुशिकस्यसूनुः॥उपरमध्वंमेवचसेसोम्यायसोमसंपा
दिनऋतावरीर्ऋतवत्यऋतमित्युदकनामप्रत्यृतंभवतिमुहूर्तमेवैरयनैरवनैर्वामुहूर्तोमुहुऋतुर्ऋ
तुरर्तेर्गतिकर्मणोमुहुर्मूढइवकालोयावदभीक्ष्णंचेत्यभीक्ष्णमभिक्षणंभवतिक्षणःक्षणोतेःप्रक्ष्णुतः
कालःकालःकालयतेर्गतिकर्मणःप्राभिह्वयामिसिंधुंबृहत्यामहत्यामनीषयामनसईषयास्तुत्या
प्रज्ञयावावनायकुशिकस्यसूनुःकुशिकोराजाबभूवक्रोशतेःशब्दकर्मणःक्रंशतेर्वास्यात्प्रकाशय
तिकर्मणःसाधुविक्रोशयितार्थानामितिवानद्यःप्रत्यूचुः॥२५॥इंद्रोअस्माँअरदद्वज्रबाहुरपाहन्वृ
त्रंपरिधिंनदीनां॥देवोनयत्सवितासुपाणिस्तस्यवयंप्रसवेयामउर्वीः॥इंद्रोअस्मानरदद्वज्रबाहूर
दतिःखनतिकर्मापाहन्वृत्रंपरिधिंनदीनामितिव्याख्यातंदेवोनयत्सवितासुपाणिःकल्याणपाणिःपा
णिःपणायतेःपूजाकर्मणःप्रगृह्यपाणीदेवान्पूजयंति॥तस्यवयंप्रसवेयामउर्वीः॥उर्व्युर्णोतेर्वृणोते

रिष्योर्णवाभः प्रत्याख्यायांतत आशुश्च ऋतुः॥२६॥ आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन॥ नि ते
नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते॥ आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च नि
नमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिष्वजनायेति नमा इति वाऽश्वनामान्युत्तराणि षड्विंश
तिस्तेषामष्टा उत्तराणि बहुवदश्वः कस्मादश्नुते ध्वानं महाशनो भवतीति वा तत्र दधिक्रा इत्येतद्दधत्क्राम
तीति वा दधत्क्रंदतीति वा दधदाकारी भवतीति वा तस्याश्ववद्देवतावच्च निगमा भवंति तद्यद्देवतावदुपरि
ष्टात्तद्व्याख्यास्यामोऽथैतदश्ववत्॥२७॥ उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपि कक्ष आसनि॥
क्रतुं दधिक्रा अनु संतवीत्वत् पथामंकांस्यन्वापनीफणत्॥ अपि स वाजी वेजनवान् क्षेपणमनु तूर्णमश्नु

ते ध्वानं ग्रीवायां बद्धो ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वाऽपि कक्ष आसनीति व्याख्यातं क्रतुं दधिक्राः
कर्म वा प्रज्ञां वा॥ अनुसंतवीत्वत्॥ तनोतेः पूर्वया प्रकृत्या निगमः पथामंकांसि पथां कुटिलानि पंथाः पत

नेर्वा पद्यतेर्वा पंथतेर्वा अंकोंचतेरापनीफणदिति फणतेश्चर्करीतवृत्तं दशोत्तराण्यादिष्टोपयोजनानीत्या
चक्षते साहचर्यज्ञानाय ज्वलतिकर्माण उत्तरे धातव एकादश तावंत्येवोत्तराणि ज्वलतो नामधेयानि नामधे
यानि॥२८॥ ॥अथ निर्वचनमोघोराज्ञोविद्याहवा अथातोऽनुक्रमिष्यामो वृक्षे वृक्षे तावां वा त्स्लनिर्यईच
कारायं सद्रिं क्लै हिरण्यनामान्याष्टिषेणो यद्देवापिः साधारणानि स्वरादित्यो रश्मिनामान्यतिष्ठंतीनां दा
सपत्नी रात्रिनामानी दंश्रेष्ठं रुत्रा द्युत्साहश्च कृत्स्नं देवानां मानेवाउ॰ नामानी यं स्तुष्णेभी रमध्वं मरुद्रो अ
स्मानाते कारो उत स्य वाज्यष्टाविंशतिः॥ ॥इति निरुक्ते पूर्वषट्के द्वितीयोऽध्यायः॥ ॥ॐ॥ ॥कर्मनामा
न्युत्तराणि षड्विंशतिः कर्म कस्मात् क्रियत इति सतोऽपत्यनामान्युत्तराणि पंचदशापत्यं कस्मादपततं भ
वति नानेन पततीति वा तद्यथा जनयितुः प्रजैवमथर्षेर्ऋचाउदाहरिष्यामः॥१॥ परिषद्यं ह्यरणस्य रे
क्णो नित्यस्य रायः पतयः स्याम॥ न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः॥ परिहर्त्त

नि॰ पू॰ ३

१९

व्यं हि नोपसर्त्तव्यमरणस्य रेक्णोऽरणोऽपार्णो भवति रेक्ण इति धननाम रिच्यते प्रयतो नित्यस्य रायः पतयः
स्याम पित्र्यस्येव धनस्य॥ न शेषो अग्ने अन्यजातमस्ति॥ शेष इत्यपत्यनाम शिष्यते प्रयतो चेतयमान
स्यतत्प्रमत्तस्य भवति मा नः पथो विदूदुष इति तस्योत्तरा भूयसे निर्वचनाय॥२॥ नहि ग्रभायारणः सुशे
वोन्योदर्यो मनसा मंतवा उ॥ अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः॥ नहि ग्रहीतव्योऽरणः
सुसुखतमोप्यन्योदर्यो मनसापि न मंतव्यो ममायं पुत्र इत्यथ स ओकः पुनरेव तदेति यत आगतो भ
वत्योक इति निवासनामोच्यत एतु नो वाजी वेजनवानभिषहमाणः सपत्नान्नवजातः स एव पुत्र इत्यथै
तां दुहितृदायाद्य उदाहरंति पुत्रदायाद्य इत्येके॥३॥ शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं स
पर्यन्॥ पिता यत्र दुहितुः सेकमृंजन्त्सं शग्म्येन मनसा दधन्वे॥ प्रशास्ति वोढा संतानकर्मणे दुहितुः
पुत्रभावं दुहिता दुर्हिता दूरे हिता दोग्धेर्वा नप्तारमुपागमद्दौहित्रं पौत्रमिति विद्वान्प्रजननयज्ञस्य रेतसो

१९

वांगादंगात्संभूतस्य हृदयादधिजातस्य मातरि प्रत्यृतस्य विधानं पूजयन्नविशेषेण मिथुनाः पुत्रा
दायादा इति तदेतदृक्श्लोकाभ्यामभ्युक्तं॥ अंगादंगात्संभवसि हृदयादधिजायसे॥ आत्मा वै पुत्र
नामासि स जीव शरदः शतमित्यविशेषेण पुत्राणां दायो भवति धर्मतः॥ मिथुनानां विसर्गादौ मनुः
स्वायंभुवोऽब्रवीत्॥ न दुहितर इत्येके तस्मात्पुमान्दायादोऽदायादा स्त्रीति विज्ञायते तस्मात्स्त्रियं जातां प
रास्यंति न पुमांसमिति च स्त्रीणां दानविक्रयातिसर्गा विद्यंते न पुंसः पुंसोपीत्येके शौनःशेपे दर्शनात्॥
अभ्रातृमतीवाद इत्यपरं॥ अमूर्या यंति जामयः सर्वा लोहितवाससः॥ अभ्रातर इव योषास्तिष्ठंति ह
तवर्त्मनः॥ अभ्रातृका इव योषास्तिष्ठंति संतानकर्मणे पिंडदानाय हतवर्त्मान इत्यभ्रातृकाया अनि
र्वाह औपमिकस्तस्योत्तरा भूयसे निर्वचनाय॥४॥ अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये ध
नानां॥ जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः॥ अभ्रातृकेव पुंसः पितॄनेत्यभिमुखी

नि॰पू॰३

२०

संतानकर्मणेपिंडदानायनपतिंगर्त्तारोहिणीवधनलाभायदाक्षिणाजीगर्त्तःसभास्थाणुर्गृणातेःसत्य
संगरोभवतितंतत्रयापुत्रायापतिकासारोहतितांतत्राक्षैराघ्नंतिसारिक्थंलभतेश्मशानसंचयोपिग
र्त्तउच्यतेगुरतेरपगूर्णोभवतिश्मशानंश्मशयनंश्मशरीरंशरीरंशृणातेःशम्नातेर्वाश्मश्रुलोमश्मनि
श्रितंभवतिलोमलुनातेर्वालीयतेर्वानोपरस्याविःकुर्याद्यदुपरस्याविःकुर्याद्गर्त्तेष्ठास्यात्प्रमायुकोय
जमानइत्यपिनिगमोभवतिरथोपिगर्त्तउच्यतेगृणातेःस्तुतिकर्मणःस्तुततमंयानं॥आरोहथोवरुण
मित्रगर्त्तमित्यपिनिगमोभवतिजायेवपत्येकामयमानासुवासाऋतुकालेषूपाहसनेवदंतान्विवृणुतेरू
पाणीतिचतस्रउपमानाभ्रात्रीमुपयच्छेततोकंह्यस्यतद्भवतीत्यभ्रात्रिकायाउपयमनप्रतिषेधःप्रत्य
क्षःपितुश्चपुत्रभावःपितायत्रदुहितुरप्रत्तायारेतःसेकंप्रार्जयतिसंदधात्यात्मानंसंगमेनमनसेत्यथै
तांजाम्यारिक्थप्रतिषेधउदाहरंतिज्येष्ठंपुत्रिकाया इत्येके॥५॥नजामयेतान्वोरिक्थमारैक्चकारगर्भं

२०

सनितुर्निधानं॥यदीमातरोजनयंतवह्निमन्यःकर्त्तासुकृतोरन्यऋंधन्॥नजामयेभगिन्यैजामिरन्येस्यां
जनयंतिजामपत्यंजमतेर्वास्याद्गतिकर्मणोनिर्गमनप्रायाभवतितान्वआत्मजःपुत्रोरिक्थंप्रारिचत्प्रादा
च्चकारैनांगर्भनिधानींसनितुर्हस्तग्राहस्ययदिहमातरोजनयंतवह्निंपुत्रमवह्निंचस्त्रियमन्यतरःसंता
नकर्त्ताभवतिपुमान्दायादोन्यतरोर्द्धयित्वाजामिःप्रदीयतेपरस्मै॥६॥मनुष्यनामान्युत्तराणिपंचविंशति
र्मनुष्याःकस्मान्मत्वाकर्माणिसीव्यंतिमनस्यमानेनसृष्टामनस्यतिःपुनर्मनस्वीभावेमनोरपत्यंमनुषो
वातत्रपंचजनाइत्येतस्यनिगमाभवंति॥७॥तदद्यवाचःप्रथमंमसीययेनासुरांअभिदेवाअसाम॥
ऊर्जादउतयज्ञियासःपंचजनाममहोत्रंजुषध्वं॥तदद्यवाचःपरमंमसीययेनासुरानभिभवेमदेवाअसु
राअसुरताःस्थानेष्वस्ताःस्थानेभ्यइतिवापिवासुरितिप्राणनामास्तःशरीरेभवतितेनतद्वंतःसोर्देवान
सृजततत्सुराणांसुरत्वमसोरसुरानसृजततदसुराणामसुरत्वमितिविज्ञायते॥ऊर्जादउतयज्ञियासः॥

अन्नादाश्चयज्ञियाश्चोर्गित्यन्ननामोर्जयतीतिसतःपक्वंसुप्रवृक्णमितिवा॥पंचजनाममहोत्रंजुष
ध्वं॥गंधर्वाःपितरोदेवाअसुरारक्षांसीत्येकेचत्वारोवर्णानिषादःपंचमइत्यौपमन्यवोनिषादःकस्मा
न्निषदनोभवतिनिषण्णमस्मिन्पापकमितिनैरुक्ताः॥यत्पांचजन्ययाविशा॥पंचजनीनयाविशापंच
पक्तासंख्यास्त्रीपुंनपुंसकेष्वविशिष्टाबाहूनामान्युत्तराणिद्वादशबाहूकस्मात्प्रबाधतआभ्यांकर्मा
ण्यंगुलिनामान्युत्तराणिद्वाविंशतिरंगुलयःकस्मादग्रगामिन्योभवंतीतिवाग्रगालिन्योभवंतीतिवाग्र
कारिण्योभवंतीतिवाग्रसारिण्योभवंतीतिवांकनाभवंतीतिवांजनाभवंतीतिवापिवाभ्यंचनादेवस्युस्ता
सामेषाभवति॥८॥दशावनिभ्योदशकक्ष्येभ्योदशयोक्त्रेभ्योदशयोजनेभ्यः॥दशाभीशुभ्योअर्चता
जरेभ्योदशधुरोदशयुक्तावहद्भ्यः॥अवनयोंगुलयोभवंत्यवंतिकर्माणिकक्ष्याःप्रकाशयंतिकर्माणि
योक्त्राणियोजनानीतिव्याख्यातमभीशवोभ्यश्नुवतेकर्माणि॥दशधुरोदशयुक्तावहद्भ्यः॥धूर्धूर्वतेर्व

२१

धकर्मणइयमपीतराधूरेतस्मादेवविहंतिवहंधारयतेर्वाकांतिकर्माणउत्तरेधातवोष्टादशान्ननामान्युत्त
राण्यष्टाविंशतिरन्नंकस्मादानतंभूतेभ्योत्तेर्वात्तिकर्माणउत्तरेधातवोदशबलनामान्युत्तराण्यष्टाविंशति
र्बलंकस्माद्बलंभरंभवतिबिभर्तेर्धननामान्युत्तराण्यष्टाविंशतिरेवधनंकस्माद्धिनोतीतिसतोगोनामान्यु
त्तराणिनवक्रुध्यतिकर्माणउत्तरेधातवोदशक्रोधनामान्युत्तराण्येकादशगतिकर्माणउत्तरेधातवोद्वाविं
शंशतंक्षिप्रनामान्युत्तराणिषड्विंशतिःक्षिप्रंकस्मात्संक्षिप्तोविकर्षोंतिकनामान्युत्तराण्येकादशांतिकंकस्मा
दानीतंभवतिसंग्रामनामान्युत्तराणिषट्चत्वारिंशत्संग्रामःकस्मात्संगमनाद्वासंगरणाद्वासंगतौग्रामावि
तिवातत्रखलइत्येतस्यनिगमाभवंति॥९॥अभीदमेकमेकोअस्मिनिष्षाळभीद्वाकिमुत्रयःकरंति॥
खलेनपर्षान्प्रतिहन्मिभूरिकिंमानिंदंतिशत्रवोनिंद्राः॥अभिभवामीदमेकमेकोस्मिनिःषह
माणःसपत्नानभिभवामिद्वौकिंमात्रयःकुर्वंत्येकइतासंख्याद्वौद्रुततरासंख्यात्रयस्तीर्णतमा

नि॰पू॰२

२२

संख्या चत्वारश्चलितत मासंख्याष्टावश्नोतेर्नव नवननीया नावाप्ता वा दश दस्ता दृष्टार्था वा वि-
शतिर्द्विर्दशतः शतं दशदशतः सहस्रं सहस्वदयुतं नियुतं प्रयुतं तत्तदभ्यस्तमर्बुदो मेघो भवत्य-
रणमंबु तद्दोंबुदोंबुमद्भातीति वांबुमद्भवतीति वा स यथा महान्बहुर्भवति वर्षंस्तदिवार्बुदं॥ ख-
लेन पर्षान्प्रति हन्मि भूरि॥ खल इव पर्षान्प्रतिहन्मि भूरि खल इति संग्रामनाम खलतेर्वा स्-
खलतेर्वाऽयमपीतरः खल एतस्मादेव समास्कन्नो भवति॥ किं मा निंदंति शत्रवोनिंद्राः॥ य इंद्रं
नाविदुरिंद्रो ह्यहमस्म्यनिंद्रा इतर इति वा आशिः कर्मण उत्तरे धातवो दश तद्दूनामनी आक्षा-
ण आशुवान आपान आप्नुवानो वधकर्मण उत्तरे धातवस्त्रयस्त्रिंशत् तत्र वियात इत्येतद्वि-
यातयत इति वा वियातयेति वा॥ आखंडल प्र हूयसे॥ आखंडयितः खंडं खंडयतेस्तडिदित्यंति-
कवधयोः संसृष्टकर्म ताडयतीति सतः॥१०॥ त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या

२२

ददीमहि॥ या नो दूरे तडितो या अरातयोऽभि संति जंभया ता अनप्नसः॥ त्वया वयं सुवर्धयित्रा ब्र-
ह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीमहि याश्च नो दूरे तडितो याश्चांतिके अरातयोऽदा-
नकर्माणो वादानप्रज्ञा वा जंभय ता अनप्नसोऽप्न इति रूपनामाप्नोतीति सतो विद्युत्तडिद्भवतीति
शाकपूणिः सा ह्यवताडयति दूराच्च दृश्यतेऽपि त्विदमंतिकनामैवाभिप्रेतं स्यात्॥ दूरे चित्सन्तडिदिवा-
तिरोचसे॥ दूरेऽपि सन्नंतिक इव संदृश्यस इति क्वनामान्युत्तराण्येकादशैवत्रः कस्मादूर्जयती-
ति सतस्तन्वत्र कुत्स इत्येतत्कृंततेर्ऋषिः कुत्सो भवति कर्ता स्तोमानामित्यौपमन्यवोऽत्राप्यस्य वध-
कर्मैव भवति तत्सख इंद्रः शुष्णं जघानेत्यैश्वर्यकर्माण उत्तरे धातवश्चत्वार ईश्वरनामान्युत्तराणि च-
त्वारि तत्र इन इत्येतत्सनित ऐश्वर्येणेति वा सनितमनेनैश्वर्यमिति वा॥११॥ यत्रा सुपर्णा अमृतस्य
भागमनिमेषं विदथाभिस्वरंति॥ इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश॥

नि॰३॰२

यत्र सुपर्णाः सुपतना आदित्यरश्मयोऽमृतस्य भागमुदकस्यानिमिषंतो वेदनेनाभि
स्वरंतीति वाभिप्रयंतीति वेश्वरः सर्वेषां भूतानां गोपायितादित्यः स माधीरः पाकमत्रा
विवेशेति धीरो धीमान्पाकः पक्तव्यो भवति विपक्वप्रज्ञ आदित्य इत्युपनिषद्वर्णो भवती

२३

त्यधिदैवतमथाध्यात्मं यत्र सुपर्णाः सुपतनानींद्रियाण्यमृतस्य भागं ज्ञानस्यानिमिषं
तो वेदनेनाभिस्वरंतीति वाभिप्रयंतीति वेश्वरः सर्वेषामिंद्रियाणां गोपायितात्मा स माधी
रः पाकमत्राविवेशेति धीरो धीमान्पाकः पक्तव्यो भवति विपक्वप्रज्ञ आत्मेत्यात्मगतिमाच
ष्टे ॥१२॥ बहुनामान्युत्तराणि द्वादश बहु कस्मात्प्रभवतीति सतो ह्रस्व नामान्युत्तराण्येकादश

२३

ह्रस्वो ह्रसतेर्महन्नामान्युत्तराणि पंचविंशतिर्महान्कस्मान्मानेनान्याञ्जहातीति शाकपूणि
र्मंहनीयो भवतीति वा तत्रववक्षिथ विवक्षसा इत्येते वक्तेर्वा वहतेर्वा साभ्यासादुह नामान्यु

त्तराणि द्वाविंशतिर्गृहाः कस्माद्गृह्णंतीति सतां परिचरणकर्माण उत्तरे धातवो दश सुखना
मान्युत्तराणि विंशतिः सुखं कस्मात्सुहितं खेभ्यः खं पुनः खनतेः रूपनामान्युत्तराणि षोड
श रूपं रोचतेः प्रशस्यनामान्युत्तराणि दश प्रज्ञानामान्युत्तराण्येकादश सत्यनामान्युत्तरा
णि षट् सत्यं कस्मात्सत्सु तायते सत्प्रभवं भवतीति वाऽष्टा उत्तराणि पदानि पश्यतिकर्माण उ
त्तरे धातवश्चायन्तिप्रभृतीनि च नामान्यामिश्राणि नवोत्तराणि पदानि सर्वपदसमाम्नानायाथाऽ
थात उपमा यदतत्तत्सदृशमिति गार्ग्यस्तदासां कर्म ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयां
सं वाऽप्रख्यातं वोपमिमीतेऽथापि कनीयसा ज्यायांसं ॥१३॥ तनूत्यजेव तस्करा वनर्गू रशनाभिर्द
शभिरभ्यधीतां ॥ [illegible] तनूत्यक्तनूत्यक्ता वनर्गू वनगामिनावग्निमंथ
नौ बाहू तस्कराभ्यामुपमिमीते तस्करस्तत्करो भवतीति यत्पापकमिति नैरुक्तास्तनोतेर्वा स्यात्संतत

नि॰ पू॰ २

२४

कर्माभवत्यहोरात्रकर्मावा॥ रथ्यानाभिरिन्द्राभिरभ्यधातां॥ अभ्यधातामित्यभ्यधातांज्यायांस्तत्र
गुणोभिप्रेतः॥१४॥ कुहस्विद्दोषाकुहवस्तोरश्विनाकुहाभिपित्वंकरतःकुहोषतुः॥ कोवांशयुत्रा
विधवेवदेवरंमर्यंनयोषाकृणुतेसधस्थआ॥ क्वस्विद्रात्रौभवथःक्वदिवाक्वाभिप्राप्तिंकुरुथःक्व
वसथःकोवांशयनेविधवेवदेवरंदेवरःकस्माद्द्वितीयोवरउच्यतेविधवाविधातृकाभवतिविधवना
द्वाविधावनाद्वेतिचर्मशिराअपिवाधवइतिमनुष्यनामतद्वियोगाद्विधवादेवरोदीव्यतिकर्मामर्योम
नुष्योमरणधर्मायोषायौतेराकुरुतेसहस्थानेथनिपाताःपुरस्तादेवव्याख्यातायथेतिकर्मोपमा॥
यथावातोयथावनंयथासमुद्रएजति॥ भ्राजन्तोअग्नयोयथा॥ आत्मायक्ष्मस्यनश्यतिपुराजी
वगृभोयथा॥ आत्मातत्तेवांशीर्वापिवासइवैस्यादघावुध्याप्तिभूतइति॥ अग्निर्नयेभ्राजसारु
क्मवक्षसः॥ अग्निरिवयेमरुतोभ्राजमानारोचिष्णुरस्काभ्राजस्वन्तोरुक्मवक्षसः॥१५॥ चतुर

२४

दा

श्चिद्ददमानाद्बिभीयादानिधातोः॥ नदुरुक्तायस्पृहयेत्॥ चतुरोक्षान्धारयतइतितद्यथाकितवाद्बिभी
यादेवमेवदुरुक्ताद्बिभीयात्नदुरुक्तायस्पृहयेत्कदाचिदाइत्याकारउपसर्गःपुरस्तादेवव्याख्यातोर्थोप्युपमा
र्थेदृश्यते॥ जारआभगं॥ जारइवभगमादित्योत्रजारउच्यतेरात्रेर्जरयितासएवभासांतथापिनिगमो
भवतिस्वसुर्जारःशृणोतुनइत्युषसमस्यस्वसारमाहसाहचर्याद्रसहरणाद्वापित्वयंमनुष्यजारएवा
भिप्रेतःस्यात्स्त्रीभगस्तथास्याद्भजतेर्मेषइतिभूतोपमा॥ मेषोभूतोभियन्नयः॥ मेषोमिषतेस्तथा
पशुःपश्यतेरग्निरितिरूपोपमा॥ हिरण्यरूपःसहिरण्यसंदृगपांनपात्सेदुहिरण्यवर्णः॥ हिरण्यवर्ण
स्येवास्यरूपंथाइतिच॥ तंप्रत्नथापूर्वथाविश्वथेमथा॥ प्रत्नइवपूर्वइवविश्वइवेमइवेत्ययमेततरो
मुष्मादसावस्ततरोस्मादमुथायथासावितिव्याख्यातंवदितिसिद्धोपमा॥ ब्राह्मणवद्वृषलवत्॥ ब्राह्म
णाइववृषलाइवेतिवृषलोवृषशीलोभवतिवृषाशीलोवा॥१६॥ प्रियमेधवदत्रिवज्जातवेदोविरू

प

नि॰ पू॰ ३

२५

प्रवद॥ अंगिरस्वन्महिव्रतप्रस्कण्वस्य श्रुधी हवं॥ प्रियमेधः प्रिया अस्य मेधा यथैतेषामृषीणामेवं प्र
स्कण्वस्य शृणु ह्वानं प्रस्कण्वः कण्वस्य पुत्रः कण्वप्रभवो यथा प्राग्रमर्चिषि भृगुः संबभूव भृगुर्भृ
ज्यमानो न देहेंगारेष्वंगिरा अंगारा अंकना अंचना अत्रैव तृतीयमृच्छतेत्यूचुस्तस्मादत्रिर्न त्रय इति
विखननाद्वैखानसो भरणाद्भारद्वाजो विरूपो नानारूपो महिव्रतो महाव्रत इति॥१७॥ अथ लुप्तोपमा
न्यर्थोपमानीत्याचक्षते सिंहो व्याघ्र इति पूजायां श्वा काक इति कुत्सायां काक इति शब्दानुकृतिस्तदिदं श
कुनिषु बहुलं न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः काकोऽपकालयितव्यो भवतीति तित्तिरिस्तरणात्तिल
मात्रचित्र इति वा कपिंजलः कपिरिव जीर्णः कपिरिव जवत ईषत्पिंगलो वा कमनीयं शब्दं पिंजयतीति
वा श्वा आशुयायी शवतेर्वा स्याद्गतिकर्मणः श्वसितेर्वा सिंहः सहनाद्धिंसेर्वा स्याद्विपरीतस्य संपूर्वस्य वा
हंतेः संहाय हंतीति वा व्याघ्रो व्याघ्राणाद्व्यादाय हंतीति वा॥१८॥ अर्चतिकर्माण उत्तरे धातवश्चतुश्च

२५

त्वारिंशन्मेधाविनामान्युत्तराणि चतुर्विंशतिर्मेधावी कस्मान्मेधया तद्वान्भवति मेधा मतौ धीयते स्तो
तृनामान्युत्तराणि त्रयोदश स्तोता स्तवनाद्यज्ञनामान्युत्तराणि पंचदश यज्ञः कस्मात्प्रख्यातं यजति
कर्मेति नैरुक्ता याच्ञो भवतीति वा यजुरुन्नो भवतीति वा बहुकृष्णाजिन इत्यौपमन्यवो यजूंष्येनं न
यंतीति वर्त्विङ्नामान्युत्तराण्यष्टावृत्विक्कस्मादीरण ऋग्यष्टा भवतीति शाकपूणिरृतुयाजी भव
तीति वा याच्ञाकर्माण उत्तरे धातवः सप्तदश दानकर्माण उत्तरे धातवो दशाध्येषणाकर्माण उत्तरे
धातवश्चत्वारः स्वपिति सस्तीति द्वौ स्वपितिकर्माणौ कूपनामान्युत्तराणि चतुर्दश कूपः कस्मात्कुपानं
भवति कुप्यतेर्वा स्तेननामान्युत्तराणि चतुर्दशैव स्तेनः कस्मात्संस्त्यानमस्मिन्पापकमिति नैरुक्ता नि
र्णीतांतर्हितनामधेयान्युत्तराणि षण्निर्णीतं कस्मान्निर्णिक्तं भवति दूरनामान्युत्तराणि पंच दूरं क
स्माद्द्रुतं भवति दुरयं वा पुराणनामान्युत्तराणि षट् पुराणं कस्मात्पुरा नवं भवति नवनामान्युत्तराणि

नि॰ ३॰ ३

२६

पळ्ठेवनर्वकस्मादानीतं भवति॥१९॥ द्विरा उत्तराणि नामानि प्रपित्वेभीक इत्यासन्नस्य प्रपित्वे
प्राप्तेभीकेभ्यक्ते॥ आपित्वे नः प्रपित्वे तूयमागहि॥ अभीके चिदु लोककृदित्यपि निगमौ भवतो द
भ्रमर्भकमित्यल्पस्य दभ्रं दभ्नोतेः सुदंभं भवत्यर्भकमवहृतं भवति॥ उपोपमे परामृश मामे दभ्रा
णि मन्यथाः॥ नमो महद्भ्यो नमो अर्भकेभ्य इत्यपि निगमौ भवतस्तिरः सत इति प्राप्तस्य तिरस्तीर्णं
भवति सतः संसृतं भवति॥ तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या॥ पात्रेव भिंदन्सत एति रक्षस
इत्यपि निगमौ भवतस्त्वो नेम इत्यर्द्धस्य त्वोऽपततो नेमोऽपनीतोऽर्द्धं हरतेर्विपरीतछ्हारयते र्वा स्याद्उ
द्धृतं भवत्यृध्नोतेर्वा स्यादृद्धतमो विभागः॥ पीयति त्वो अनु त्वो गृणाति॥ नेमे देवा नेमे सुरा इत्य
पि निगमौ भवत ऋक्षास्तृभिरिति नक्षत्राणां नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि क्षत्राणीति च
ब्राह्मणं ऋक्षा उदीर्णानीव ख्यायंते स्तृभिस्तीर्णानीव ख्यायंते॥ अमी य ऋक्षा निहितास उच्चा॥

२६

पश्यंतो द्यामिव स्तृभिरित्यपि निगमौ भवतो वम्रीभिरुपजिह्विका इति सीमिकानां वम्र्यो व
मनात्सीमिकास्यमनादुपजिह्विका उपजिघ्र्यः॥ वम्रीभिः पुत्रमग्रुवो अदानं॥ य इदुपजिह्वि
का य दुम्रो अतिसर्पतीत्यपि निगमौ भवतस्तुर्दरं कुदरमित्यावपनस्योर्दरमुद्दीर्णं भवत्यूर्जे दी
र्णं वा॥ तमूर्दरं न पृणता यवेनेत्यपि निगमो भवति तमूर्दरमिव पूरयति यवेन कुदरं कुत दर
भवति॥ समिद्धो अंजन्कृदरं मतीनामित्यपि निगमो भवति॥२०॥ रंभः पिनाकमिति दंडस्य॥
रंभ आरभंत एनं॥ आ त्वा रंभं न जिव्रयो ररभ्मेत्यपि निगमो भवत्या रभामहे त्वा जीर्णा इव दंडं पि
नाकं प्रतिपिनष्ट्येनेन कृत्तिवासाः पिनाकहस्तोऽवततधन्वेत्यपि निगमो भवति मेना ग्ना इति
स्त्रीणां स्त्रियः स्त्यायतेरपत्रपणकर्मणो मेना मानयंत्येना ग्ना गच्छंत्येनाः॥ अमेनांश्चिज्जनिव
तश्चकर्थ॥ ग्नास्त्वाकृंतन्नपसोतन्वतेत्यपि निगमौ भवतः शेपो वैतस इति पुंस्प्रजननस्य शे

नि॰ पू॰ ३

२७

पः आपतेः स्यन्दतिकर्मणो वेतसो वितस्तं भवति ॥ यस्यामुष्यं तः प्रहरामुरो र्प ॥ त्रिः स्म माह्नः श्नथ
यो वेतसेनेत्यपि निगमो भवतो येनेदृत्सु पदेनास्य ॥ अयाते अग्ने समिधा विधेमेतिस्त्रियाः ॥
एनावो अग्निमितिनपुंसकस्य ॥ एनापत्या तन्वं संसृजस्वेति पुंसः ॥ सिषक्तु सचत इति सेवमान
स्य ॥ स नः सिषक्तु यस्तुरः ॥ स नः सेवतां यस्तुरः ॥ सचस्वा नः स्वस्तये ॥ सेवस्व नः स्वस्तये ॥ स्वस्तीत्य
विनाशिनामास्तिरभिपूजितः स्वस्तीति भ्यसते रेजत इति भयवेपनयोः ॥ यस्य शुष्माद्रोदसी अभ्य
सेतां ॥ रेजते अग्ने पृथिवी मखेभ्य इत्यपि निगमो भवतो द्यावापृथिवी नामधेयान्युत्तराणि चतुर्विंश
तिस्तयोरेषा भवति ॥ २१ ॥ कतरा पूर्वा कतरा परायोः कथा जाते कवयः को वि वेद ॥ विश्वं त्मना बिभृ
तो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥ कतरा पूर्वा कतरा परैनयोः कथं जाते कवयः क एने वि
जानाति सर्वमात्मना बिभृतो यद्धैनयोः कर्म वि वर्तेते चैनयोरहनी अहोरात्रे चक्रयुक्ते इवेति द्यावा

पृथिव्योर्महिमानमाचष्ट आचष्टे ॥ २२ ॥ ॥ कर्म नामानि परिषद्यं नहि अरणायस्यासदृद्भिरण्याते वनजाम
ये मनुष्यनामानि तद्यद्रुपावनिर्ष्योभादं त्वया वयं यत्रो स्पुपर्णा बहूनामानि तनूत्यजेव तु कृहस्विद्वस्तु र
श्विस्त्रियमेधव द्थलु स्तोपमान्यर्चेति द्विस्त्रोरंभः कतरा पूर्वाद्वाविंशतिः ॥ ॥ इति निरुक्ते पूर्वषट्के तृतीयो
ध्यायः ॥ ॥ ॐ ॥ ॥ एकार्थमनेकशब्दमित्येतदुक्तमथ यान्यनेकार्थान्येकशब्दानि तान्यतोऽनुक्रमिष्या
मोऽनवगतसंस्कारांश्च निगमांस्तदैकपदिकमित्याचक्षते जहा जघानेत्यर्थः ॥ १ ॥ को नु मर्या अमिथि
तः सखा सखायमब्रवीत् ॥ जहा को अस्मदीषते ॥ मर्या इति मनुष्यनाम मर्यादाभिधानं वा स्यान्मर्यादा
मर्यैरादीयते मर्यादा मर्यादिनोर्विभागो मेथतिराक्रोशकर्मा पापकं जघान कमहं जातु कोऽस्मद्भीतः पला
यते निधा पाश्या भवति यन्निधीयते पाश्या पाशसमूहः पाशः पाशयतेर्विपाशनात् ॥ २ ॥ वयः सुपर्णा उप
सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ॥ अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य स्मान्निधयेव बद्धान् ॥

नि॰पू॰४

२८

वयो वेर्बहुवचनं सुपर्णाः सुपतना आदित्यरश्मय उपसेदुरिन्द्रं याचमाना अपोर्णुह्याध्वस्तं चक्षुः चक्षुः
ख्यातेर्वा चष्टेर्वा पूर्द्धि पूरय देहीति वा मुञ्चास्मान्पाशेनेव बद्धान्पार्श्वतः श्रोणितः शितामतः पार्श्वं प
र्शुमयमंगं भवति पर्शुः स्पृशतेः संस्पृष्टा पृष्ठदेशं पृष्ठं स्पृशतेः संस्पृष्टमंगैरंगमंगनादंचनाद्वा श्रोणिः
श्रोणतेर्गतिचलाकर्मणः श्रोणिश्चलतीव गच्छतो दोः शितामभवति दोर्द्रवतेर्योनिः शितामेति शाकपूणि
र्विषितो भवति श्यामतो यकृत इति तैटीकिः श्यामं श्यायतेर्यकृद्यथा कथा च कृत्यते शितिमांसतो मेद
स्त इति गालवः शितिः श्यतेर्मांसं माननं वा मानसं वा मनो ऽस्मिन्सीदतीति वा मेदो मेद्यतेः ॥ ३ ॥ यदिंद्र चि
त्रमेह नास्ति त्वादातमद्रिवः । राधस्तन्नो विदद्वस उभयाहस्त्याभर ॥ यदिंद्र चित्रं चायनीयं मंहनीयं ध

२८

नमस्ति यन्म इह नास्तीति वा त्रीणि मध्यमानि पदानि त्वया नस्तद्दातव्यमद्रिवन्नद्रिर्णाः तेनेनापि वा तेः स्या
त्तेसोमाद इति ह विज्ञायते राध इति धननाम राध्नुवन्त्यनेन तन्नस्त्वं वित्तधनोभाभ्यां हस्ताभ्यामाहरोभौ स

राद्ध

मुञ्चो भवतो दमूनाः दममना वा दानमना वा दांतमना वापि वा दम इति गृहनाम तन्मनाः स्यान्मनो मनोतेः ॥ ४ ॥ जु
ष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान् । विश्वा अग्ने अभियुजो विहत्या शत्रूयतामाभरा भोज
नानि ॥ अतिथिरभ्यतितो गृहान्भवत्यभ्येति तिथिषु परकुलानीति वा परगृहाणीति वा दुरोण इति गृहनाम दुर
वा भवति दुस्तर्पा इमं नो यज्ञमुपयाहि विद्वान्सर्वा अग्ने अभियुजो विहत्य शत्रूयतामाभर भोजनानि नि
हत्यान्येषां बलानि शत्रूणां भवनाद्वाहर भोजनानीति वा धनानीति वा मूषो मूषिका इत्यर्थो मूषिकाः पु
नर्मुष्णातेर्मूषो ऽप्येतस्मादेव ॥ ५ ॥ सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ॥ मूषो न शिश्ना व्यदंति माध्यः स्तो
तारं ते शतक्रतो वित्तं मे अस्य रोदसी ॥ संतपंति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवो मूषिका इवा
स्नातानि सूत्राणि व्यदंति स्वांगाभिधानं वा स्यात् शिश्नानि व्यदंतीति वा संतपंति माध्यः कामाः स्तोतारं ते शतक्र
तो वित्तं मे अस्य रोदसी ॥ जानीतं मे ऽस्य द्यावापृथिव्याविति त्रितं कूपे ऽवहितमेतत्सूक्तं प्रति बभौ तत्र ब्रह्मेति

नि॰पू॰४

२९

हासभिश्रमद्रू॰मिश्रंगाथाभिश्रंभवतित्रितस्तीर्णतमोमेधयाबभूवापिवासंख्यानामैवाभिप्रेतंस्या
देकतोद्वितस्त्रितइतित्रयोबभूवुः॥६॥इषिरेणतेमनसासुतस्यभक्षीमहिपित्र्यस्येवरायः॥सोमराजन्प्र
णआयूंषितारीरहानीवसूर्योवासराणि॥इषिरेणेवैषणेनवार्षणेनवातेनमनसासुतस्यभक्षीमहिपि
त्र्यस्येवधनस्यप्रवर्द्धयचनआयूंषिसोमराजन्॥अहानीवसूर्योवासराणि॥वासराणिवेसराणिविवास
नानिगमनानीतिवाकुरुतनेस्यनर्थकाउपजनाभवंतिकर्त्तनहंतनयातनेतिजठरमुदरंभवतिजग्धम
स्मिन्ध्रियतेधीयतेवा॥७॥मरुत्वाँइंद्रवृषभोरणायपिबासोममनुष्वधंमदाय॥आसिंचस्वजठरेम
ध्वऊर्मिंत्वंराजासिप्रदिवःसुतानाम्॥मरुत्वानिंद्रमरुद्भिस्तद्वान्वृषभोवर्षितापांरणायरमणीयायसंग्रा
मायपिबसोममनुष्वधमन्वन्नंमदायमदनीयायजैत्रायासिंचस्वजठरेमधुनऊर्मिंमधुसोममित्यौप
मिकंमाद्यतेरिदमपीतरन्मध्वेतस्मादेवत्वंराजासिपूर्वेष्वहःसुसुतानाम्॥८॥तितउपरिपवनंभवति

२९

प्प

शे

ततवद्वातुन्नवद्वातिलमात्रतुन्नमितिवा॥९॥सक्तुमिवतितउनापुनंतोयत्रधीरामनसावाचमक्रत॥
अत्रासखायःसख्यानिजानतेभद्रैषांलक्ष्मीर्निहिताधिवाचि॥सक्तुमिवपरिपवनेनपुनंतःसक्तुःस
चतेर्दुर्धावोभवतिकसतेर्वास्याद्विपरीतस्यविकसितोभवतियत्रधीरामनसावाचमकृषतप्रज्ञानंधीराःप्र
ज्ञानवंतोध्यानवंतस्तत्रसखायःसख्यानिसंजानतेभद्रैषांलक्ष्मीर्निहिताधिवाचीतिभद्रंभगेनव्याख्या
तंभजनीयंभूतानामभिद्रवणीयंभवद्रमयतीतिवाभाजनवद्वालक्ष्मीर्लाभाद्वालक्षणाद्वालप्स्यनाद्वा
लांछनाद्वालषतेर्वास्याच्छ्लेषाकर्मणोलग्यतेर्वास्याद्श्लेषकर्मणोलज्जतेर्वास्यादश्लाघाकर्मणः
शिप्रेऽदूत्सुपरिष्टाद्व्याख्यास्यामः॥१०॥तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्विततंसंजभार॥यदेद
युक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै॥तत्सूर्यस्यदेवत्वंतन्महित्वंमध्येयत्कर्मणांक्रिय
माणानांविततंसंक्रियतेयदासावयुंक्तहरणानादित्यरश्मीन्हरितोश्वानितिवाथरात्रीवासस्तनुतेसि

व

नै रु-४

३०

मस्मैवेसरमहरवश्चवतीसर्वस्मादपिवोपमार्थेस्याद्रात्रीववासस्तनुतइतितथापिनिगमोभवति॥
पुनःसमव्युह्नितत्तंवयंती॥समनात्सीत्॥११॥इंद्रेणसंहिदृक्षसेसंजग्मानोअबिभ्युषा॥मंदूसमा
नवर्चसा॥इंद्रेणहिसंदृश्यसेसंगच्छमानोबिभ्युषागणेनमंदूमदिष्णूयुवांस्थोपिवामंदुनातेने
तिस्यात्समानवर्चसेत्येतेनव्याख्यातं॥१२॥ईर्मांतासःसिलिकमध्यमासःसंशूरणासोदिव्यासो
अत्याः॥हंसाइवश्रेणिशोयतंतेयदाक्षिषुर्दिव्यमज्ममश्वाः॥ईर्मांताःसमीरितांताःस्कसमीरि
तांताःपृथ्वंतावासिलिकमध्यमाःसंसृतमध्यमाःशीर्षमध्यमावापिवाशिरआदित्योभवतिय
दनुशेतेसर्वाणिभूतानिमध्येचैषांतिष्ठतीदमपीतरच्छिरएतस्मादेवसमाश्रितान्येतदिंद्रियाणि
भवंति॥संशूरणासोदिव्यासोअत्याः॥शूरःशवतेर्गतिकर्मणोदिव्यादिविजाअत्याअतनाः॥हंसा
इवश्रेणिशोयतंते॥हंसाहंतेर्घ्नंत्यध्वानंश्रेणिशइतिश्रेणिःश्रयतेःसमाश्रिताभवंतियदाक्षिषुर्य

३०

दापर्दिव्यमज्ममजनिमाजिमश्वाअस्त्यादित्यस्तुतिरश्वस्यादित्यादश्वोनिस्तष्टइति॥सूरादश्वंवस
वोनिरतष्टेत्यपिनिगमोभवति॥१३॥कायमानोवुनात्वंयन्मातृरजगन्नपः॥नतत्तेअग्नेप्रमृषेनिव
र्तनंयद्दूरेसन्निहाभवः॥कायमानश्चायमानःकामयमानइतिवावनानित्वंयन्मातृरपोगमउपशा
म्यंनतत्तेअग्नेप्रमृष्यतेनिवर्तनंदूरेयत्संनिहभवसिजायमानः॥लोधंनयंतिपशुमन्यमानाः॥लुब्धमृ
षिंनयंतिपशुंमन्यमानाः॥शीरंपावकशोचिषं॥पावकदीप्तिं॥अनुशायिनमितिवाशिनमितिवा॥
॥१४॥कनीनकेवविद्रधेनवेद्रुपदेअर्भके॥बभ्रूयामेषुशोभेते॥कनीनकेकन्यकेकन्याकमनीयाभ
वतिक्वेयंनेतव्येतिवाकमनेनानीयतइतिवाकनतेर्वास्यात्कांतिकर्मणः॥कन्ययोरधिष्ठानप्रवचनानि
सप्तम्याएकवचनानीतिशाकपूणिर्विद्रधयोर्दारुरूपाद्योर्दारुद्रणातेर्वाद्रूणातेर्वातस्मादेवद्रुनवेनवजातेअ
र्भकेअवृद्धेतेयथातदधिष्ठानेषुशोभेतेएवंबभ्रूयामेषुशोभेतेबभ्र्वोरश्मयोःसंस्तवइदंचमेदादिदंचमे

नि॰दृ॰४

३१

दादित्यरश्मिः प्रसंख्यायाह॥ स्रुवास्त्वा अधितुग्वनि॥ स्रुवास्तुर्नदीतुग्वतार्थं भवति तुग्मेतदायंति॥ कुविं
नंसंते मरुतः पुनर्नः॥ पुनर्नो नमंते मरुतो न संतइ ऋपरिशिष्टा व्याख्यास्यामः॥ येतेमदा आहनसो
विहायसस्तेभिरिंद्रं चोदय दातवे मघं॥ येतेमदा आहननवंतो वचनवंतस्तेभिरिंद्रं चोदय दानाय म
घं॥१५॥ उपो अदर्शि शुंध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि॥ अद्मसन्न ससतो बोधयंती शश्व
त्तमागात्पुनरेयुषीणां॥ उपादर्शि शुंध्युवः शुंध्युरादित्यो भवति शोधनात्तस्यैव वक्षो भासोध्यूढं
मिदमपीतरद्वक्ष एतस्मादेवाध्यूढं काये शकुनिरपि शुंध्युरुच्यते शोधनादेवोदकचरो भवत्यापो
पि शुंध्युव उच्यंते शोधनादेव नोधा ऋषिर्भवति नवनं दधाति स यथा स्तुत्या कामानाविष्कुरुत एव
मुषा रूपाण्याविष्कुरुते अद्मसद् अद्मान्नं भवत्यद्मसादिनीति वान्नसानिनीति वा॥ ससतो बोधयंती
शश्वत्तमागात्पुनरेयुषीणां॥ स्वपतो बोधयंती शाश्वतिकतमागात्पुनरागामिनीनां॥ तेवा स्त्रीमंत

३१

इष्मिणः॥ ईषणिन इति वैषणिन इति वार्षणिन इति वा वाशीति वाङ्नाम वाश्यत इति सत्याः॥ शंसा
वाध्वर्यो प्रति मे गृणीहींद्राय वाहः कृणवाव जुष्टं॥ अभिवहन स्तुतिमधिषवणप्रवादा स्तुतिं मन्यं
त ऐंद्री त्वेव शस्यते परितक्म्ये ऋपरिशिष्टा व्याख्यास्यामः॥१६॥ स्रुविते स्रु इते सूते स्रुगते प्रज्ञाया मि
ति वा॥ स्रुविते माधा इत्यपि निगमो भवति दयतिरनेककर्मा॥ नवेन पूर्वं दयमानाः स्याम इत्युपदयाकर्मा॥
य एक इद्विदयते वसु इति दानकर्मा वा विभागकर्मा वा॥ दुर्वर्तुर्भीमो दयते वनानीति कर्मा दुर्वर्तुर्दुर्वारः॥ दहति
विदहः दयमानो विशात्रूनिति हिंसाकर्मा॥ इमे स्रुता इंदवः प्रातरित्वना सजोषसा पिबतमश्विना तान्॥
अयं हि वामूतये वंदनाय मां वायसो दोषा दयमानो अबूबुधत्॥ दयमान इति॥ नूचिदिति निपातः पु
राणनवयोर्नूचेति च॥ अद्याचिन्नू चित्तदपो नदीनां॥ अद्य च पुरा च तदेव कर्म नदीनां॥ नूच पुरा च
सदनं रयीणां॥ अद्य च पुरा च सदनं रयीणां रयिरिति धननाम रातेर्दानकर्मणः॥१७॥ विद्यामृतस्य

नि॰पू॰४ | ३२ | क्र

ते वयमकूपारस्य दावने॥ विद्याम तस्य ते वयमकूपरणस्य दानस्यादित्योऽप्यकूपार उच्यते अकूपारो भवति दूरपारः समुद्रोऽप्यकूपार उच्यते अकूपारो भवति महापारः कच्छपोऽप्यकूपार उच्यते अकूपारो न कूपमृच्छतीति कच्छपः कच्छं पाति कच्छेन पातीति वा कच्छेन पिबतीति वा कच्छः खच्छः खच्छदोऽयमपीतरो नदीकच्छ एतस्मादेव कमुदकं तेन छाद्यते॥ शिशीते शृङ्गे रक्षसे विनिक्षे॥ निशिशीते शृङ्गे रक्षसो विनिक्षणाय रक्षो रक्षितव्यमस्माद्रहसि क्षणोतीति वा रात्रौ नक्षत इति वा॥ अग्निः क्रतुकः क्रतुकैभिरन्दैः॥ क्रतुकनः क्रतुकनैरिति वा क्रमजाः प्रजोभिरिति वा॥१८॥ देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे॥ देवा नो यथा सदा वर्धनाय स्युरप्रायुवोऽप्रमाद्यन्तो रक्षितारश्चाहन्यहनि च्यवन ऋषिर्भवति च्यावयिता स्तोमानां च्यवनमित्यप्यस्य निगमा भवन्ति॥ युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः॥ युवं च्यवानं सनयं पुराणं यथा रथं पुनर्युवानं चरणा

क्रमाणा असिन्युञ्जे विश्रयन्तो॥ क्र प्रगमनाः॥

प | ३२

यतत क्षथुर्युवा प्रयोति कर्माणि तक्षतिः करोति कर्मा रजो रजतेर्ज्योती रज उच्यत उदकं रज उच्यते लोका रजांस्युच्यन्ते असृगहनी रजसी उच्येते॥ रजांसि चित्रा विचरन्ति तन्यव इत्यपि निगमो भवति हरो हरतेर्ज्योतिर्हर उच्यत उदकं हर उच्यते लोका हरांस्युच्यन्ते असृगहनी हरसी उच्येते॥ प्रत्यग्ने हरसा हरः शृणीहीत्यपि निगमो भवति॥ जुहुरे विचितयन्तः॥ जुहुरे विचेतयमाना व्यन्त इत्येषोऽपि देवस्य नमसा व्यन्त इति पश्यति कर्मा वीहि शूर पुरोळाशमिति खादति कर्मा वीतं पातं पयस उस्रियायाः॥ अश्नीतं पिबतं पयस उस्रियाया उस्रियेति गोनामोत्स्राविणोऽस्यां भोगा उस्रेति च॥ त्वामिद्भुतिभिः क्रतेसुनीथासो वसूयवः॥ गोभिः क्राणा अभ्यर्षत गोभिः कुर्वाणा अभ्यर्षत॥ आ त्वा विंच हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः॥ आसिंच हरिं द्रोरुपस्थे द्रुममयस्य हरिः सोमो हरितवर्णो यमपीतरो हरिरेतस्मादेव वाशीभिस्तक्षताश्मन्मयीभिः॥ वाशीभिरश्ममयीभिरिति वा वाग्भिरि

नेककर्मा

नि॰पू॰४

२२

ति वा ॥ स शर्द्धदर्यो विषुणस्य जंतोर्मा शिश्नदेवा अपि गुर्ऋतं नः ॥ स उत्सहतां यो विषुणस्य जंतोर्विषमस्य मा शिश्नदेवा अब्रह्मचर्याः शिश्नं श्नथते ॥ अपि गुर्ऋतं नः ॥ सत्यं वा यज्ञं वा ॥ ॥१९॥ आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि ॥ उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥ आगमिष्यंति तान्युत्तराणि युगानि यत्र जामयः करिष्यंत्यजामिकर्माणि जाम्यतिरेकनाम बालिशस्य वा समानजातीयस्य वोपजन उपधेहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मदिति व्याख्यातं ॥२०॥ द्यौर्मे पिता जनिता नाभिरत्र बंधुर्मे माता पृथिवी महीयं ॥ उत्तानयोश्चम्वो३र्योनिरंतरत्रा पिता दुहितुर्गर्भमाधात् ॥ द्यौर्मे पिता पाता वा पालयिता वा जनयिता नाभिरत्र बंधुर्मे माता पृथिवी महतीयं बंधुः संबंधनान्नाभिः सन्नहनान्नाभ्या सन्नद्धा गर्भा जायंत इत्याहुरेतस्मादेव ज्ञातीन्सनाभय इत्याचक्षते सबंधव इति च ज्ञातिः संज्ञानात् ॥ उत्तानयो

२२

श्चम्वो३र्योनिरंतः ॥ उत्तान उत्ततान ऊर्ध्वतानो वा तत्र पिता दुहितुर्गर्भं दधाति पर्जन्यः पृथिव्याः शंयुः सुखयुः ॥ अथा नः शंयोररपो दधात ॥ रपो रिप्रमिति पापनामनी भवतः शमनं च रोगाणां यावनं च भयानामथापि शंयुर्बार्हस्पत्य उच्यते ॥ तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतय इत्यपि निगमो भवति गमनं यज्ञाय गमनं यज्ञपतये ॥२१॥ अदितिरदीना देवमाता ॥२२॥ अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः ॥ विश्वे देवा अदितिः पंचजना अदितिर्जातमदितिर्जनित्वं ॥ इत्यदितेर्विभूतिमाचष्ट एनान्यदीनानीति वा ॥ यमेरिरे भृगवः ॥ एरिर इतीर्तिरुपसृष्टोऽभ्यस्तः ॥२३॥ उत स्मैनं वस्त्रमथिं न तायुमनु क्रोशंति क्षितयो भरेषु ॥ नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथं ॥ अपि स्मैनं वस्त्रमथिमिव वस्त्रमाथिनं वस्त्रं वस्तेस्तायुरिति स्तेननाम संस्त्यानमस्मिन्पापकमिति नैरुक्ताः स्तस्यतेर्वा स्यादनुक्रोशंति क्षितयः संग्रामेषु भर इति संग्रामनाम भरतेर्वा हरतेर्वा नीचायमानं नीचैरयमानं नीचैर्नि

नि॰पू॰४ चितं भवत्युच्छ्रेरुच्छ्रितं भवति अस्तमिव स्येनं स्येनः शंसनीयं गच्छति॥ अव्यथां गोपश्शमच्छ्वयू॥र्थं॥ अवश्यापिप श्शमच्छ्वयूर्थं प्रत्नं सांचयूर्थं चध्नं चयूथं चेति वा यूथं योतेः समायुतं भवति॥ इंधानं एनं जरते स्वाधीः॥ गृणाति॥ मंदीमंदतेस्तुतिकर्मणः॥ प्रमंदिनेपितुमदर्चतावचः॥ अर्चतमंदिने पितुमद्वचो गो व्याख्यातः॥२४॥ अत्रा हगो रमन्वत नाम त्वष्टुरपीच्यं॥ इत्था चंद्रमसो गृहे॥ अत्र ह गोः समनंसत आदित्यरश्मयः स्वं नामापीच्यमपगत मपचितमपिहितमंतर्हितं वा अमुत्र चंद्रमसो गृहे गातुर्व्याख्यातो गातुं कृणवन्नुषसो जनायेत्यपि निगमो भ वति दंसयः कर्माणि दंसयंत्येनानि॥ कुत्साय मन्मन्नह्यश्च दंसयः इत्यपि निगमो भवति॥ सतूताव नैनमश्नोत्यंहतिः॥ स तु तावनेन नमंहतिरश्नोत्यंहतिश्चांहश्चांहुश्च हंतेर्निरूढोपधाद्विपरीतात्॥ बृहस्पते चयमस इ सियोरुः॥ बृहस्पते यज्वा तयसि देव पापं पापयति हिंसाकर्मा वियुते द्यावापृथिव्यौ वियवनात्॥ समान्यावि युते दूरे अंते॥ समानं संमानमात्रं भवति मात्रा मानाद्दूरं व्याख्यातमंतो ततेः ऋधगिति पृथग्भावस्य प्रव

३४

३४

चनं भवत्यथाप्यृध्नोत्यर्थे दृश्यते॥ ऋधगया ऋधगुताशमिष्ठाः॥ ऋध्नुवन्नयाक्षीः ऋध्नुवन्नशमि ष्ठा इति वास्या इति चास्येति चोदात्तं प्रथमादेशे अनुदात्तमन्वादेशे तीव्रार्थतरमुदात्तमल्पीयोर्थत रमनुदात्तं॥ अस्या ऊ षु ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व श्रवस्यतामजाश्व॥ अस्यै नः सा तम उपभवाहेळमानोऽक्रुध्यन्ररिवान्रातिरभ्यस्तोजाश्वेति पूषणमाहाजाश्वाजा अजना अथा नुदात्तं॥ दीर्घायुरस्या यः पतिर्जीवाति शरदः शतं॥ दीर्घायुरस्या यः पतिर्जीवतु स शरदः शतं शरद्छृता अस्यामोषधयो भवंति शीर्णा आप इति वास्येत्यस्या इत्येतेन व्याख्यातं॥२५॥ अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः॥ तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रं॥ अस्य वामस्य वननीयस्य पलितस्य पालयितुर्होतुर्ह्वातव्यस्य तस्य भ्राता म ध्यमोस्त्यशनो भ्राता भरतेर्हरतिकर्मणो हरते भागं भर्तव्यो भवतीति वा तृतीयो भ्राता घृतपृष्ठो

स्यायमग्निस्त्रआप्त्यं सर्वस्य पातारं वा पालयितारं वा विश्पतिं सप्तपुत्रं सप्तमपुत्रं सर्पणपुत्रमि
ति वा सप्तसृप्ता संख्या सप्तादित्यरश्मय इति वदंति ॥२६॥ सप्त युंजंति रथमेकचक्रमेको अश्वो वह
ति सप्तनामा ॥ त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥ सप्त युंजंति रथमेकचक्रमे
कचारिणं चक्रं चकतेर्वा चरतेर्वा क्रामतेर्वा एकोऽश्वो वहति सप्तनामादित्यः सप्तास्मै रश्मयो रसान
भिसंनामयंति सप्तैनमृषयः स्तुवंतीति वेदमपीतरन्नामैतस्मादेवाभिसंन्नामात्संवत्सरप्रधान उत्त
रोऽर्द्धर्चस्त्रिनाभि चक्रं त्र्यृतुः संवत्सरो ग्रीष्मो वर्षा हेमंत इति संवत्सरः संवसंतेऽस्मिन्भूतानि ग्रीष्मो
ग्रस्यंतेऽस्मिन्रसा वर्षा वर्षत्यासु पर्जन्यो हेमंतो हिमवान्हिमं पुनर्हंतेर्वा हिनोतेर्वाजरमजरणधर्मा
णमनर्वमप्रत्यृतमन्यस्मिन्यत्रेमानि सर्वाणि भूतान्यभिसंतिष्ठंते तं संवत्सरं सर्वमात्राभिः स्तौ
ति पंचारे चक्रे परिवर्तमान इति पंचर्तुतया पंचर्तवः संवत्सरस्येति च ब्राह्मणं हेमंतशिशिरयोः स

मासेन षडर आहुरर्पितमिति षडृतुतया अराः प्रत्यृता नाभौ षट् पुनः सहतेः ॥ द्वादशारं नहि तज्ज
राय ॥ द्वादशप्रधयश्चक्रमेकमिति मासानां मासा मानात्प्रधिः प्रहितो भवति ॥ तस्मिन्त्साकं त्रि
शता न शंकवोऽर्पिताः षष्टिर्न चलाचलासः ॥ षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति
च ब्राह्मणं समासेन ॥ सप्त शतानि विंशतिश्च तस्थुः ॥ सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरा
त्रा इति च ब्राह्मणं विभागेन विभागेन ॥२७॥ ॥ एकार्थको नुवयः सुपर्णा यदिंद्रजुष्टो दमूनाः सं
मातपंती त्रिरेण मरुत्वान्नित उत्सं कुमिवु नत्सूर्यस्येंद्रेण समीर्मीता सः कायमानः कनीनके वो पोऽअ
दर्शि स्कविते विद्याम देवान आघृणो मे दितिरादितिस्ततस्मात्राहास्य वामस्य सप्त युंजंति सप्तविंशतिः॥
॥ ॥ इति निरुक्ते पूर्वषट्के चतुर्थोऽध्यायः॥ ॥ॐ॥ ॥ सास्निमविंदच्चरणे नदीनां॥ संस्नातमेघं॥
वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा ॥ वोळ्हतमो क्षानानां स्तोमो दूतो हुवन्नरौ नरा मनुष्यान्नयंति

नि॰पू॰५

३६

कर्मस्कंदूतोजवतेर्वाद्रवतेर्वावारयतेर्वा॥दूतोदेवानामसिमर्त्यानामित्यपिनिगमोभवतिवा
वशानोवष्टेर्वावाश्यतेर्वा॥सप्तस्वसॄररुषीर्वावशानइत्यपिनिगमोभवतिवार्यंवृणोतेरथा
पिवरतमं॥तद्वार्यंवृणीमहेवरिष्ठंगोपुयत्यं॥तद्वार्यंवृणीमहेवर्षिष्ठंगोपायितव्यंगोपायि
तारोयूयंस्थयुष्मभ्यमितिवांधइत्यन्ननामाध्यानीयंभवति॥आमंत्रेभिःसिंचतामद्य
मंधः॥आसिंचतामंत्रैर्मदनीयमंधोमत्रंपात्रंममाअस्मिन्नदंत्यमापुनरनिर्मितंभवति
पात्रंपानात्तमोप्यंधउच्यतेनास्मिन्ध्यानंभवतिनदर्शनमंधंतमइत्यभिभाषंतेयमपीतरोंध
एतस्मादेव॥पश्यदक्षण्वान्नविचेतदंधइत्यपिनिगमोभवति॥१॥असश्वंतीभूरिधारेपयस्व
ती॥असज्यमानेइतिवाव्युदस्यंत्यावितिवाबहुधारेउदकवत्यौवनुष्यतिर्हंतिकर्मानवगत
संस्कारोभवति॥वनुयामवनुष्यतइत्यपिनिगमोभवति॥दुर्धर्षप्रयज्युमतियोवनुष्यतिवुयंज

३६

येमपृतनासुदूढ्यं॥दीर्घप्रततनमहमाभिजिघांसतियोवयंतंजयेमपृतनासुदूढ्यंदुर्धियंपा
पधियंपापःपातापेयानांपापस्समानोवाऽवपततीतिवापापत्यतेर्वास्योत्तरुष्यतिरप्येवंकर्मा॥इंद्रेण
युजातरुषेमवृत्रमित्यपिनिगमोभवतिभंदनाभंदतेस्स्तुतिकर्मणः॥पुरुप्रियोभंदतेधामभिःकवि
रित्यपिनिगमोभवति॥सभंदनाउदियर्तिप्रजावतीरितिच॥अन्येनमदाहनोयाहिसूयं॥अन्ये
नमदहनोगच्छक्षिप्रमाहंसीवभाषमाणेत्यसभ्यभाषणादाहनाइवभवंस्येतस्मादाहनस्यादाहविर्न
दोभवतिनदतेस्स्तुतिकर्मणः॥नुदस्यमारुधतःकामआगन्॥नदनस्यमारुधतःकामआगमत्
संरुद्धप्रजननस्यब्रह्मचारिणइत्यृषिपुत्र्याविलपितंवेदयंते॥२॥नयस्यद्यावापृथिवीनधन्वनां
तरिक्षंनाद्रयःसोमोअक्षाः॥अक्षोतेरित्येके॥अन्नूपेगोमान्गोभिरक्षाःसोमोदुग्धाभिरक्षाः॥लो
पाशाःसिंहंप्रत्यंचमत्साः॥क्षियतिनिगमःपूर्वःक्षरतिनिगमउत्तरइत्येकेन्नूपेगोमान्गोभिर्यदाक्षि

नि॰ दू॰ ५.

३७

पत्यथ सोमो दुग्धाभ्यः क्षरति सर्वे क्षियति निगमा इत्थि शाकपूणिः आत्ममिति क्षिप्रनाम आशु अशनं भवति॥
सप्तत्रीत्वरं स्था जगद् घ्रुत्रमग्निररुणो जातवेदाः॥ सप्तत्रि वेत्वरं स्थावरं जंगमं च यत्तत्क्षिप्रमग्निरक
रोज्जातवेदा उतिरवनात॥ आतारथं यथोत य इत्यपि निगमो भवति हासमाने इत्युपरिष्टाद्व्याख्यास्यामो वु
त्रकः पद्रु रूपसर्पदिद्रं॥ पानेरिति वास्यान्नैरिति वास्यन्नैरिति वा॥ सुसंनपुक्कमविदछुचंतं॥ स्वपनमे
तन्माध्यमिकं ज्योतिरनित्यदर्शनं तद्दिवाविदज्जाज्वल्यमाने॥ द्रुतावसत्तो स्वधया च शंभुः॥ द्वैधं सत्ता
मध्यमे च स्थान उत्तमे च शंभुः स्फरवत्र्त॥ मृगं न भ्रा मृगयंते॥ मृगमिव व्रात्याः प्रेषाः॥ ३॥ वराहो मेघो भ
वति वराहारः॥ विध्यद्वराहं तिरो अद्रिमस्ते त्यपि निगमो भवत्ययमपीतरो वराह एतस्मादेव वरमाहारमा
हार्षीरिति च ब्राह्मणं वृहति मूलानि वरं वरं मूलं वृहतीति वा॥ वराहमिंद्र एमुषमित्यपि निगमो भवत्यं
गिरसोपि वराहा उच्यंते॥ ब्रह्मणस्पतिर्वृषभिर्वराहैः॥ अथाप्येते माध्यमका देवगणा वराहव उच्यंते॥

३७

ष

पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतो वराहून्॥ स्वसराण्यहानि भवंति स्वयं सारीण्यपि वा स्वरा
दित्यो भवति स एनानि सारयति॥ उस्रा इव स्वसराणी त्यपि निगमो भवति शर्या अंगुलयो भवंति शर्या
इषवः शरमय्यः शरः श्रणातेः॥ शर्याभिर्न भरमाणो गभस्त्यो रित्यपि निगमो भवत्यर्को देवो भवति यदे
नमर्चंत्यर्को मंत्रो भवति यदनेनार्चंत्यर्कमन्नं भवत्यर्चति भूतान्यर्को वृक्षो भवति संवृत्तः कटुकिम्ना॥ ४॥
गायंति त्वा गायत्रिणोर्चंत्यर्कमर्किणः॥ ब्रह्माणस्त्वा शतक्रतउद्वंशमिव येमिरे॥ गायंति त्वा गायत्रिणः
प्रार्चंति ते अर्कमर्किणो ब्राह्मणास्त्वा शतक्रतउद्येमिरे वंशमिव वंशो वनशयो भवति वननाच्छ्रूयत इति वा पवी
रथनेमिर्भवति यद्विपुनाति भूमिं॥ उत पव्या रथानामद्रिं भिंदंत्योजसा॥ तं मरुतः क्षुरपविना व्ययुरित्य
पि निगमो भवति वक्षो व्याख्यातं धन्वांतरिक्षं धन्वंत्यस्मादापस्तिरो धन्वातिरोचत इत्यपि निगमो भवति
सिनमन्नं भवति सिनाति भूतानि॥ येन स्मा सिनं भरथः सखिभ्य इत्यपि निगमो भवतीत्थामुथेत्येतेन व्या

ष

नि·पू·५

३८

ख्यातः सचा सहेत्यर्थः॥ वसुभिः सचा भुवः॥ वसुभिः सह भुवः॥ चिदिति निपातोऽनुदात्तः पुरस्तादेव व्या
ख्यातोऽथापि पशुनामेह भवत्युदात्तः विचिदसि मनसा सिंचिता त्वं धियो गा इव तन्यसे इति वा॥ आ इत्याकार उ
पसर्गः पुरस्तादेव व्याख्यातोऽथाप्यध्यर्थे दृश्यते॥ अभ्र आँ अपः॥ अभ्रे आ अपः॥ अपोऽभ्रे अधीति द्युम्नं
द्योततेर्यशो वान्नं वा॥ अस्मे द्युम्नमधि रत्नं च धेहि॥ अस्मासु द्युम्नं च रत्नं च धेहि॥ ५॥ पवित्रं पुनातेर्मं
त्रः पवित्रमुच्यते॥ येन देवाः पवित्रेणात्मानं पुनते सदेत्यपि निगमो भवति रश्मयः पवित्रमुच्यंते॥ गभस्ति
पूतो नृभिरद्रिभिः सुत इत्यपि निगमो भवत्यापः पवित्रमुच्यंते॥ शतपवित्राः स्वधया मदंतीर्बहूदकाः॥
अग्निः पवित्रमुच्यते वायुः पवित्रमुच्यते सोमः पवित्रमुच्यते सूर्यः पवित्रमुच्यत इंद्रः पवित्रमुच्यते॥ अ
ग्निः पवित्रं स मा पुनातु वायुः सोमः सूर्य इंद्रः॥ पवित्रं ते मा पुनंत्वित्यपि निगमो भवति तोदस्तुद्यतेः॥ ६॥

३८

पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा॥ तोदस्येव शरण आ महस्य॥ बहु दाश्वांस्त्वामेवाभिह्वयाम्यरिरमित्रो
ऽतैरीश्वरोऽप्यरिरेतस्मादेव यदन्यदेवत्या अग्नावाहुतयो हूयंत इत्येतद्दृष्ट्वैवमवक्ष्यत्॥ तोदस्येव शरण आ
महस्य॥ तुदस्येव शरणेऽधि महतः स्वंचाः स्वंचनः॥ आ जुह्वानो घृतपृष्ठः स्वंचा इत्यपि निगमो भवति
शिपिविष्टो विष्णुरिति विष्णोर्द्वे नामनी भवतः कुत्सितार्थीयं पूर्वं भवतीत्यौपमन्यवः॥ ७॥ किमित्ते विष्णो प
रिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि॥ मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ॥ किं
ते विष्णो प्रख्यातमेतद्भवत्यप्रख्यापनीयं यन्नः प्रब्रूषे शेप इव निर्वेष्टितोऽस्मीत्यप्रतिपन्नरश्मिर
पि वा प्रशंसानामैवाभिप्रेतं स्यात्किं ते विष्णो प्रख्यातमेतद्भवति प्रख्यापनीयं यदुत प्रब्रूषे शिपि
विष्टोऽस्मीति प्रतिपन्नरश्मिः शिपयोऽत्र रश्मय उच्यंते तैराविष्टो भवति॥ मा वर्पो अस्मदप गूह एत
द्वर्प इति रूपनाम वृणोतीति सतो यदन्यरूपः समिथे संग्रामे भवसि संयतरश्मिस्तस्योत्तरा भू
यसे निर्वचनाय॥ ८॥ प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान्॥ तं त्वा गृणामि तव

नि॰ छ॰ ५

३९

समतव्याप्नोर्यं तमस्य रजसः पराके॥ तत्ते घृणिं पिविष्टनामार्यः शंसाम्यर्योहमस्मीश्वरः स्तोमानां
मर्यस्त्वमसीतिवा तं त्वाऽस्तोमि तव समतव्याप्तस्य सद्इति महतो नामधेयमुदितो भवति निवसंतम
स्य रजसः पराके पराक्रांते आघृणिराग तहृणिः॥ आघृणे संसचावहै॥ आगतहृणे संसेवावहै
पृथुज्रयाः पृथुजवः॥ पृथुज्रया अमिनादायुर्दस्योः॥ आमापयदायुर्दस्योः॥ ९॥ अग्निर्नरो
दीधितिभिररण्योर्हस्तच्युती जनयंत प्रशस्तं॥ दूरेदृशं गृहपतिमथर्युं॥ दीधितयो गुल्यो भ
वंति धीयंते कर्मस्वरणी प्रत्यृत एने अग्निः समरणाज्जायत इतिवा हस्तच्युती हस्तप्रसूती जन
नयंत प्रशस्तं दूरेदर्शनं गृहपतिमतनवंतं॥१०॥ एकया प्रतिधापिबत्साकं सरांसि त्रिंशतं॥
इंद्रः सोमस्य काणुका॥ एकेन प्रतिधानेनापिबत्साकं सहेत्यर्थः इंद्रः सोमस्य काणुका कांतकानी
तिवा क्रांतकानीतिवा कृतकानीतिवेंद्रः सोमस्य कांत इतिवा कणेघात इतिवा कणेहतः कांतिहतस्त

३९

त्रैलघाशिकावेदयंते त्रिंशदुक्थपात्राणि माध्यंदिने सवन एकदेवतानि तान्येतस्मिन्काल एकेन प्रतिधा
नेन पिबंति तान्यत्र सरांस्युच्यंते त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येति नैरुक्तास्तद्या एता
श्चांद्रमस्य आगामिन्य आपो भवंति रश्मयस्ता अपरपक्षे पिबंति तथापि निगमो भवति यमक्षितम
क्षितयः पिबंतीति तं पूर्वपक्ष आप्याययंति तथापि निगमो भवति यथा देवा अंशुमाप्याययंतीत्यध्रिगु
र्मंत्रो भवति॥ गव्याधिकृतत्वादपि वा प्रशासनमेवाभिप्रेतं स्यात्तच्छब्दवत्त्वादध्रिगो शमीध्वं सुशमि श
मीध्वं शमीध्वमध्रिगावित्यग्निरप्यध्रिगुरुच्यते॥ अध्रिगव ओहमिंद्राय सपि निगमो भवत्यांगूषः
स्तोम आघोषः॥ एनांगूषेण वयमिंद्रवंतः॥ अनेन स्तोमेन वयमिंद्रवंतः॥११॥ आपातमन्युस्तृप
लप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी॥ सोमो विश्वान्यतसा वनानि नार्वागिंद्रं प्रतिमानानि देभुः॥
आपातितमन्युस्तृप्रप्रहारी क्षिप्रप्रहारी सृप्रप्रहारी सोमो वेंद्रो वा धुनिर्धूनोतेः शिमीति कर्मनाम त
तुभ्यं श्चोतंत्यध्रिगो शची वोध्रुतगमनकर्मवत्निंद्रेप्यध्रिगुरुच्यते॥

नि॰ ५॰५

४०

मयते वीत्राक्रोते वेजरिषासोमो यत्सोमस्य पूयमानस्यातिरिच्यते तदजीषमपार्जितं भवति तेन जरीषीसोमो
थाप्यैंद्रो निगमो भवत्यजीषी वज्री तिहर्योरस्य सभागो धानाश्चेति धाना भ्राष्ट्रे हिता भवंति फले हिता भ
वंतीति वा बद्धौ तेहरी धाना उप ऋजीषं जिघ्रतामित्यपि निगमो भवत्यादिनाभ्यासेनोपहितेनोपधामा
दत्ते बभस्तिरत्तिकर्मा सोमः सर्वाण्यन्नसानि वनानि नावाणिंद्र प्रतिमानानि दभ्नुवंति येरेनं प्रतिमिमते नैने
नं नानि दभ्नुवंत्यवर्गी गे वैनमभ्याप्य विनत्रयंती ती द्र प्रधाने से केने घं दुर्कं सोमकर्मी भयप्रधाने त्यपरं त्रम
त्राश्रु अश्नुत इति वा रस्माश्नुत इति वा ॥ अवं त्रुमत्रा रुधु द्वाः॥ अवारुध कृ त्रावारिति॥ १२॥ उर्व रयपसरा उर्व
भ्यश्नुते उरुभ्यामश्नुते उरुर्वा वरोस्या अप्सरा अप्सारिण्यपि वाप्स इति रूपनामाप्सातेरप्सानीयं भवत्या ४०
दर्शनीयं व्यापनीयं वा स्पष्टं दर्शनायेति शाकपूणिर्यदप्स इत्यभक्षस्याप्सो नामेति व्यापिनस्तद्राभवति रू
पवती तदनयात्तमिति वा तदस्यै दत्तमिति वा तस्या दर्शनान्मित्रावरुणयो रेतश्चस्कंद तदभिवादिन्येषर्ग्भ

वति ॥ १३॥ उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोधि जातः॥ द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वेदे
वाः पुष्करे त्वाददंत ॥ अप्यसि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोधि जातो द्रप्सं स्कन्नं ब्रह्मणा दैव्ये
न द्रप्सः संभृतप्सानीयो भवति सर्वे देवाः पुष्करे त्वाधारयंत पुष्करमंतरिक्षं पोषति भूतान्युदकं पुष्करं पू
जाकरं पूजयितव्यं वेदमपीतरत्पुष्करमेतस्मादेव पुष्करं वपुष्करं वा पुष्पं पुष्यते र्व्युष्टं वेतेः कांति
र्वा प्रज्ञा वा॥ १४॥ स इत्तमो वयुनं ततन्वत्सूर्येण वयुनवच्चकार॥ स तमो प्रज्ञानं ततन्वत्सूर्येण
प्रज्ञानवच्चकार वाजपस्त्यं वाजपतनं ॥ सनेम वाजपस्त्यमित्यपि निगमो भवति वाजगंध्यं गध्यत्यु
त्तरपदं ॥ अश्याम वाजगंध्यमित्यपि निगमो भवति गध्यं गृह्णातेः ॥ ऋज्रा वाजं न गध्यं युयूषन्नि
त्यपि निगमो भवति गध्यतिर्मिश्रीभावकर्मा ॥ आगधिता परिगधितेत्यपि निगमो भवति कौर
याणः कृतयानः ॥ पाकस्थामा कौरयाण इत्यपि निगमो भवति तौरयाणस्तूर्णयानः ॥ स तौर

नि॰पू॰५

४१

पाणउपयाहियज्ञं॥ मरुद्भिरिंद्रसखिभिः सजोषा इत्यपि निगमो भवत्यक्रूपाणोक्रीतयाम्नः॥
अनुष्टुयाकृणुह्यक्रूयाणे इत्यपि निगमो भवति हरयाणो हरमाणयानः॥ रजतं हरयाण इत्यपि
निगमो भवति॥ पत्रारितः कर्मणि कर्मणि स्थिरः॥ प्रत्यृतः स्तोमान्व्रंदी व्रंदतेर्मृदूभावकर्मणः॥
॥१५॥ नियद्वृणक्षि श्वसनस्य मूर्द्धनि शुष्णस्य चिद्व्रंदिनो रोरुवद्वना॥ निवृणक्षि श्वसनस्य
मूर्द्धनि शब्दकारिणः शुष्णस्यादित्यस्य च शोषयितू रोरूयमाणो वनानीति वा वधेनेति वा॥ अत्र
दंतवीळिते इत्यपि निगमो भवति वीळयतिश्च व्रीळयतिश्च संस्तंभकर्माणौ पूर्वेण संप्रयुज्येते निष्ष
पी स्त्रीकामो भवति विनिर्गतपसाः पसः स्पतेः स्पृशतिकर्मणः॥ मा नो मघेव निष्षपी परादाः॥
स यथा धनानि विनाशयति मा नस्त्वं तथा परादाः॥ तूर्णाशमुदकं भवति तूर्णमश्नुते॥ तूर्णाशं न
गिरेरधी इत्यपि निगमो भवति क्षुंपमहिच्छत्रकं भवति यत्क्षुभ्यते॥१६॥ कुदा मर्त्तमराधसं पदा क्षुं

४१

पमिव स्फुरत्॥ कदा नः शुश्रवद्गिर इंद्रो अंग॥ कदा मर्त्तमनाराधयंतं पादेन क्षुंपमिवावस्फुरिष्यति क
दा नः श्रोष्यति च गिर इंद्रो अंगांगेति क्षिप्रनामांचितमेवांकितं भवति निचुंपुणः सोमो निचांतपृणो
निचमनेन प्रीणाति॥१७॥ पत्नीवंतः सुता इम उशंतो यंति वीतये॥ अपां जग्मिर्निचुंपुणः॥ पत्नीवंतः
सुता इमे द्भिः सोमाः कामयमाना यंति वीतये पानाय अपां गंता निचुंपुणः समुद्रोपि निचुंपुण उच्यते निचम
नेन पूर्यते अवभृथोपि निचुंपुण उच्यते नीचैरस्मिन्क्वणंति नीचैर्दधतीति वा॥ अवभृथनिचुंपुणेत्यपि
निगमो भवति निचुंपुण निचुंकुणेति च पतिर्गतिर्भवति यत्पद्यते॥१८॥ सृगुरसत्सुहिरण्यः स्वश्वो बृह
दस्मै वय इंद्रो दधाति॥ यस्त्वायंतं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति॥ सृगुर्भवति सुहिरण्यः
स्वश्वो महच्चास्मै वय इंद्रो दधाति यस्त्वायंतमन्नेन प्रातरागामिन्नतिथे॥ मुक्षीजयेव पदिमुत्सिनाति॥
कुमारो मुक्षीजा मोचनाच्च समनाच्च ततनाच्च पादुः पद्यतेः॥ आविः स्वः कृणुते गूहते बुसं स पादुरस्य नि

नि॰ दु॰ ५

४२

र्जो न मुच्यते॥ आविः कुरुते भासमादित्यो ग्रहते बुसं बुसमित्युदकनाम ब्रवीतेः शब्दकर्मणो भ्रंशतेर्वा यत्पूर्षन्पातयत्युदकं रश्मिभिस्तत्प्रत्यादत्ते॥१९॥ वृकश्चंद्रमा भवति विवृतज्योतिष्को वा विकृतज्योतिष्को वा विक्रांतज्योतिष्को वा॥२०॥ अरुणो मासकृद्वृकः पथा यंतं ददर्श हि॥ उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी॥ अरुण आरोचनो मासकृन्मासानां चार्धमासानां च कर्ता भवति चंद्रमा वृकः पथा यंतं ददर्श नक्षत्रगणमभिजिहीते निचाय्य येन येन योक्ष्यमाणो भवति चंद्रमास्तक्ष्णुवन्निव पृष्ठरोगी जानीतं मे अस्य द्यावापृथिव्याविति आदित्योऽपि वृक उच्यते यदा वृंक्ते॥ अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुंचतं वृकस्य॥ आह्वयदुषा अश्विनावादित्येनाभिग्रस्ता तामश्विनौ प्रमुमुचतुरित्याख्यानं श्वापि वृक उच्यते विकर्तनात्॥ वृकश्चिदस्य वारण उरामथिः॥ उरणमथिः॥ उरण ऊर्णावान्भवत्यूर्णा पुनर्वृणोतेरूर्णोतेर्वा वृद्धवाशिन्यपि वृक्युच्यते॥ शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितांधं चकार त

४२

पि निगमो भवति जोषवाकमित्यविज्ञातनामधेयं जोषयितव्यं भवति॥२१॥ य इंद्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा॥ जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन॥ य इंद्राग्नी सुतेषु वां सोमेषु स्तौति तस्याश्नीथोऽथ योऽयं जोषवाकं वदति विजंजपः प्रार्जितहोषिणौ न देवौ तस्याश्नीथः कृत्तिः कृंततेर्यशो वान्नं वा॥ महीव कृत्तिः शरणा त इंद्र॥ सुमहत्त इंद्र शरणमंतरिक्षे कृत्तिरिवेतीयमपीतरा कृत्तिरेतस्मादेव सूत्रमय्युपमार्थे वा॥ कृत्तिं वसान आचर पिनाकं बिभ्रदागहीत्यपि निगमो भवति श्वघ्नी कितवो भवति स्वं हंति स्वं पुनराश्रितं भवति॥ कृतं न श्वघ्नी वि चिनोति देवने॥ कृतमिव श्वघ्नी विचिनोति देवने कितवः किं तवास्तीति शब्दानुकृतिः

म

कृतवान्वाशीर्नामकः समितिपरिग्रहार्थीयं सर्वनामानुदात्तं॥२२॥ मा नः समस्य दूढ्यः परिद्वेषसो अंहतिः॥ ऊर्मिर्न नावमा वधीत्॥ मा नः सर्वस्य दुर्धियः पापधियः सर्वतो द्वेषसोंऽहतिरूर्मिरिव नावमा वधीदूर्मिरूर्णोतेर्नौः प्रणोत्तव्या भवति नमतेर्वा तत्कथमनुदात्तप्रकृति नाम स्याद्दृष्टव्ययं तु भवत्युतो

नि॰ घृ॰ ५

४३

समस्मिञ्जायिन्नो दिनो वसो इतिसमस्यां शिशानिर्दानकर्मा॥ उरुष्याणो अघायतः समस्मादिति
पंचम्यामुरुष्यतीरक्षाकर्माथापि प्रथमाबहुवचनेन भं नामन्येके समे॥ २३॥ हविषाजारो अपांपि
पर्त्तिपपुरिर्नरा॥ पिताकुटस्य चर्षणिः॥ हविषा पंजरयितापिपर्त्तिपपुरिरिति प्रणातिनिगमो वा प्री
णातिनिगमो वा पिताकृतस्य कर्मणश्चायितादित्यः शंब इति वज्रनाम शमयतेर्वा शातयतेर्वा॥ उ
ग्रो यः शंबः पुरुहूततेनेसपि निगमो भवति केपयः कपूया भवंति कपूयमिति पुनाति कर्मकुत्सितं
दुष्पूयं भवति॥ २४॥ पृथक्प्रायन्प्रथमा देवहूतयो कृण्वत श्रवस्यानि दुष्टरा॥ नये शेकुर्यज्ञियां ना
वमारुहमीर्मैव ते न्यविशंत केपयः॥ पृथक्प्रायन्पृथक्प्रथतेः प्रथमा देवहूतयो ये देवानां ह्व
यंतोऽकुर्वतः श्रवणीयानि यशांसि दुरनुकराण्यन्यैर्ये शक्नुवन्यज्ञियां नावमारोढुं मीर्मैव ते न्य
विशंते हैव ते न्यविशंत ऋणे हैव ते न्यविशंतास्मिन्नेव लोक इति वेर्म इति बाहुनाम समीरिततरो भ

मथ येनाशक्नुवन्यज्ञियां नावमारोढु

४३

वति॥ एता विश्वा सवनातूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे॥ एतानि सर्वाणि स्थानानि तूर्ण
मुपाकुरुषे स्वयं बलस्य पुत्र यानि धत्से सत्रमं महसत्राणं धनुर्वा कवचं वा कवचं कुअं चितं भवे
तिकां चितं भवति कायं चितं भवतीति वा॥ २५॥ प्रीणीताश्वान्हितं जयाथ स्वस्तिवाहं रथमित्कृणु
ध्वं॥ द्रोणाहावमवतमश्मचक्रमंसत्रकोशं सिंचता नृपाणं॥ प्रीणीताश्वान्सुहितं जयथ जयनं
वो हितमस्तु स्वस्तिवाहनं रथं कुरुध्वं द्रोणाहावं द्रोणं द्रुममयं भवत्याहाव आह्वानादावह आवह
नादवतो वातितो महान्भवत्यश्मचक्रमशनचक्रमसनचक्रमिति वांसत्रकोशमंसत्राणि वः कोशा
स्थानीयानि संतु कोशः कुष्णातेर्विकुषितो भवत्ययमपीतरः कोश एतस्मादेव संचय आचितमात्रो
महान्भवति सिंचत नृपाणं नरपाणं कूपकर्मणा संग्राममुपमिमीते काकुदं तालु इत्याचक्षते जिह्वा को
कुवा सास्मिन्धीयते जिह्वा कोकुवा कोकूयमाना वर्णान्नुदतीति वा कोकूयतेर्वा स्याच्छब्दकर्मणो जि

नि॰ पू॰ ५

४४

कोकुवा तालु तरतेस्तीर्णतमममंगं लततेर्वा स्याल्लम्बकर्मणो विपरीताद्यथा तलं लतेत्यविपर्ययः ॥२६॥ सुदेवो असि
वरुण यस्य ते सप्त सिंधवः ॥ अनुक्षरंति काकुदं सूर्म्यं सुषिरामिव ॥ सुदेवस्त्वं कल्याणदेवः कमनीय
देवो वा भवसि वरुण यस्य ते सप्त सिंधवः सिंधुः स्रवणाद्यस्य ते सप्त स्रोतांसि तानि ते काकुदमनुक्षरंति
सूर्मिं कल्याणोर्मिं स्रोतः सुषिरमनु यथा वीरिटं तैटीकिरंतरिक्षमेवमाह पूर्वं वयतेरुत्तरमिरतेर्वयां
सीरंत्यस्मिन्भांसि वा तदेतस्यामृच्युदाहरंत्यपि निगमो भवति ॥२७॥ प्र वावृजे सुप्रया बर्हिरेषा
मा विश्पतीव बीरिट इयाते ॥ विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ प्रवृज्यते
सुप्रायणं बर्हिरेषामेयाते सर्वस्य पातारौ वा पालयितारौ वा वीरिटमंतरिक्षं भियो वा भासो वा त
तिरपि वोपमार्थे स्यात्सर्वपती इव राजानौ वीरिटे गणे मनुष्याणां रात्र्या विवासे पूर्वस्यामभिहूतौ वा
युश्च नियुत्वान्पूषा च स्वस्त्ययनाय नियुत्वान्नियुतोऽस्याश्वा नियुतो नियमनाद्वा नियोजनाद्वा अछाभे

४४

राप्तुमिति शाकपूणिः पर्शासीमिति व्याख्यातानेनमेनामस्या अस्येत्येतेन व्याख्यातं सृणिरंकुशो
भवति सरणादंकुशोंचतेराकुंचितो भवतीति वा निरुक्तं सृण्यः पङ्क्तेमयादित्यपि निगमो भवत्यथिक
तममंकुरग्क्षयात्सकमोषधमागछत्वित्यागछत्विति ॥२८॥ ॥ सस्निमसन्वंतीनयस्य वराहोगा
यंति त्वा पवित्रं पुरुहत्वा कि मित्ते प्रतत्ते ऽग्निं नरश्च कयापीतमन्युरूर्वन्नमप्सराउतासि सइन्द्रियत्कुदा
मर्त्तपत्नीवंतः सुगुरस सहकश्वं इमो अरुणो मायई द्राग्नीमानः समस्य हविषो जारः पृथक्कृपाय
श्रीणीत सुदेवः प्र वावृजे ष्टाविंशतिः ॥ ॥ इति निरुक्ते पूर्वषट्के पंचमोऽध्यायः ॥ ॥ ॥ ॐ ॥ ॥
॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ॥ त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां
नृपते जायसे शुचिः ॥ त्वमग्ने द्युभिरहोभिस्त्वमाशुशुक्षणिराशु इति च शु इति च क्षिप्रनामनी
भवतः क्षणिरुत्तरः क्षणोतेराशु शुचा क्षणोतीति वा सनोतीति वा शुक्रशोचतेः पंचम्यर्थे वा प्रथमा

नि॰ अ॰ ६

४५

तथा हि वाक्यसंयोग आङित्याकार उपसर्गः पुरस्ताच्चिकीर्षितज उत्तर आशुशुशोचयिषुरिति शुचिः
शोचतेर्ज्वलतिकर्मणोऽयमपीतरः शुचिरेतस्मादेव निःषिक्तमस्मात्पापकमिति नैरुक्ताः ॥ इंद्र आ
शाभ्यस्परि सर्वाभ्यो अभयं करत् ॥ आशा दिशो भवंत्यासदनादाशा उपदिशो भवंत्यभ्यशनात्
काशिर्मुष्टिः प्रकाशनान्मुष्टिर्मोचनाद्वा मोषणाद्वा मोहनाद्वा ॥ इमे चिदिंद्र रोदसी अपारे यत्संग
भ्णा मघवन्काशिरित्ते ॥ इमे चिदिंद्र रोदसी रोधसी द्यावापृथिव्यौ विरोधनाद्रोधः कूलं निरुणद्धि
स्रोतः कूलं रुजतेर्विपरीतात् लोष्टो विपर्ययेणापारे दूरपारे यत्संगृभ्णासि मघवन्काशिस्ते महा
न् ॥ अहस्तमिंद्र संपिणक्कुणारुं ॥ अहस्तमिंद्र कृत्वा संपिंढि परिक्वणनं मेघं ॥ १ ॥ अलातृणो व
ल इंद्र व्रजो गोः पुरा हंतोर्भयमानो व्यार ॥ सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं ध
मंतीः ॥ अलातृणो लमातर्दनो मेघो वलो वृणोतेर्व्रजो व्रजत्यंतरिक्षे गोरेतस्या माध्यमिकाया वाचः

४५

पुरा हननाद्भयमानो व्यार ॥ सुगान्पथो अकृणोन्निरजे गाः ॥ सुगमनान्पथोकरोन्निर्गमनाय गवां ॥
प्रावन्वाणीः पुरुहूतं धमंतीः ॥ आपो वा वहनाद्वा चो वा वदनाद्वा बहुभिराहूतमुदकं भवति धमतिर्गति
कर्मा ॥ २ ॥ उद्वृह रक्षः सहमूलमिंद्र वृश्चा मध्यं प्रत्यग्रं शृणीहि ॥ आ कीवतः सललूकं चकर्थ ब्रह्मद्वि
षे तपुषिं हेतिमस्य ॥ उद्धर रक्षः सहमूलमिंद्र मूलं मोचनाद्वा मोषणाद्वा मोहनाद्वा वृश्च मध्यं प्रतिशृ
णीह्यग्रमग्रमागतं भवत्या कियतो देशात्सललूकं संलुब्धं भवति पापकमिति नैरुक्ताः सररूकं
वा स्यात्सर्त्तेरभ्यस्तात् तपुषिस्तपतेर्हेतिर्हंतेः ॥ त्यं चिदित्था कत्पयं शयानं ॥ सुखपयसं सुख
मस्य पयः ॥ विस्रुह आपो भवंति विस्रवणात् ॥ वयाइव रुरुहुः सप्त विस्रुहः इत्यपि निगमो भव
ति वीरुध ओषधयो भवंति विरोहणात् ॥ वीरुधः पारयिष्ण्वः इत्यपि निगमो भवति नक्षद्दाभमश्नु
वानदाभमभ्यशनेन दभ्नोतीति ॥ नक्षद्दाभं ततुरिं पर्वतेष्ठामित्यपि निगमो भवत्यस्कृधोयुर

नि॰ दू॰ ६

४६ ब

कृध्वायुः कृधिवितिकृस्वनामनिकृत्तं भवति ॥ यो अस्य कृधोयुरजरः स्वर्वानित्यपिनिगमो भवति
निश्रृंभानिः श्रथ्यहारिणः ॥ ३ ॥ आजासः पूषणं रथे निश्रृंभास्तेजनश्रियं ॥ देवं वहंतु बिभ्रतः ॥
आवहंत्वजाः पूषणं रथे निश्रथ्या हारिणस्तेजनश्रियं जातः श्रियं बृबदुक्थो महदुक्थो वक्त
व्यमस्मा उक्थमिति बृंदुक्थो वा ॥ बृबदुक्थं हवामह इत्यपिनिगमो भवत्यृदूदरः सोमो मृदूदरो मृ
दुरुदरेष्विति वा ॥ ऋदूदरेण सख्या सचेयेत्यपिनिगमो भवत्यृदूपे इत्येतत्परिहाप्याख्यास्यामः पुलु
कामः पुरुकामः ॥ पुलुकामो हि मर्त्य इत्यपिनिगमो भवत्यसिन्वती असंखादंत्यौ ॥ असिन्वती बप्स
ती भूर्यत्त इत्यपिनिगमो भवति कपनाः कंपनाः क्रिमयो भवंति ॥ मो षथा वृक्षं कपनेव वेधस इत्यपि
निगमो भवति भाऋजीकः प्रसिद्धभाः ॥ धूमकेतुः समिधाभाऋजीक इत्यपिनिगमो भवति रु
जाना नद्यो भवंति रुजंति कूलानि ॥ संरुजानाः पिपिष इंद्रशत्रुरित्यपिनिगमो भवति जूर्णिर्जि

४६

वतेर्वा द्रवतेर्वा दूनोतेर्वा ॥ क्षिप्ता जूर्णिर्न वक्षतीत्यपिनिगमो भवति ॥ परिदंसमोमनावां वयो गात ॥
पर्यगाद्वंसं समहर वनायान्नं ॥ ४ ॥ उपलप्रक्षिण्युपलेषु प्रक्षिणा त्युपलप्रक्षेपिणी वेंद्र ऋषीन्य
प्रच्छ दुर्भिक्षे केन जीवतीति तेषामेकः प्रत्यवाच शकटं शाकिनी गावो जालमस्यंदनं वनमुद
धिः पर्वता राजा दुर्भिक्षे नवर्त्तय इति सा निगदव्याख्याता ॥ ५ ॥ कारुरहं ततो भिषगुपलप्रक्षि
णी नना ॥ नानाधियो वसूयवोनु गा इव तस्थिमेंद्रायेंदो परिस्रव ॥ कारुरहमस्मि कर्त्ता स्तोमानां
ततो भिषक्त न इति संतानननाम पितुर्वा पुत्रस्य वोपलप्रक्षिणी सक्तुकारिका ननानमतेर्माता वा दुहि
ता वा नानाधियो नानाकर्म्माणो वसूयवो वसुकामा अन्वास्थितास्मो गाव इव लोकमिंद्रायेंदो परि
स्रवेत्यध्येषणा ॥ आसीन ऊर्ध्वामुपसि क्षिणाति कपस्थे प्रकलविद्वणिग्भवति कलाश्च वेद प्रकला
श्च ॥ दुर्मित्रासः प्रकलविन्मिमाना इत्यपिनिगमो भवत्यभ्यर्द्धयज्वाभ्यर्द्धयन्यजति ॥ सिषक्तिप्र

नि॰पू॰६

४०

पा॥ऋष्वईयच्चेत्यपिनिगमोभवती॥क्षईशिषे॥ईक्षेहिवस्वउभयस्यराजन्नित्यपिनिगमोभवति॥क्षो
णस्यअक्षयणस्य॥महःक्षोणस्याश्विनाकण्वायेत्यपिनिगमोभवति॥८॥अस्मेतेबंधुः॥वयमि
त्यर्थः॥अस्मेयातंनासत्यासजोषाः॥अस्मानित्यर्थः॥अस्मेसमानेभिर्वृषभपौंस्येभिः॥अस्मा
भिरित्यर्थः॥अस्मेप्रयंधिमघवन्नृजीषिन्॥अस्मभ्यमित्यर्थः॥अस्मेआराच्चिद्द्वेषःसनुतर्यु
योतु॥अस्मदित्यर्थः॥ऊर्वइवपप्रथेकामोअस्मे॥अस्माकमित्यर्थः॥अस्मेधत्तवसवोवसूनि॥
अस्मास्वित्यर्थः॥पाथोंतरिक्षंपथाव्याख्यातं॥श्येनोनदीयन्नन्वेतिपाथइत्यपिनिगमोभवत्युदकम
पिपाथउच्यतेपानात्॥आचष्टआसांपाथोनदीनामित्यपिनिगमोभवत्यन्नमपिपाथउच्यतेपाना

४१

देव॥देवानांपाथउपवक्षिविद्वानित्यपिनिगमोभवति॥सवीमनिप्रसवे॥देवस्यवयंसवितुःसवीमनी
त्यपिनिगमोभवति॥सप्रथाःसर्वतःपृथुः॥त्वमग्नेसप्रथाअसीत्यपिनिगमोभवति॥विदथानिवेद

नानि॥विदथानिप्रचोदयन्नित्यपिनिगमोभवति॥७॥आयंतइवसूर्यंविश्वेदिंद्रस्यभक्षत॥वसूनिजातेज
नमानओजसाप्रतिभागंनदीधिम॥समाश्रिताःसूर्यमुपतिष्ठंतेइतिवोपमार्थेस्यात्सूर्यमिवेंद्रमुपतिष्ठंतइ
तिसर्वाणींद्रस्यधनानिविभक्ष्यमाणाःसयथाधनानिविभजतिजातेचजनिष्यमाणेचतंवयंभागम
नुध्यायामओजसाबलेनओजओजतेर्वाउब्जतेर्वाआशीराश्रयणाद्वाआश्रपणाद्वाअथेयमितराशीराशास्तेः॥इं
द्रायगावआशिरमित्यपिनिगमोभवतिसामेसत्याशीर्देवेष्विति च॥यदातेमर्तोअनुभोगमा
नड्वादिद्रसिष्ठओषधीरजीगः॥यदातेमर्तोभोगमन्वाप इदग्रसिष्ठतमओषधीरगारी
र्जीगर्तिर्गिरतिकर्मावागृणातिकर्मावागृह्णातिकर्मावा॥सुराश्च मरुनवयंचिकित्वोमहित्व
मग्नेत्वमंगवित्से॥मद्वावयंस्मोमद्धस्त्वमसिनवयंविद्मोमहत्त्वमग्नेत्वंतुवेत्थशशमानःशं
समानः॥योवांयज्ञैःशशमानोहदाशतीत्यपिनिगमोभवति॥देवोदेवाच्याकृपा॥देवोदेवान्

नि॰पू॰६

प्रत्स्यक्त्याक्रूपाक्रूष्कूपतेर्वाकल्पतेर्वा॥८॥अश्रवंहिभूरिदावत्तरावांविजामातुरुतवाघा
स्यालात्॥अथासोमस्यप्रयतीयुवभ्यामिंद्राग्नीस्तोमंजनयामिनव्यं॥अश्रौषंहिबहुदातृ
तरौवांविजामातुरसुसमाप्ताज्जामातुर्विजामातेतिशश्वद्दाक्षिणाजाःक्रीतापतिमाचक्षतेसु
समाप्तइववरोभिप्रेतोजामाताजाअपत्यंतन्निर्माताउतवाघास्यालादपिचस्यालात्स्यालआ
सन्नःसंयोगेनेतिनैदानाःस्याल्लाजानावपतीतिवालाजालाजतेःस्यंशूर्पंस्यतेःशूर्पमशनपव
नंशृणातेर्वाथसोमस्यप्रदानेनयुवाभ्यामिंद्राग्नीस्तोमंजनयामिनव्यं॥नवतरंसोमासइस्
परिष्ठाद्व्याख्यास्यामः॥९॥सोमानंस्वरणंकृणुहिब्रह्मणस्पते॥कक्षीवंतंयऔशिजः॥सो
मानंसोतारंप्रकाशनवंतंकुरुब्रह्मणस्पतेकक्षीवंतमिवयऔशिजःकक्षीवान्कक्ष्यावानौशि
जउशिजःपुत्रउशिग्वष्टेःकांतिकर्मणोपित्वयंमनुष्यकक्षएवाभिप्रेतःस्यात्तंसोमानंसोतारंमा

४८

ने

४८

प्रकाशनवंतंकुरुब्रह्मणस्पते॥१०॥इंद्रासोमासमघशंसमभ्यघंतपुर्ययस्तुचरुरग्निवांइव॥
ब्रह्मद्विषेक्रव्यादेघोरचक्षसेद्वेषोधत्तमनवायंकिमीदिने॥इंद्रासोमावघस्यशंसितारमघंहंते
र्निर्ह्रसितोपसर्गआहंतीतितपुस्तपतेश्चरुर्मृच्चयोभवतिचरतेर्वासमुच्चरंत्यस्मादापोब्रह्मद्विषे
ब्राह्मणद्वेष्ट्रेक्रव्यादेक्रव्यमदतेघोरचक्षसेघोरख्यानायक्रव्यंविकृत्ताज्जायतइतिनैरुक्ताद्वेषोध
त्तमनवायमनेवययंवंयदन्येनव्यवेयुरद्वेषसइतिवाकिमीदिनेकिमिदानीमितिचरतेकिमिदंकिमिद
मितिवापिशुनायचरतेपिशुनःपिंशतेर्विपिंशतीति॥११॥कृणुष्वपाजःप्रसितिंनपृथ्वीयाहिराजे
वामवांइभेन॥तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः॥कुरुष्वपाजःपाजःपालना
त्प्रसितिमिवपृथ्वीप्रसितिःप्रसयनात्तंतुर्वाजालंवायाहिराजेवामात्यवानभ्यमनवान्स्ववान्वेराभृ
तागणेनगतभयेनहस्तिनेतिवातृष्व्यानुप्रसित्याद्रूणानस्तृष्वीतिक्षिप्रनामतरतेर्वात्वरतेर्वासिता

४९

निषिध्वरस्त्वस्तस्पिष्ठैस्तमतमैस्तमतमैः प्रपिष्ठतमैरितिवा॥ यस्ते गर्भममीवा दुर्णामा योनिमा
शये॥ अमीवाभ्यमनेन व्याख्यातो दुर्णामा क्रिमिर्भवति पापनामा क्रिमिः क्रव्ये मेद्यति क्रमतेर्वा
स्यात्सरणकर्मणः क्रामतेर्वा॥ अतिक्रामन्तो दुरितानि विश्वा॥ अतिक्रममाणा दुर्गतिगमनानि स
र्वाण्यप्यापदेनयाविद्धो पवीयते व्याधिर्वा भयं वा॥ अधा परेहीत्यपि निगमो भवत्यमतिरमामयीम
तिरात्ममयी॥ ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनीत्यपि निगमो भवति॥ श्रुष्टीति क्षिप्रनामा
शु अष्टीति॥१२॥ तां अध्वर उशतो यक्ष्यग्ने श्रुष्टीभगं नासत्या पुरंधिं॥ तान ध्वरे यज्ञ उशतः काम
यमानान्यजाग्ने श्रुष्टी भगं नासत्यौ चाश्विनौ सत्यावेव नासत्यावित्यौर्णवाभः सत्यस्य प्रणेता
रावित्याग्रायणो नासिकाप्रभवौ बभूवतुरिति वा पुरंधिर्बहुधीस्तत्कः पुरंधिर्भगः पुरस्तात्तस्या
न्वादेश इत्येकमिंद्र इत्यपरं स बहुकर्मतमः पुरां च दारयितृतमो वरुण इत्यपरं तं प्रज्ञयास्तौति॥

४८

इमामस्तु कवितमस्य मायामित्यपि निगमो भवति रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः॥ समिद्ध
स्य रुशददर्शि पाज इत्यपि निगमो भवति॥१३॥ अस्तिहि वः सजात्यं रिशादसो देवासो अस्त्याप्यं॥ अ
स्ति हि वः समानजातिता रेशयदारिणो देवा अस्त्याप्यमाप्यमाप्नोतेः सुदत्रः कल्याणदानः॥
त्वष्टा सुदत्रो विदधातु राय इत्यपि निगमो भवति सुविदत्रः कल्याणविद्यः॥ आग्ने याहि सुवि
दत्रेभिरर्वाङित्यपि निगमो भवत्यानुषगिति नामानुपूर्वस्यानुषक्तं भवति॥ स्तृणन्ति बर्हिरानुष
गित्यपि निगमो भवति तुर्वणिस्तूर्णवनिः॥ स तुर्वणिर्महाँ अरेणु पौंस्य इत्यपि निगमो भवति
गिर्वणा देवो भवति गीर्भिरेनं वनयंति॥ जुष्टं गिर्वणसे बृहदित्यपि निगमो भवति॥१४॥ असूर्ते
सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि॥ असुसमीरिताः सुसमीरिते वातसमीरिता मा
ध्यमका देवगणा ये रसेन पृथिवीं तर्पयन्तो भूतानि च कुर्वन्ति त आयजन्त इति कांतं प्रतिवचनं॥

नि॰पू॰६

५०

अम्यक्सात इंद्र ऋष्टिः॥ अमाक्तेति वाभ्यक्तेति वा॥ यादृश्मिन्धायितमपस्यया विदत्॥ यादृशेऽधायित
मपस्यया विदत्॥ उस्रः पितेव जारयायि यज्ञैः॥ उस्र इव गोपिता जायि यज्ञैः॥१५॥ प्रबोध्जीजुजुषाणासो
अस्थुरभूत विश्वे अग्रियोत वाजाः॥ प्रास्थुर्वो जोषयमाणा अभवत सर्वे अग्रगमनेनेति वाग्रगरणेनेति
वाग्रसंपादिन इति वापि वाग्रमित्येतदनर्थकमुपबंधमाददीत॥ अद्रीद्रेदिं प्रस्थितमा हवींषि चनोदधि
ष्व पचतोत सोमं॥ अद्रींद्र प्रस्थितानीमानि हवींषि चनो दधिष्व चन इत्यन्ननाम पचतिर्नामीभूतः तं मे
दस्तः प्रतिपचतां अभीष्टमित्यपि निगमो भवत्यपि वामेदसश्वपत्रोऽश्वसात्वं द्विवचनं स्याद्यत्रैक
वचनार्थः प्रसिद्धं तद्भवति पुरोळा अग्ने पचत इति यथा॥ श्रुरुधः आपो भवंति शुचं संरुंधंति॥ ऋतस्य
हि शुरुधः संति पूर्वीरित्यपि निगमो भवत्यमिनोऽमितमात्रो महान्भवत्यभ्यमितो वा॥ अमिनः सहो
भिरित्यपि निगमो भवति जज्झतीरापो भवंति शब्दकारिण्यः॥ मरुतो जज्झतीरिवेत्यपि निगमो भवत्य

५०

प्रतिष्कुतोऽप्रतिष्कृतोऽप्रतिस्खलितो वा॥ अस्मभ्यमप्रतिष्कुत इत्यपि निगमो भवति॥ शाशदानः शा
शाद्यमानः॥ प्रस्वां मतिमतिरच्छाशदान इत्यपि निगमो भवति॥१६॥ सृप्रः सर्पणादिदमपीतरत्सृ
प्रमेतस्मादेव सर्पिर्वा तैलं वा॥ सृप्रकरस्नमूतय इत्यपि निगमो भवति करस्नौ बाहू कर्मणां प्रस्नाता
रौ सुशिप्रमेतेन व्याख्यातं॥ वाजे सुशिप्र गोमतीत्यपि निगमो भवति शिप्रे हनू नासिके वा हनुर्हंतेर्नासि
का नसतेः॥ विष्यस्व शिप्रे विसृजस्व धेने इत्यपि निगमो भवति धेना दधातेः रंसु रमणात्॥ सचित्रेण
चिकितेरंसुभासेत्यपि निगमो भवति द्विबर्हा द्वयोः स्थानयोः परिवृढो मध्यमे च स्थान उत्तमे च॥ उत द्विब
र्हा अमिनः सहोभिरित्यपि निगमो भवत्यक्र आक्रमणात्॥ अक्रो न बभ्रिः समिथे महीनामित्यपि
निगमो भवत्युरण उरु कुर्वाणः॥ हूत ईमसे प्रदिव उराण इत्यपि निगमो भवति स्तिया आपो भवंति स्त्या
मनात्॥ वृषा सिंधूनां वृषभस्तियानामित्यपि निगमो भवति स्तिपाः स्तियापालन उपस्थितान्पाल

नि॰ ६॰६

५१

यतीति वा॥ स नः स्तिपा उत श्रवा तनूपा इत्यपि निगमो भवति जबारु जबमानरोहि जरमाणरोहि गरमाणरो
हीति वा॥ अग्रे रूप आरूपितं जबारु इत्यपि निगमो भवति जरूथं गरूथं गृणातेः॥ जरूथं हन्यक्षि राये पुरं
धिमित्यपि निगमो भवति कुलिश इति वज्रनाम कूलशातनो भवति॥ स्कंधांसीव कुलिशेना विवृक्णा
हिः शयत उपपृक् पृथिव्याः॥ स्कंधो वृक्षस्य समास्कन्नो भवत्ययमपीतरः स्कंध एतस्मादेवास्कन्नं का
ये हिः शयत उपपर्चनः पृथिव्यास्तुंजस्तुंजतेर्दानकर्मणः॥१७॥ तुंजे तुंजे य उत्तरे स्तोमा इंद्रस्य वज्रिणः॥
न विंधे अस्य सुष्टुतिं॥ दाने दाने य उत्तरे स्तोमा इंद्रस्य वज्रिणो नास्य तैर्विंदामि समाप्तिं स्तुतेर्बर्हणा
परिबर्हणा॥ इंद्र कृष्वा असुरा बर्हणा कृत इत्यपि निगमो भवति॥१८॥ यो अस्मै घ्रंस उत वा य ऊधनि सो
मं सुनोति भवति द्युमां अह॥ अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः॥ घ्रं
स इत्यहर्नाम ग्रस्यंतेऽस्मिन्रसा गोरूध उद्धततरं भवत्युपोन्नद्धमिति वा स्नेहानुप्रदानसामान्याद्रात्रि

५१

रप्यूध उच्यते स यो अस्मा अहन्यपि वा रात्रौ सोमं सुनोति भवत्यह द्योतनवानपोहत्यपोहति शक्रस्तितनिषुं ध
र्मसंतानादपेतमलंकरिष्णुमयज्वानं तनूशुभ्रं तनुशोभयितारं मघवा यः कवासखो यस्य कपूयाः सखायः
॥ न्याविध्यदिलीबिशस्य दृळ्हा वि शृंगिणमभिनच्छुष्णमिंद्रः॥ निरविध्यदिलाबिलशयस्य दृढानि व्यभिन
च्छृंगिणं शुष्णमिंद्रः॥१९॥ अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः॥ गोर्न पर्व वि रदा ति
रश्चेष्यन्नर्णांस्यपां चरध्यै॥ अस्मै प्रहर तूर्णं त्वरमाणो वृत्राय वज्रमीशानः कियेधाः कियद्धा इति वा
क्रममाणधा इति वा गोरिव पर्वाणि विरद मेघस्येष्यन्नर्णांस्यपां चरणाय भृमिर्भ्राम्यतेः॥ भृमिरस्यृ
षिकृन्मर्त्यानामित्यपि निगमो भवति विष्पितो विप्राप्तः॥ पारं नो अस्य विष्पितस्य पर्षन्नित्यपि निगमो
भवति॥२०॥ तं नस्तूरीपमद्भुतं पुरुवारं पुरुत्मना॥ त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः॥ तं न स्तू
र्णापि महत्संभृतमात्मना त्वष्टा धनस्य पोषाय विष्यत्वित्यस्मयुरस्मान्कामयमानो रास्मिनो रास्मीरपते

नि॰ दू॰ ६

५२

वीरसतेर्वा॥ राखिनस्पायोरित्यपि निगमो भवत्यं॥ जतिः प्रसाधनकर्मा॥ आवञ्जंजसऊर्जो व्यु
ष्टिष्वित्यपि निगमो भवत्यृजुरित्यप्यस्य भवति॥ ऋजुनीती नो वरुण इत्यपि निगमो भवति प्र
तद्वस्त्राप्नवस्त॥ हरी इंद्र प्रतद्वस्त्र अभिस्वरेत्यपि निगमो भवति॥ २१॥ हिनोता नो अध्वरं दे
वयज्या हिनोत प्रेरयत सनये धनानां॥ ऋतस्य योगे विष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमा
पः॥ प्रहिणुत नो ध्वरं देवयज्यायै प्रहिणुत प्रेरयत धनस्य सननाय ऋतस्य योगे यज्ञस्य योगे या
ज्ञे शकट इति वा शकटं शकृदितं भवति शनकैस्तकतीति वा शब्देन तकतीति वा॥ श्रुष्टीवरीर्भूत
नास्मभ्यमापः॥ सुखवत्यो भवतास्मभ्यमापः॥ चोष्कूयमाण इंद्र भूरि वामं॥ दददिंद्र बहु वन
नीयं॥ एधमानद्विळुभयस्य राजा चोष्कूयते विश इंद्रो मनुष्यान्॥ व्युदस्यत्येधमानानसु
न्वतः सुन्वतोऽभ्यादधात्युभयस्य राजा दिव्यस्य च पार्थिवस्य च चोष्कूयमाण इति चोष्कूयते

५२

श्चर्करीतदत्तं सुमतस्व यमित्यर्थः॥ उपप्रागात्सुमन्मे धायि मन्म॥ उपप्रैतु मां स्वयं यन्मे मनो ध्यायि
यज्ञेनेत्याश्वमेधिको मंत्रो दिविष्टिषु दिव एषणेषु॥ स्थूरं राधः शताश्वं कुरुंगस्य दिविष्टिषु॥ स्थूरः
समाश्रितमात्रो महानणुरनुस्थवीयांसमुपसर्गो लुप्तनामकरणो यथा संप्रति कुरुंगो राजा
बभूव कुरुगमनाद्वा कुलगमनाद्वा कुरुः कृंततेः क्रूरमित्यप्यस्य भवति कुलं कुष्णातेर्विकुषितं भव
ति दूतो व्याख्यातो जिन्वतिः प्रीतिकर्मा॥ भूमिं पर्जन्या जिन्वंति दिवं जिन्वंत्यग्नय इत्यपि निगमो भ
वति॥ २२॥ अमत्रो मात्रो महान्भवत्यभ्यमितो वा॥ महाँ अमत्रो वृजने विरप्शीत्यपि निगमो भव
ति स्वा वे वज्र्यृचीषमः॥ स्तूयते वज्र्यृचा समो न शर्शराति मनश्लीलदानमश्लीलं पापकमश्रिमद्वि
षमं॥ अनर्शरातिं वसुदामुपस्तुहीत्यपि निगमो भवत्यनर्वा प्रत्यृतो न्यस्मिन्॥ अनर्वाणं वृषभं
मंद्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः॥ अनर्वमप्रत्यृतमन्यस्मिन्वृषभं मंद्रजिह्वं मंदनजिह्वं मो

नि॰ ५॰ ६

५२

दनजिद्धमितिवा॥ बृहस्पतिं वर्द्धय नव्यमर्कैरर्चनीयैः स्तोमैः रसामि सामि प्रतिषिद्धं सामिस्य
तेः॥ असाम्योजो बिभृथा सुदानवः॥ असमाप्तं बलं बिभृथ कल्याणदानाः॥ २३॥ मात्वा
सोमस्य गल्दया सदा याचन्नहं गिरा॥ भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत्॥
मा चुक्रुधं त्वा सोमस्य गालनेन सदा याचन्नहं गिरा गीत्या स्तुत्या भूर्णिमिव मृगं न सवनेषु
चुक्रुधं क ईशानं न याचिष्यत इति गल्दा धमनयो भवंति गलनमासु धीयते॥ आ त्वा विशं
त्विंदव आ गल्दा धमनीनां॥ नानाविभक्ती त्येते भवतः आगलना धमनीनामित्यत्रार्थः॥ २४॥
न पापासो मनामहे नारायासो न जल्हवः॥ न पापा मन्यामहे नाधना न ज्वलनेन हीनाः अस्त्यस्मा
सु ब्रह्मचर्यमध्ययनं तपो दानकर्मेत्यृषिरवोचद्बकुरो भास्करो भयंकरो भासमानो द्रवतीति
वा॥ २५॥ यवं वृकेणाश्विना वपंतेषं दुहंता मनुषाय दस्रा॥ अभि दस्युं बकुरेणा धमंतोरु ज्यो

तिश्चक्रथुरार्याय॥ यवमिव वृकेणाश्विनौ निवपंतौ वृको लांगलं भवति विकर्त्तनाल्लांगलं लगतेर्लांगू
लवद्वा लांगूलं लगतेर्लंगतेर्लंबतेर्वा इषं दुहंतौ मनुष्याय दर्शनीयावभिधमंतौ दस्युं बकुरेण ज्योति
षा वोदकेन वार्य ईश्वरः पुत्रो बेकनाटाः खलु कुसीदिनो भवंति द्विगुणकारिणो वा द्विगुणदायिनो वा
द्विगुणं कामयंत इति वा॥ इंद्रो विश्वान्बेकनाटाँ अहर्दृश उत क्रत्वा पणीँरभि॥ इंद्रो यः सर्वान्बेकना
टानहर्दृशः सूर्यदृशो य इमान्यहानि पश्यंति न पराणीति वाभिभवति कर्मणा पणींश्च वणिजः॥
॥ २६॥ जीवान्नो अभि धेतनादित्यासः पुरा हथात्॥ कद्ध स्थ हवनश्रुतः॥ जीवतो नोऽभिधावतादि
त्याः पुरा हननात् क्व नु स्थ ह्वानश्रुत इति मत्स्यानां जालमापन्नानामेतदार्षं वेदयंते मत्स्या मधाउद
के स्यंदंते माद्यंतेऽन्योन्यं भक्षणायेति वा जालं जलचरं भवति जलेभवं वा जलेशयं वा अंकुरो ह स्वानं हूर
णमिस प्यस्य भवति॥ ऋण्वन्नंहूरणादुर्विन्त्यपि निगमो भवति॥ सप्त मर्यादाः कवयस्ततक्षुः स्तासा

नि॰रु॰६

के कामिदुर्घ्यं कुरो गात्॥ सप्तैव मर्यादाः कवयस्ततक्षुस्तासामेकामप्यभिगच्छन्नंहुरो भवति स्तेयं तल्पा
रोहणं ब्रह्महत्यां भ्रूणहत्यां सुरापानं दुष्कृतस्य कर्मणः पुनः पुनः सेवां पातकेऽनृतोद्यमिति बत इति
निपातः खेदानुकंपयोः॥२७॥ बतो बतासि यम नैव ते मनो हृदयं चाविदाम॥ अन्या किल त्वां कक्ष्येव यु
क्तं परिष्वजाते लिबुजेव वृक्षं॥ बतो बलादतीतो भवति दुर्बलो बतासि यम नैव ते मनो हृदयं च विजानीमो
ऽन्या किल त्वां परिष्वंक्ष्यते कक्ष्येव युक्तं लिबुजेव वृक्षं लिबुजा व्रततिर्भवति लीयते विभजंतीति व्रततिर्वर
णाच्च सयनाच्च ततनाच्च वातात्प्यमुदकं भवति वात एतदाप्याययति॥ पुनानो वाताप्यं विश्वश्चंद्रमित्य
पि निगमो भवति॥ वने न वायो न्यधायि चाकन्॥ वन इव वायो वेः पुत्रश्चायन्निति वा कामयमाना इति वा
देतिच यइतिच्च चकारत्रा कल्प्य उदात्तं त्वेवमाख्यातमभविष्यत् सुसमाप्तश्चार्थेरिथर्यतीतिसिद्धस्त
त्रेसूर्थकामयतइति वा॥ एषदेवो रथर्यतीत्यपि निगमो भवति॥२८॥ धेनुं न इषं पिन्वतमसंक्रां॥ अ

५८

संक्रमणीं॥ आधव आधवनात्॥ मतीनां च साधनं विप्राणां चाधवमित्यपि निगमो भवत्यनवब्रवो नव
क्षिप्तवचनः॥ विजेषकृदिंद्र इवानवब्रव इत्यपि निगमो भवति॥२९॥ अरायि काणे विकटे गिरिं ग
च्छ सदान्वे॥ शिरिंबिठस्य सत्वभिस्तेभिष्ट्वा चातयामसि॥ अरायिणि काणे विकटे काणो विक्रांतद
र्शन इत्यौपमन्यवः कणतेर्वा स्यादणूभाव कर्मणः कणतिः शब्दाणूभावे भाष्यतेऽनुकणतीति मात्रा
णूभावात्काणो दर्शनाणूभावात्काणो विकटो विक्रांतगतिरित्यौपमन्यवः कुटतेर्वा स्याद्विपरीत
स्य विकुटितो भवति गिरिं गच्छ सदानोनुवे शब्दकारिके॥ शिरिंबिठस्य सत्वभिः॥ शिरिंबिठो मेघः
शीर्यते बिठे बिठमंतरिक्षं बिठं वीरिटेन व्याख्यातं तस्य सत्वैरुदकैरिति स्यात्तेभिष्ट्वा चातयामोऽपि
वा शिरिंबिठो भारद्वाजः कालकर्णोपेतो लक्ष्मीर्निर्नाशयांचकार तस्य सत्वैः कर्मभिरिति स्यात्ते
भिष्ट्वा चातयामश्चातयतिर्नाशने पराशरः पराशीर्णस्य वसिष्ठस्य स्थविरस्य जज्ञे॥ पराशरः शत

नि॰ दृ॰ ६

५५

यातुर्वसिष्ठइत्यपिनिगमोभवतीन्द्रोपिपराशरउच्यतेपराशातयितायातूनां॥ इंद्रोयातूनामभव
त्पराशरइत्यपिनिगमोभवतिक्रिविर्दतीविकर्तनदंती॥ यत्रावोदिद्युद्रदतिक्रिविर्दतीत्यपिनिगमो
भवतिकरूळतीकृत्तदंती॥ अपिवादेवंकंचित्कृत्तदंतंदृष्ट्वैवमवक्ष्यत्॥ ३०॥ वामंवामंतआदुरेदेवोद
दात्वर्यमा॥ वामंपूषावामंभगोवामंदेवः करूळती॥ वामंवननीयंभवत्यादुरिरादरणात्तत्कैः करू
ळतीभगः पुरस्तात्तस्यान्वादेशइत्येकेपूषेत्यपरेसोदंतकोदंतकः पूषेतिचब्राह्मणं॥ दनोविश्वइंद्रमृ
ध्रवाचः॥ दानमनसोनोमनुष्यानिंद्रमृदुवाचः कुरु॥ अवीरामिवमामयंशरारुरभिमन्यते॥ अब
लामिवमामयंबालोभिमन्यतेसंशिशारिर्दुरिदंदुरिदंकामयमानोर्थापितदूर्थेभाष्यतेवसूयुरिंद्रो
वसुमानित्यत्रार्थः॥ अश्वयुर्गव्यूरथयुर्वसूयुरिंद्रइत्यपिनिगमोभवति॥ ३१॥ किंतेकृण्वंतिकीक
टेषुगावोनाशिरंदुह्रेनतपंतिघर्मं॥ आनोभरप्रमगंदस्यवेदोनैचाशाखंमघवन्रंधयानः॥ किंतेकु

५५

र्वंतिकीकटेषुगावः कीकटानामदेशोनार्यनिवासः कीकटाः किंकृताः किंक्रियाभिरितिप्रे
प्सावानैवचाशिरंदुह्रेनतपंतिघर्मंहर्म्यमाहरनः प्रमगंदस्यधनानिमगंदः कुसीदीमांग
दोमामागमिष्यतीतिचददातितदपत्यंप्रमगंदोत्यंतकुसीदिकुलीनः प्रमदकोवायोयमेवा
स्तिलोकोनपरइतिप्रेप्सुः पंडकोवापंडकः पंडगः प्रार्दकोवाप्रार्दयत्यांडावांडावाणाइवव्री
डयतितत्स्थंनैचाशाखंनीचाशाखोनीचैःशाखः शाखाः शक्नोतेराणिररणात्तंनोमघवन्रं
धयेतिरध्यतिर्वशगमनेबुंदइषुर्भवतिबुंदोवाभिंदोवाभयदोवाभासमानोद्रवतीतिवा॥ ३२॥
तुविक्षंतेसुकृतंसुमयंधनुः साधुर्बुंदोहिरण्ययः॥ उभातेबाहूरण्यासुसंस्कृतऋदूपेचिदृदू
वृधा॥ तुविक्षंबहुविक्षेपंमहाविक्षेपंवातेसुकृतंसुमयंसुसुखंधनुः साधयितातेबुंदोहिर
ण्ययउभौतेबाहूरण्यौरमणीयौसांग्राम्यौवऋदूपेअर्दनपातिनौगमनपातिनौशब्दपातिनौदूरपा

नि॰ पू॰ ६

५६

तिनो वा मर्मण्यर्दन वेधिनो गमन वेधिनो रात्र वेधिनो हर वेधिनो वा ॥ २३ ॥ निराविध्यद्गिरि
भ्य आधारयत्पक्वमोदनं ॥ इंद्रो बुंदं स्वाततं ॥ निरविध्यद्गिरिभ्य आधारयत्पक्वमोदनमुदक
दानं मेघं ॥ इंद्रो बुंदं स्वाततं ॥ बुंदं बुंदेन व्याख्यातं बुंदारकश्च ॥ २४ ॥ अयं यो होता किरु स यमस्य
कमप्यूहे यत्समंजंति देवाः ॥ अहरहर्जायते मासि मास्यथा देवा दधिरे हव्यवाहं ॥ अयं यो होता
कर्त्ता स यमस्य कमप्यूहेन्नमभिवहति यत्समंजुवंति देवा अहरहर्जायते मासे मासे ईं मासे अर्ध
मासे वाथ देवा निदधिरे हव्यवाहमुल्बमूर्णोतेर्वृणोतेर्वा ॥ महत्तदुल्बं स्थविरं तदासीद्येपिनिग
मोभवस्थ वीसमपगतभासमपहृतभासमनंतर्हितभासंगतभासं वा ॥ २५ ॥ हिमेनाग्निं घ्रंसम
वारयेथां पितुमतीमूर्जमस्मा अधत्तं ॥ ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति ॥
हिमेनोदकेन ग्रीष्मांते ग्निं घ्रंसमहरवारयेथामन्नवतीं चास्मा ऊर्जमधत्तमग्नये यो यमृबीसेप

नि॰ पू॰ ६

हे

५७

हे

१५।

थिव्यामग्निरंतरोषधिवनस्पतिष्वप्सु तमुन्निन्यथुः सर्वगणं सर्वनामानं गणो गणनाद्गुणश्च यद्वृष्ट
ओषधय उद्यंति प्राणिनश्च पृथिव्यां तदश्विनौ रूपं तेनैनौ स्तौति स्तौति ॥ २६ ॥ ॥ त्वमग्ने लातृणाउ
हृतजास उपलप्रक्षिणी कारुरहमस्मि तेश्चार्यं तद्वाश्चत्वं हि सोमानं स्वरणमिंद्रा सोमा कृणुध्व पाजसा
अध्वरे स्तिहि वो स्त्तेत्स त्तेप्र वो छ स्त प्र स्तुजे तुजेयो अस्मा अस्माइत्तन्नस्तुरीपं हि नो तानो मत्रो मात्वान
पापासो यवरं केण जीवान्नो बतो बतासि धेनुं नो राधिकाणे वामं वामं किंते तुविक्षंते निराविध्यदयं यो
हिमेनाग्निं षट्त्रिंशत् ॥ ॥ इति निरुक्ते पूर्वषट्के षष्ठोध्यायः ॥ ॥ इति निरुक्ते पूर्वषट्कः समाप्तः ॥ ॥
॥ संवत् १८४३ पिंगळनाम संवत्सरे फाल्गुन शुक्ल षष्ठी गुरुवासरे तद्दिने भउकंबकरोपनामक चिंतामण
दीक्षितेन काश्यां विश्वेश्वरसंनिधौ लिखितं स्वार्थं परोपकारार्थं च ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥
॥ भउकंबकरोपनामक पांडुरंगदीक्षितस्येदं पुस्तकं ॥ ॥ श्रीकाशीविश्वेश्वरार्पणमस्तु ॥ ॥ ॥

नि.पू.६

५७

॥इतिनिरुक्तेपूर्वषट्कःसमाप्तः॥

५७

नि.उ.१

१

॥अथनिरुक्तउत्तरषट्कप्रारंभः॥

१

नि॰उ॰१

श्रीमहागणाधिपतयेनमः॥ ॥ॐ॥ ॥अथातोदैवतंतद्यानिनामानिप्राधान्यस्तुतीनांदेवतानां
तद्दैवतमित्याचक्षतेसैषादेवतोपपरीक्षा यत्काम ऋषिर्यस्यांदेवतायामार्थपत्यमिच्छन्स्तुतिंप्रयुंक्ते
तद्दैवतःसमंत्रोभवतितास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्चतत्रपरोक्षकृताः
सर्वाभिर्नामविभक्तिभिर्युज्यंतेप्रथमपुरुषैश्चाख्यातस्य॥१॥ इंद्रोदिवइंद्रईशेपृथिव्याइंद्रमि
द्गाथिनोबृहदिंद्रेणैतेतृत्सवोवेविषाणाइंद्रायसामगायतनेंद्रादृतेपवतेधामकिंचनेंद्रस्यनुवी
र्याणिप्रवोचमिंद्रेकामाअयंसतेत्यथप्रत्यक्षकृतामध्यमपुरुषयोगास्त्वमितिचैतेनसर्वना
म्नात्वमिंद्रबलादधिविनइंद्रमृधोजहीत्यथापिप्रत्यक्षकृताःस्तोतारोभवंतिपरोक्षकृतानि
स्तोतव्यानिमाचिदन्यद्विशंसतकण्वाअभिप्रगायतोपप्रेतकुशिकाश्चेतयध्वमित्यथाध्या
त्मिक्यउत्तमपुरुषयोगाअहमितिचैतेनसर्वनाम्नायथैतदिंद्रोवैकुंठोलवसूक्तंवागांभृणी

यमिति॥२॥ परोक्षकृताः प्रत्यक्षकृताश्चमंत्राभूयिष्ठा अल्पश आध्यात्मिका अथापिस्तुतिरेवभ
वतिनाशीर्वादइंद्रस्यनुवीर्याणिप्रवोचमितियथैतस्मिन्सूक्तेऽथाप्याशीरेवनस्तुतिः सुचक्षा अह
मक्षीभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांभूयासमितितदेतद्बहुलमाध्वर्यवेयाज्ञेषुचमंत्रेष्व
थापिशपथाभिशापौ॥ अद्यामुरीययदियातुधानो अस्मि॥ अधासवीरैर्दशभिर्वियूया इत्यथापिक
स्यचिद्भावस्याचिख्यासा॥ नमृत्युरासीदमृतंनतर्हि॥ तम आसीत्तमसागूळ्हमग्रे॥ अथापिपरिदेव
नाकस्माच्चिद्भावात्॥ सुदेवो अद्यप्रपतेदनावृत्॥ नविजानामियदिवेदमस्मीत्यथापिनिंदाप्रशंसे॥
केवलाघोभवतिकेवलादी॥ भोजस्येदंपुष्करिणीववेश्मेत्येवमक्षसूक्तेद्यूतनिंदाचकृषिप्रशंसाचैव
मुच्चावचैरभिप्रायैरृषीणांमंत्रदृष्टयोभवंति॥३॥ तद्येनादिष्टदेवतामंत्रास्तेषुदेवतोपपरीक्षायद्देवतः
सयज्ञोवायज्ञांगंवातद्देवताभवंत्यथान्यत्रयज्ञात्प्राजापत्या इतियाज्ञिकानाराशंसा इतिनैरुक्ता अपि

निउ

वासा काम देवता स्यात्सा यो देवता वास्ति ह्याचारो बहुलं लोके देवदेवत्यमतिथिदेवत्यं पितृदेवत्यं याज्ञदै
वतो मंत्र इत्यपि ह्यदेवता देवतावत्स्तूयंते यथाश्वप्रभृतीन्योषधिपर्यंतान्यथाप्यष्टौ द्वंद्वानि स नमन्येतागं
तूनिवार्थान्देवतानां प्रत्यक्षदृश्यमेतद्भवति माहाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते एकस्यात्मनोन्ये

२

देवाः प्रत्यंगानि भवंत्यपि च सत्वानां प्रकृतिभूमभिर्ऋषयः स्तुवंतीत्याहुः प्रकृतिसार्वनाम्याच्चेतरेतरज
न्मानो भवंतीतरेतरप्रकृतयः कर्मजन्मान आत्मजन्मान आत्मैवैषां रथो भवत्यात्माश्वा आत्मायुधमा
त्मेषव आत्मा सर्वं देवस्य देवस्य ॥४॥ तिस्र एव देवता इति नैरुक्ता अग्निः पृथिवीस्थानो वायुर्वेंद्रो वांतरि
क्षस्थानः सूर्यो द्युस्थानस्तासां माहाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवंत्यपि वा कर्मपृथक्त्वा

२

द्यथा होताध्वर्युर्ब्रह्मोद्गातेत्यप्येकस्य सतोपि वा पृथगेव स्युः पृथग्घि स्तुतयो भवंति तथाभिधानानि य
थो एतत्कर्मपृथक्त्वादिति बहवोपि विभज्य कर्माणि कुर्युस्तत्र संस्थानैकत्वं संभोगैकत्वं चोपेक्षितव्यं यथा
गे

पृथिव्यां मनुष्याः पशवो देवा इति स्थानैकत्वं संभोगैकत्वं च दृश्यते यथा पृथिव्याः पर्जन्येन च
वाय्वादित्याभ्यां च संभोगोग्निना चेतरस्य लोकस्य तत्रैतन्नरराष्ट्रमिव ॥५॥ अथाकारचिंतनं देव
तानां पुरुषविधाः स्युरित्येकं चेतनावद्धि स्तुतयो भवंति तथाभिधानान्यथापि पौरुषविधि
कैरंगैः संस्तूयंते ॥ ऋष्वा त इंद्र स्थविरस्य बाहू यत्ते गृभ्णा मघवन्काशिरित्ते ॥ अथापि पौरु
षविधिकैर्द्रव्यसंयोगैः ॥ आ द्वाभ्यां हरिभ्यामिंद्र याहि ॥ कल्याणीर्जाया सुरणं गृहे ते ॥ अथापि
पौरुषविधिकैः कर्मभिः ॥ अद्धींद्र पिब च प्रस्थितस्य ॥ आश्रुत्कर्ण श्रुधी हवं ॥ अपुरुषविधाः स्युरि
त्यपरमपि तु यद्दृश्यते ॥६॥ अपुरुषविधं तद्यथाग्निर्वायुरादित्यः पृथिवी चंद्रमा इति यथो एत
च्चेतनावद्धि स्तुतयो भवंतीत्यचेतनान्यप्येवं स्तूयंते यथाक्षप्रभृतीन्योषधिपर्यंतानि यथो ए
तत्पौरुषविधिकैरंगैः संस्तूयंत इत्यचेतनेष्वप्येतद्भवत्यभिक्रंदंति हरितेभिरासभिरिति ग्रावस्तु

नि॰उ॰

तिर्यंथो एतस्तोरूषविधिके इ॑ व्यसंयोगो रिस्येतदपिता दृश्यामेवस्करवं रथं युयुजे सिंधुरश्विनमितिनदी
स्कृतिर्यथोएतस्तो रूषविधिकेः कर्मभिरित्येतदपिता दृश्यामेव होतुश्चित्पूर्वे हविरद्यमात्रा तेतिग्रावस्तु
तिरेवापिवोभयविधाः स्युरपिवापुरुषविधानामेव सतां कर्मात्मान एते स्युर्यथा यज्ञो यजमानस्यैष
चाख्यानसमयः॥७॥ तिस्र एव देवता इत्युक्तं पुरस्तात्तासां भक्ति साहचर्यं व्याख्यास्यामोथैतान्यग्नि
भक्तीन्ययं लोकः प्रातःसवनं वसंतो गायत्री त्रिवृत्स्तोमो रथंतरं साम येच देवगणाः समाम्नाताः प्रथ
मे स्थाने ग्नायी पृथिवीळेति स्त्रियोथास्य कर्म वहनं च हविषामावाहनं च देवतानां यच्च किंचिद्दार्ष्टिवि
षयिकमग्निकर्मैव तदथास्य संस्तविका देवा इंद्रः सोमो वरुणः पर्जन्य ऋतवः आग्नावैष्णवं च हविर्न
त्वृक् संस्तविकी दशतयीषु विद्यतेऽथाप्याग्नापौष्णं हविर्न तु संस्तवस्तत्रैतां विभक्ति स्तुतिमृचमु
दाहरंति॥८॥ पूषा त्वेतश्च्यावयतु प्रविद्वाननष्टपशुर्भुवनस्य गोपाः॥ स त्वैतेभ्यः परिददत्पितृभ्यो

व ३

ग्निर्देवेभ्यः सुविदत्रियेभ्यः॥ पूषा त्वेतः प्रच्यावयतु विद्वाननष्टपशुर्भुवनस्य गोपा इत्येष हि सर्वेषां
भूतानां गोपायिता दित्यः स त्वैतेभ्यः परिददत्पितृभ्य इति सांशयिकस्तृतीयः पादः पूषा पुरस्तात्त
स्यान्वादेशा इत्येकमग्निरुपरिष्टात्तस्य प्रकीर्तनेत्यपरं॥ अग्निर्देवेभ्यः सुविदत्रियेभ्यः॥ सुवि
दत्रं धनं भवति विंदतेर्वैकोपसर्गाद्ददातेर्वा स्याद्द्व्युपसर्गादिति॥९॥ अथैतानींद्रभक्तीन्यंतरिक्षलोको
माध्यंदिनं सवनं ग्रीष्मस्त्रिष्टुप् पंचदशस्तोमो बृहत्साम येच देवगणाः समाम्नाता मध्यमे स्थाने या
श्च स्त्रियोथास्य कर्म रसानुप्रदानं वृत्रवधो या च का च बलकृतिरिंद्रकर्मैव तदथास्य संस्तविका दे
वा अग्निः सोमो वरुणः पूषा बृहस्पतिर्ब्रह्मणस्पतिः पर्वतः कुत्सो विष्णुर्वायुरथापि मित्रो वरुणेन
संस्तूयते पूष्णा रुद्रेण च सोमो ग्निना च पूषा वातेन च पर्जन्यः॥१०॥ अथैतान्यादित्यभक्तीन्यसौ
लोकस्तृतीयसवनं वर्षा जगती सप्तदशस्तोमो वैरूपं साम येच देवगणाः समाम्नाता उत्तमे स्थाने
याश्च स्त्रियोथास्य कर्म रसादानं रश्मिभिश्च रसाधारणं यच्च किंचित्प्रवल्हितमादित्यकर्मैव तच्चंद्रमसा
स्य

नि·उ·

४

वायुनासंवत्सरेणेतिसंस्तवएतेष्वेवस्थानव्यूहेष्वृतुछंदःस्तोमपृष्ठस्यभक्तिशेषमनुक
ल्पयीतशरदनुष्टुबेकविंशस्तोमोवैराजंसामेतिपृथिव्यायतनानिहेमंतःपंक्तिस्त्रिणवस्तोमः
शाक्वरंसामेत्यंतरिक्षायतनानिशिशिरोतिछंदास्त्रयस्त्रिंशस्तोमोरैवतंसामेतिद्युभक्तीनि॥
॥११॥मंत्रामननाच्छंदांसिछादनात्स्तोमस्तवनाद्यजुर्यजतेःसामसंमितमृचास्यतेर्वर्चासमं
मेनइतिनैदानागायत्रीगायतेःस्तुतिकर्मणस्त्रिगमनावाविपरीतागायतोमुखादुदपतदिति
चब्राह्मणमुष्णिगुत्स्नाताभवतिस्निह्यतेर्वास्यात्कांतिकर्मणउष्णीषिणीवेत्यौपमिकमुष्णीषंस्ना
यतेःककुप्ककुभिनीभवतिककुप्चकुब्जश्चकुजतेर्वोब्जतेर्वानुष्टुबनुष्टोभनाद्गायत्रीमेवत्रि
पदांसतींचतुर्थेनपादेनानुष्टोभतीतिचब्राह्मणंबृहतीपरिबर्हणात्पंक्तिःपंचपदात्रिष्टुप्स्तोभ
त्युत्तरपदाकातुत्रितास्यात्तीर्णतमंछंदस्त्रिवृद्वज्रस्तस्यस्तोभनीतिवायत्त्रिरस्तोभत्तत्त्रिष्टुभस्त्रि
ष्टुप्त्वमितिविज्ञायते॥१२॥जगतीगततमंछंदोजलचरगतिर्वाजल्गल्यमानोसृजदितिचब्राह्मणंवि

व

४

राड्विराजनाद्वाविराधनाद्वाविप्रापणाद्वाविराजनात्संपूर्णाक्षराविराधनादूनाक्षराविप्रापणादधिकाक्ष
रापिपीलिकमध्येत्यौपमिकंपिपीलिकापेलतेर्गतिकर्मणइतीमादेवताअनुक्रांताःसूक्तभाजोहविर्भा
जऋग्भाजश्चभूयिष्ठाःकाश्चिन्निपातभाजोथोताभिधानैःसंयुज्यहविश्चोदयतींद्रायवृत्रघ्नइंद्राय
वृत्रतुरइंद्रायांहोमुचइतितान्यप्येकेसमामनंतिभूयांसितुसमाम्नानाद्यत्तुसंविज्ञानभूतंस्यात्प्रा
धान्यस्तुतितत्समामनेथोतकर्मभिर्ऋषिर्देवताःस्तौतिवृत्रहापुरंदरइतितान्यप्येकेसमामनंतिभू
यांसितुसमाम्नानाद्व्यंजनमात्रंतुतत्तस्याभिधानस्यभवतियथाब्राह्मणायबुभुक्षितायौदनंदेहि
स्नातायानुलेपनंपिपासतेपानीयमिति॥१३॥अथातोनुक्रमिष्यामोऽग्निःपृथिवीस्थानस्तंप्रथमं
व्याख्यास्यामोऽग्निःकस्मादग्रणीर्भवत्यग्रंयज्ञेषुप्रणीयतेऽगंनयतिसन्नममानोऽक्नोपनोभवती
तिस्थौलाष्ठीविर्नक्नोपयतिनस्नेहयतित्रिभ्यआख्यातेभ्योजायतइतिशाकपूणिरितादक्ताद्दग्धाद्वानी

नि·उ·१

५

तां त्सरवल्वेतेरकारमादत्तेगकारमनस्कैवीं दहतेर्वानीः परस्तस्यैषाभवति ॥१४॥ अग्निमीळेपुरोहि
तं यज्ञस्य देवमृत्विजं ॥ होतारं रत्नधातमं ॥ अग्निमीळेग्निं याचामीळिरध्येषणा कर्मा पूजा कर्मा वा
पुरोहितो व्याख्यातो यज्ञश्च देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता हो
तारं ह्वातारं जुहोतेर्होतेत्यौर्णवाभो रत्नधातमं रमणीयानां धनानां दातृतमं तस्यैषापराभवति ॥१५॥
अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत ॥ स देवाँ एह वक्षति ॥ अग्निर्यः पूर्वैर्ऋषिभिरीळितव्यो वंदि
तव्योऽस्माभिश्च नवतरैः स देवानिहावहत्विति स न मन्येतायमेवाग्निरित्यप्येते उत्तरे ज्योतिषी
अग्नी उच्येते ततो नु मध्यमः ॥१६॥ अभिप्रवंत समनेव योषाः कल्याण्यः स्मयमानासो अग्निं ॥ घृ
तस्य धाराः समिधो नसंत ता जुषाणो हर्यति जातवेदाः ॥ अभिनवंत समनसइव योषाः समनं समन
नाद्वा संमाननाद्वा कल्याण्यः स्मयमानासो अग्निमित्यौपमिकं घृतस्य धारा उदकस्य धाराः समि

धो नसंत नसतिराप्नोति कर्मा वा नमति कर्मा वा ॥ ताज्जुषाणो हर्यति जातवेदाः ॥ हर्यतिः प्रेप्साकर्मा विह
र्यतीति समुद्राद्दूर्मिर्मधुमां उदारदित्यादित्यमुक्तं मन्यंते समुद्राद्ध्येषोद्भ्य उदेतीति च ब्राह्मणमथापि
ब्राह्मणं भवत्यग्निः सर्वा देवता इति तस्योत्तरा भूयसे निर्वचनाय ॥१७॥ इंद्रं मित्रं वरुणमग्निमाहु
रथो दिव्यः स सुपर्णो गरुत्मान् ॥ एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुः ॥ इममेवाग्निं महां
तमात्मानमेकमात्मानं बहुधा मेधाविनो वदंतींद्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मंतं दिव्यो दिविजो ग
रुत्मान्गारणवान्गुर्वात्मा महात्मेति वा यस्तु सूक्तं भजते यस्मै हविर्निरुप्यते यमेव सो ग्निर्निपातमेवैते उ
त्तरे ज्योतिषी एतेन नामधेयेन भजेते ॥१८॥ जातवेदाः कस्माज्जातानि वेद जातानि वैनं विदुर्जाते जाते
विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविंदतेति तज्जातवे
दसो जातवेदस्त्वमिति ब्राह्मणं तस्मात्सर्वानृतून्पशवो ग्निमभिसर्पंतीति च तस्यैषा भवति ॥१९॥ प्र

नि॰ ७॰ १

६

नूनं जातवेदसमश्वं हिनोत वाजिनं ॥ इदं नो बर्हिरासदे ॥ प्रहिणुत जातवेदसं कर्मभिः समश्नुवा
नमपि वोपमार्थे स्यादश्वमिव जातवेदसमितीदं नो बर्हिरासीदत्विति तदेतदेकमेव जातवेदसं
गायत्रं तृचं दशतयीषु विद्यते यत्तु किंचिदाग्नेयं तज्जातवेदसानां स्थाने युज्यते स न मन्येता
यमेवाग्निरित्यप्येते उत्तरे ज्योतिषी जातवेदसी उच्येते ततो नु मध्यमः ॥ अभिप्रवंत समनेव
योषा इति तत्पुरस्ताद्व्याख्यातमथासावादित्य उदु त्यं जातवेदसमिति तदुपरिष्टाद्व्याख्यास्या
मो यस्तु सूक्तं भजते यस्मै हविर्निरुप्यते ऽयमेव सोग्निर्जातवेदा निपातमेवैते उत्तरे ज्योतिषी ए
तेन नामधेयेन भजेते ॥ २० ॥ वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयंतीति वा ऽपि
वा विश्वानर एव स्यात्प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरस्तस्यैषा भवति ॥ २१ ॥ वैश्वान
रस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ॥ इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते

६

सूर्येण ॥ इतो जातः सर्वमिदमभिविपश्यति वैश्वानरः संयतते सूर्येण राजा यः सर्वेषां भूतानामभि
श्रयणीयस्तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्यामेति तत्को वैश्वानरो मध्यम इत्याचार्या वर्षक
र्मणा ह्येनं स्तौति ॥ २२ ॥ प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचंते ॥ वैश्वानरो दस्युमग्निर्ज
घन्वाँ अधूनोत्काष्ठा अव शंबरं भेत् ॥ प्रब्रवीमि तन्महत्वं माहाभाग्यं वृषभस्य वर्षितुरपां यं पूर
वः पूरयितव्या मनुष्या वृत्रहणं मेघहनं सचंते सेवंते वर्षकामा दस्युर्दस्यतेः क्षयार्थादुपदस्यंत्यस्मि
न्नसा उपदासयति कर्माणि तमग्निर्वैश्वानरो घ्नन्नवाधूनोदपः काष्ठा अभिनच्छंबरं मेघमथासा
वादित्य इति पूर्वे याज्ञिका एषां लोकानां रोहेण सवनानां रोह आम्नातो रोहात्प्रत्यवरोहश्चिकीर्षित
स्तामनुकृतिं होताग्निमारुते शस्त्रे वैश्वानरीयेण सूक्तेन प्रतिपद्यते सोपि न स्तोत्रियमाद्रियेताग्ने
यो हि भवति ततः आगच्छति मध्यस्थाना देवता रुद्रं च मरुतश्च ततोग्निमिहस्थानमत्रैव स्तोत्रियं शंस

नि॰उ॰

७

स्यथापि वैश्वानरीयो द्वादशकपालो भवत्येतस्य हि द्वादशविधं कर्माथापि ब्राह्मणं भवत्यसौ वा आदित्यो
ऽग्निर्वैश्वानर इत्यथापि निवित्सौर्यवैश्वानरी भवत्या यो द्यां भात्या पृथिवीमित्येषा हि द्यावापृथिव्यावाभा
सयत्यथापि छांदोमिकं सूक्तं सौर्यवैश्वानरं भवति दिविपृष्टो अरोचतेत्येषा हि दिविपृष्टो अरोचतेत्यथा
पि हविष्पान्तीयं सूक्तं सौर्यवैश्वानरं भवत्ययमेवाग्निर्वैश्वानर इति शाकपूणिर्विश्वानरावित्येते उत्त
रे ज्योतिषी वैश्वानरोऽयं यत्ताभ्यां जायते कथं त्वयमेताभ्यां जायत इति यत्र वैद्युतः शरणमभिहन्ति यावद
नुपात्तो भवति मध्यमधर्मैव तावद्भवत्युदकेंधनः शरीरोपशमनः उपादीयमान एवायं संपद्यत उदको
पशमनः शरीरदीप्तिरथादित्यादुदीचि प्रथमसमावृत्त आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे
यत्र शुष्कगोमयमसंस्पर्शयन्धारयति तत्प्रदीप्यते सोऽयमेव संपद्यतेऽथाप्याह वैश्वानरो यतते सूर्येणे
ति न तु पुनरात्मनात्मानं संयतते ऽन्येनैवान्यः संयतत इत इममादधात्यमुतोमुष्य रश्मयः प्रादुर्भवंतीतो

७

स्यार्चिषस्तयोर्भासोः संसंगं दृष्ट्वैवमवक्ष्यदथ यान्येतान्यौत्तमिकानि सूक्तभागानि वा सावित्रा
णि वा सौर्याणि वा पौष्णानि वा वैष्णवानि वा वैश्वदेव्यानि वा तेषु वैश्वानरीयाः प्रवादा अभविष्यन्ना
दित्यकर्मणा चैनमस्तोष्यन्नित्युदेषीत्यस्तमेषीति विपर्येषीत्याग्नेयेष्वेव हि सूक्तेषु वैश्वानरीयाः प्र
वादा भवन्त्यग्निकर्मणा चैनं स्तौतीति वहसीति पचसीति दहसीतियथो एतद्वर्षकर्मणा ह्येनं स्तो
तीत्यस्मिन्नप्येतदुपपद्यते॥ समानमेतदुदकमुच्चैत्यव चाहभिः॥ भूमिं पर्जन्या जिन्वंति दिवं जि
न्वंत्यग्नयः॥ इति सा निगदव्याख्याता॥ २२॥ कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतं
ति॥ त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते॥ कृष्णं निरयणं रात्रिरादित्यस्य हरयः सु
पर्णा हरणा आदित्यरश्मयस्ते यदामुतोर्वाचः पर्यावर्त्तंते सहस्थानादुदकस्यादित्याद्दथघृतेनो
दकेन पृथिवी व्युद्यते घृतमित्युदकनाम जिघर्त्तेः सिंचतिकर्मणोथापि ब्राह्मणं भवत्यग्निर्वा इतो वृ

नि०उ०१

ष्टिं समीरयति धामच्छदिव खलु वै भूत्वा वर्षति मरुतः स्तुतां वृष्टिं नयंति यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्त्ततेऽथ वर्षतीति यथो एतद्रोहात्प्रत्यवरोहश्चिकीर्षित इत्याम्नायवचनादेतद्भवति यथो एतद्वैश्वानरीयो द्वादशकपालो भवतीत्यनिर्वचनं कपालानि भवंत्यस्ति हि सौर्य एककपालः पंचकपालश्च यथो एतद्ब्राह्मणं भवतीति बहुभक्तिवादीनि हि ब्राह्मणानि भवंति पृथिवी वैश्वानरः संवत्सरो वैश्वानरो ब्राह्मणो वैश्वानर इति यथो एतन्निवित्सौर्यवैश्वानरी भवतीत्यस्यैव सा भवति यो विड्भ्यो मानुषीभ्यो दीदेदित्येष हि विड्भ्यो मानुषीभ्यो दीप्यते यथो एतच्चाक्षौमिकं सूक्तं सौर्यवैश्वानरं भवतीत्यस्यैव तद्भवति जमदग्निभिराहुत इति जमदग्नयः प्रजमिताग्नयो वा प्रज्वलिताग्नयो वा तैरभिहुतो भवति यथो एतद्धविष्पांतीयं सूक्तं सौर्यवैश्वानरं भवतीत्यस्यैव तद्भवति॥ ॥२४॥ हविष्पांतमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ॥ तस्य भर्मणे भुवनाय देवा धर्मणे

८

कं स्वधया पप्रथंत॥ हविर्यत्पानीयमजरं सूर्यविदि दिविस्पृश्यभिहुतं जुष्टमग्नौ तस्य भरणाय च भावनाय च धारणाय चैतेभ्यः सर्वेभ्यः कर्मभ्यो देवा इममग्निमन्नेनापप्रथंताथाप्याह॥ ॥२५॥ अपामुपस्थे महिषा अगृभ्णत विशो राजानमुपतस्थुर्ऋग्मियं॥ आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः॥ अपामुपस्थ उपस्थाने महत्यंतरिक्षलोक आसीना महांत इति वा गृहीतवंतो माध्यमिका देवगणा विश इव राजानमुपतस्थुर्ऋग्मियमृग्मंतमिति वार्चनीयमिति वा पूजनीयमिति वाहरद्यं दूतो देवानां विवस्वत आदित्याद्विवस्वान्विवासनवान्प्रेरितवतः परागतादपि वास्याग्नेर्वैश्वानरस्य मातरिश्वानमाहर्त्तारमाह मातरिश्वा वायुर्मातर्यंतरिक्षे श्वसिति मातर्याश्वनितीति वाथैनमेताभ्यां सर्वाणि स्थानान्यभ्यापादं स्तौति॥२६॥ मूर्द्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्॥ मायामू तु यज्ञियानामेतामपो यत्

नि.उ.१

९

र्णाश्चरति प्रजानन्॥ मूर्द्धा मूर्त्तमस्मिन्धीयते मूर्द्धा यः सर्वेषां भूतानां भवति नक्तमग्निस्ततः सू
र्यो जायते प्रातरुद्यन्स एव प्रज्ञास्ते तां मन्यन्ते यज्ञियानां देवानां यज्ञसंपादिनामपो यत्कर्म चरति
प्रजानन्सर्वाणि स्थानान्यनुसंचरति त्वरमाणस्तस्योत्तरा भूयसे निर्वचनाय॥२७॥ स्तोमेन हि
दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्रां॥ तमू अकृण्वन्त्रेधा भुवे कं स ओषधीः
पचति विश्वरूपाः॥ स्तोमेन हि दिवि देवासो अग्निमजनयञ्छक्तिभिः कर्मभिर्द्यावापृथिव्यो
रापूरणं तमकुर्वंस्त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिर्यदस्य दिवि तृतीयं तदसा
वादित्य इति हि ब्राह्मणं तदग्नी कृत्य स्तौत्यथैनमेतयादित्यी कृत्य स्तौति॥२८॥ यदेदेनमदधुर्य
ज्ञियासो दिवि देवाः सूर्यमादितेयं॥ यदा चरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा॥
यदैनमदधुर्यज्ञियाः सर्वे दिवि देवाः सूर्यमादितेयमदितेः पुत्रं यदा चरिष्णू मिथुनौ प्रादुरभूतां सर्व

९

दा सहचारिणौ उषाश्चादित्यश्च मिथुनौ कस्मान्मिनोति श्रयतिकर्मा थु इति नामकरणः स्थकारो वा नयतिः प
रो वा निर्वासमाश्रितावन्योन्यं नयतो वनुतो वा मनुष्यमिथुनावप्येतस्मादेव मेथन्तावन्योन्यं वनुत इति वा ऽथै
नमेतयाग्नी कृत्य स्तौति॥२९॥ यत्रा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद॥ आ शेकुरित्सधमादं स
खायो नक्षन्त यज्ञं क इदं वि वोचत्॥ यत्र विवदेते दैव्यौ होतारावयं चाग्निरसौ च मध्यमः कतरो नौ यज्ञे भूयो
वेदेत्याशक्नुवन्ति तत्सहमदनं समानाख्याना ऋत्विजस्तेषां यज्ञं समश्नुवानानां को न इदं विवक्ष्यतीति त
स्योत्तरा भूयसे निर्वचनाय॥३०॥ यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो वसते मातरिश्वः॥ तावद्दधात्यु
प यज्ञमायन्ब्राह्मणो होतुरवरो निषीदन्॥ यावन्मात्रमुषसः प्रत्यक्तं भवति प्रतिदर्शनमिति वा ऽस्यु
पमानस्य संप्रत्यर्थे प्रयोग इहेव निधेहीति यथा सुपर्ण्यः सुपतना एता रात्रयो वसते मातरिश्वन्ज्योति
र्वर्णस्य तावदुपदधाति यज्ञमागच्छन्ब्राह्मणो होतास्याग्नेर्होतुरवरो निषीदन्होतृजपस्त्वनग्निर्वैश्वान

नि·उ·१

१०

रायोभवतिदिवसवितरेतंत्वावृणतेऽग्निंहोत्रायसहपित्रावैश्वानरेणेतीममेवाग्निंसवितार
माहसर्वस्यप्रसवितारंमध्यमंवोत्तमंवापितरंयस्तुसूक्तंभजतेयस्मैहविर्निरुप्यतेऽयमे
वसोऽग्निर्वैश्वानरोनिपातमेवैतेउत्तरेज्योतिषीएतेननामधेयेनभजेतेभजेते॥ ॥३१॥ ॥
॥अथातोदैवतमिंद्रोदिवःपरोक्षकृतास्तद्धेतिस्तौथाकारान्वितंनमपुरुषविधंतत्तिस्त्रए
वदेवताऽऽहस्कस्तंपूषात्वाथैतानींद्रश्चस्तोन्यथैतान्यादित्यभक्तीनिमंत्रामननाज्जगतीग
ततमथातोनुक्रमिष्यामोऽग्निमीळेऽग्निःपूर्वेभिरभिप्रवर्तंतेइंद्रमित्रंजातवेदाःकस्मात्प्र
नूनंजातवेदसंवैश्वानरःकस्माद्वैश्वानरस्यप्रन्नूमहित्वंकृत्स्नंनियानंहविष्मंतमपा
मुपस्थेमूर्द्धाभुवःस्तोमैर्नहियदेदैनंयआवदेतेयावन्मात्रमेकत्रिंशत्॥ ॥ ॥
॥ ॥इतिनिरुक्तेउत्तरषट्केप्रथमोध्यायः॥ ॥इतिनिरुक्तेउत्तरषट्केप्रथमोध्यायःसमाप्तः॥

९

॥ॐ॥ ॥द्रविणोदाःकस्माद्धनंद्रविणमुच्यतेयदेनदभिद्रवंतिबलंवाद्रविणंयदेनेनाभिद्रवंतित
स्यदाताद्रविणोदास्तस्यैषाभवति॥१॥द्रविणोदाद्रविणसोग्रावहस्तासोअध्वरे॥यज्ञेषुदेवमी
ळते॥द्रविणोदायस्त्वंद्रविणसइतिद्रविणसादिनइतिवाद्रविणसानिनइतिवाद्रविणसस्तस्मात्सि
बद्धितिवा॥यज्ञेषुदेवमीळते॥याचंतिस्तुवंतिवर्द्धयंतिपूजयंतीतिवातत्कोद्रविणोदाइंद्रइतिक्रौ
ष्टुकिःसबलधनयोर्दातृतमस्तस्यचसर्वाबलकृतिरोजसोजातमुतमन्यएनमितिचाहाथाप्यग्निं
द्राविणोदसमाहैषपुनरेतस्माज्जायते॥योअश्मनोरंतरग्निंजजानेत्यपिनिगमोभवत्यथाप्यृ
तुयाजेषुद्राविणोदसाःप्रवादाभवंतितेषांपुनःपात्रस्यैंद्रपानमितिभवत्यथाप्येनंसोमपाने
नस्तौत्यथाप्याहद्रविणोदाःपिबतुद्राविणोदसइत्ययमेवाग्निर्द्रविणोदाइतिशाकपूणिरा
ग्नेयेष्वेवहिसूक्तेषुद्राविणोदसाःप्रवादाभवंति॥देवाअग्निंधारयन्द्रविणोदामित्यपिनि

ने॰उ॰२ गमोभवतियथोएतत्तद्बलधनयोर्ददतितमहंतिसर्वासुदेवतास्वैश्वर्यंविद्यतेयथोएतदोजसो
जातमुतमन्यएनमितिचाहैषह्यग्निरोजसाबलेनमथ्यमानोजायतेतस्मादेनमाहसहस
स्पुत्रंसहसःसूनुंसहसोयहुंयथोएतदग्निंद्राविणोदसमाहेत्यृत्विजोत्रद्रविणोदसउच्यंतेहवि

११ षोदातारस्तेचैनंजनयंति॥ऋषीणांपुत्रोअधिराजएषइत्यपिनिगमोभवतियथोएतत्तेषांपुनः
पात्रस्थैंद्रपानमितिभवतीतिभक्तिमात्रंतद्भवतियथावायव्यानीतिसर्वेषांसोमपात्राणांयथो
एतत्सोमपानेनैनंस्तौतीत्यस्मिन्नप्येतदुपपद्यते॥सोमंपिबमंदसानोगणश्रिभिरित्यपिनिगमो
भवतियथोएतद्द्रविणोदाःपिबतुद्राविणोदसइत्यस्यैवतद्भवति॥२॥मेद्यंतुतेवह्नयोयेभिरीय
सेरिषण्यन्वीळयस्वावनस्पते॥आयूयाधृष्णोअभिगूर्यात्वंनेष्ट्रात्सोमंद्रविणोदःपिबऋतु ११
भिः॥मेदंतुतेवह्नयोवोढारोयैर्यास्यरिष्यंदृढीभवआयूयधृष्णोअभिगूर्यत्वंनेष्ट्रीयाद्धिष्ण्या

द्धिष्ण्योधिषण्योधिषणाभवोधिषणावाग्धिषेर्दधात्यर्थेधीसादिनीवाधीसानिनीतिवाव
नस्पतइत्येनमाहैषहिवनानांपातावापालयितावावनंवनोतेःपिबऋतुभिःकालैः॥३॥अथा
थातआप्रियआप्रियःकस्मादाप्नोतेःप्रीणातेर्वाप्रीभिराप्रीणातीतिचब्राह्मणंतासामिध्मः
प्रथमागामीभवतीध्मःसमिंधनात्तस्यैषाभवति॥४॥समिद्धोअद्यमनुषोदुरोणेदेवो
देवान्यजसिजातवेदः॥आचवहमित्रमहश्चिकित्वान्त्वंदूतःकविरसिप्रचेताः॥समिद्धोद्य
मनुष्यस्यमनुष्यस्यगृहेदेवोदेवान्यजसिजातवेदआचवहमित्रमहश्चिकित्वांश्चेत
नावान्त्वंदूतःकविरसिप्रचेताःप्रवृद्धचेतायज्ञेध्मइतिकात्थक्योऽग्निरितिशाकपूणिस्तनू
नपादाज्यंभवतिनपादित्यनंतरायाःप्रजायानामधेयंनिर्णततमाभवतिगौरत्रतनूरुच्य
तेततास्यांभोगास्तस्याःपयोजायतेपयसआज्यंजायतेऽग्निरितिशाकपूणिरापोत्रत

स२

नि॰३॰२

न्त्वउच्यंतेततान्तरिक्षेताभ्यओषधिवनस्पतयोजायंतेओषधिवनस्पतिभ्यएषजायतेत
स्यैषाभवति॥५॥तनूनपात्पथऋतस्ययानान्मध्वासमंजन्त्स्वदयासुजिह्व॥मन्मानिधीभि
रुतयज्ञमृंधन्देवत्राचकृणुह्यध्वरंनः॥तनूनपात्पथऋतस्ययानान्यज्ञस्ययानान्मधुना
समंजन्त्स्वदयकल्याणजिह्वमननानिचनोधीभिःकर्मभिश्चसमर्द्धयदेवान्नोयज्ञंगमयनराशं
सोयज्ञइतिकात्थक्योनराअस्मिन्नासीनाःशंसंत्यग्निरितिशाकपूणिर्नरैःप्रशस्योभवतितत
स्यैषाभवति॥६॥नराशंसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः॥येसुक्रतवःशुच
योधियंधाःस्वदंतिदेवाउभयानिहव्या॥नराशंसस्यमहिमानमेषामुपस्तुमोयज्ञियस्ययज्ञै
र्येसुकर्माणःशुचयोधियंधारयितारःस्वदयंतुदेवाउभयानिहवींषिसोमंचेतराणिचेतिवा
तान्त्राणिचावापिकानिचेतिवेळईडेःस्तुतिकर्मणइंधतेर्वातस्यैषाभवति॥७॥आजुह्वानईड्यो

१२

१२

वंद्यश्चायाह्यग्नेवसुभिःसजोषाः॥त्वंदेवानामसियह्वहोतासएनान्यक्षीषितोयजीयान्॥आजुह्वानम
ईड्योवंद्यश्चायाह्यग्नेवसुभिःसहजोषणस्त्वंदेवानामसियह्वहोतायह्वइतिमहतोनाम
धेयंयातश्चहूतश्चभवति॥सएनान्यक्षीषितोयजीयान्॥इषितःप्रेषितइतिवाधीष्टइतिवायजीयान्यष्टृ
तरोबर्हिःपरिबर्हणात्तस्यैषाभवति॥८॥प्राचीनंबर्हिःप्रदिशापृथिव्यावस्तोरस्यावृज्यतेअग्रेअ
ह्नां॥व्युप्रथतेवितरंवरीयोदेवेभ्योअदितयेस्योनं॥प्राचीनंबर्हिःप्रदिशापृथिव्यावसनायास्याःप्र
वृज्यतेअग्रेअह्नांबर्हिःपूर्वाह्णेतद्विप्रथतेवितरंवितीर्णतरमितिवाविस्तीर्णतरमितिवावरीयोवरतरमुरु
तरंवादेवेभ्यश्चादितयेचस्योनंस्योनमितिसुखनामस्यतेरवस्यंत्येतत्सेवितव्यंभवतीतिवाद्वारोज
वतेर्वाद्रवतेर्वावारयतेर्वातासामेषाभवति॥९॥व्यचस्वतीरुर्वियाविश्रयंतांपतिभ्योनजनयःशुंभमा
नाः॥देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः॥व्यंचनवत्यउरुत्वेनविश्रयंतांपतिभ्यइव

या

नि॰उ॰२

जायाउह्येमैथुनेधर्मेश्रयोभिप्रमाणावरतमंगमन्द्दिश्योद्वारोबृहत्योमहत्योविश्वमिन्वाविश्वमा
भिरेतिर्यज्ञेगृहद्वारइतिकात्थक्योऽग्निरितिशाकपूणिःनक्तोषासानक्तोषासेनक्ताचोषाव्याख्याता
नक्तेतिरात्रिनामानक्तिभूतान्यवश्यायेनापिवानक्ताव्यक्तवर्णातयोरेषाभवति॥१०॥आसुष्व

१२

यंतीयजतेउपाकेउषासानक्तासदतांनियोनौ॥दिव्येयोषणेबृहतीसुरुक्मेअधिश्रियंशुक्रपि
शंदधाने॥सेष्मीयमाणेइतिवासुष्वापयंत्यावितिवासीदतामितिवान्यासीदतामितिवायज्ञियेउप
क्रांतेदिव्येयोषणेबृहत्योमहत्यौसुरुक्मेसुरोचनेअधिदधानेशुक्रपेशसंश्रियंशुक्रंशोचतेर्ज्वल
तिकर्मणःपेशइतिरूपनामपिंशतेर्विपिशितंभवतिदैव्याहोतारादैव्योहोतारावयंचाग्निरसौचम

१३

ध्यमस्तयोरेषाभवति॥११॥दैव्याहोताराप्रथमासुवाचामिमानायज्ञंमनुषोयजध्यै॥प्रचोदयं
ताविदथेषुकारूप्राचीनंज्योतिःप्रदिशादिशंता॥दैव्योहोतारौप्रथमौसुवाचौनिर्मिमानौयज्ञं

मनुष्यस्यमनुष्यस्ययजनायप्रचोदयमानौयज्ञेषुकर्तारौपूर्वस्यांदिशियष्टव्यमितिप्रदिशंतौ
तिस्रोदेवीस्तिस्रोदेव्यस्तासामेषाभवति॥१२॥आनोयज्ञंभारतीतूयमेत्विळामनुष्वदिहचेतयं
ती॥तिस्रोदेवीर्बर्हिरेदंस्योनंसरस्वतीस्वपसःसदंतु॥ऐतुनोयज्ञंभारतीक्षिप्रंभरतआदित्यस्त
स्यभाइळाचमनुष्यवदिहचेतयमानातिस्रोदेव्योबर्हिरिदंसुखंसरस्वतीचसुकर्मणआसी
दंतुत्वष्टातूर्णमश्नुतइतिनैरुक्तास्त्विषेर्वास्याद्दीप्तिकर्मणस्त्वक्षतेर्वास्यात्करोतिकर्मणस्तस्यै
षाभवति॥१३॥यइमेद्यावापृथिवीजनित्रीरूपैरपिंशद्भुवनानिविश्वा॥तमद्यहोतरिषितोयजी
यान्देवंत्वष्टारमिहयक्षिविद्वान्॥यइमेद्यावापृथिव्यौजनयित्र्यौरूपैरकरोद्भूतानिचसर्वाणि
तमद्यहोतरिषितोयजीयान्देवंत्वष्टारमिहयजविद्वान्माध्यमिकस्त्वष्टेत्याहुर्मध्यमेचस्थाने
समाम्नातोऽग्निरितिशाकपूणिस्तस्यैषापराभवति॥१४॥आविष्ट्योवर्द्धतेचारुरासुजिह्मानां

नि.३.२ मूर्ध्नः स्वयशा उपस्थे ॥ उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रतिजोषयेते ॥ आविरावेदनात्तस्यो
वर्द्धते चारुरासु चारुश्चरतेर्जिह्मं जिहीतेरूर्ध्व उच्छ्रितो भवति स्वयशा आत्मयशा उपस्थ उपस्था
१४ नेउभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रतिजोषयेते ॥ द्यावापृथिव्याविति वाहोरात्रे इति वा
रणी इति वा प्रत्यक्ते सिंहं सहनं प्रत्यासेवेते ॥१५॥ वनस्पतिर्व्याख्यातस्तस्यैषा भवति ॥१६॥ उपा
वसृज त्मन्या समञ्जन्देवानां पाथ ऋतुथा हवींषि ॥ वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधु
ना घृतेन ॥ उपावसृजात्मनात्मानं समञ्जन्देवानामन्नमृतावृतौ हवींषि काले काले वनस्पतिः श
मिता देवो अग्निरित्येते त्रयः स्वदयन्तु हव्यं मधुना च घृतेन च तत्को वनस्पतिर्यूप इति कात्थक्यो १४
ग्निरिति शाकपूणिस्तस्यैषापरा भवति ॥१७॥ अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्ये
न ॥ यदूर्ध्वस्तिष्ठाद्द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ॥ अञ्जन्ति त्वामध्वरे देवान्कामयमा

नो वनस्पते मधुना दैव्येन च घृतेन च यदूर्ध्वः स्थास्यसि द्रविणा निचनो दास्यसि यद्वा ते कृतः
क्षयो मातुरस्या उपस्थ उपस्थाने ऽग्निरिति शाकपूणिस्तस्यैषापरा भवति ॥१८॥ देवेभ्यो वन
स्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थं ॥ प्रदक्षिणिद्रशनया नियूय ऋतस्य वक्षि पथिभी रजि
ष्ठैः ॥ देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण ऋतपर्णापि वोपमार्थे स्याद्धिरण्यवर्णपर्णेति प्र
दिवस्ते अर्थं पुराणस्ते सो ऽर्थो यं ते प्रज्ञस्य वह पथिभी रजिष्ठैर्ऋजुतमै रजस्वलतमैस्तपिष्ठतमै
रिति वा तस्यैषापरा भवति ॥१९॥ वनस्पते रशनया नियूय पिष्टतमया वयुनानि विद्वान् ॥ व
ह देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचः ॥ वनस्पते रशनया नियूय सुरूपतमया व
युनानि विद्वान्प्रज्ञानानि प्रजानन्वह देवान्यज्ञे दातुर्हवींषि प्रब्रूहि च दातारममृतेषु देवेषु
स्वाहाकृतयः स्वाहेत्येतत्सु आहेति वा स्वा वागाहेति वा स्वं प्राहेति वा स्वाहुतं हविर्जुहोतीति वा
तेप्रब्रूमोय

तासामेषाभवति॥२०॥सद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाः॥अस्यहोतुः
प्रदिश्यृतस्यवाचिस्वाहाकृतंहविरदंतुदेवाः॥सद्योजायमानोनिरमिमीतयज्ञमग्निर्देवा
नामभवत्पुरोगामीअस्यहोतुःप्रदिश्यृतस्यवाच्यास्येस्वाहाकृतंहविरदंतुदेवाइतियजंतीती
माआप्रीदेवताअनुक्रांताअथाकिंदेवताःप्रयाजानुयाजाआग्नेयाइत्येके॥२१॥प्रयाजा
न्मेअनुयाजांश्चकेवलानूर्जस्वंतंहविषोदत्तभागं॥घृतंचापांपुरुषंचौषधीनामग्नेश्चदी
र्घमायुरस्तुदेवाः॥तवप्रयाजाअनुयाजाश्चकेवलऊर्जस्वंतोहविषःसंतुभागाः॥तवाग्ने
यज्ञोऽयमस्तुसर्वस्तुभ्यंनमंतांप्रदिशश्चतस्रः॥आग्नेयावैप्रयाजाआग्नेयाअनुयाजा
इतिचब्राह्मणंछंदोदेवताइत्यपरंछंदांसिवैप्रयाजाश्छंदांस्यनुयाजाइतिचब्राह्मणमृतुदेवता
इत्यपरमृतवोवैप्रयाजाऋतवोनुयाजाइतिचब्राह्मणंपशुदेवताइत्यपरंपशवोवैप्रयाजाःप

शवोनुयाजाइतिचब्राह्मणंप्राणदेवताइत्यपरंप्राणावैप्रयाजाःप्राणावाअनुयाजाइतिचब्राह्मणमा
त्मदेवताइत्यपरमात्मावैप्रयाजाआत्मावाअनुयाजाइतिचब्राह्मणमाग्नेयाइतितुस्थितिर्भक्तिमात्रमित
रत्किमर्थंपुनरिदमुच्यतेयस्यैदेवतायैहविर्गृहीतंस्यात्तांमनसाध्यायेद्वषट्करिष्यन्नितिहविज्ञायतेतान्येता
न्येकादशआप्रीसूक्तानितेषांवासिष्ठमात्रेयंवाध्र्यश्वंगार्त्समदमितिनाराशंसवंतिमैधातिथंदैर्घत
मसंप्रैषिकमित्युभयवंत्यतोन्यानितनूनपात्वंतितनूनपात्वंति॥२२॥ ॥द्रविणोदाःकस्माद्द्रविणो
दाद्रविणसोमेद्यतुतेभातआप्रियःसमिद्धोअद्यघृतंतनूनपान्नराशंसस्यांजुह्वानःप्राचीनंबर्हिस्वती
रास्कृषयंतीदेव्याहोतारानोयज्ञंपद्मेआविष्ट्योवनस्पतिरूपावसृजंजंतिदेवेभ्योवनस्पतेवनस्प
तेरन्नानयासद्योजातःप्रयाजान्मेद्वाविंशतिः॥ ॥इतिनिरुक्तेउत्तरषट्केद्वितीयोध्यायः॥ ॥ ॥
॥ॐ॥ ॥अथयानिपृथिव्यायतनानिसत्वानिस्तुतिंलभंतेतान्यतोनुक्रमिष्यामस्तेषामश्वःप्र

नि·३·२

थमागामी भवत्यश्वो व्याख्यातस्तस्यैषा भवति ॥१॥ अश्वो वोळ्हा सुखं रथं हसनामुपमंत्रिणः ॥ शे
पो रोमण्वंतौ भेदौ वारिन्मंडूक इच्छतींद्रायेंदो परिस्रव ॥ अश्वो वोळ्हा सुखं वोळ्हा रथं वोळ्हा सुखमि
ति कल्याणनाम कल्याणं पुण्यं सुहितं भवति सुहितं गम्यतीति वा हसेता वा पालावा पालयिता वा शेप

१८

मृच्छतीति वारि वारयति मा नो व्याख्यातस्तस्यैषा भवति ॥२॥ मा नो मित्रो वरुणो अर्यमायुरिंद्र ऋभुक्षा
मरुतः परिख्यन् ॥ यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥ यद्वाजिनो देवैर्जातस्य स
प्तेः सरणस्य प्रवक्ष्यामो यज्ञे विदथे वीर्याणि मा नस्त्वं मित्रश्च वरुणश्चार्यमा चायुश्च वायुरयन इंद्रश्चो
रुक्षयण ऋभुक्षणां राजेति वा मरुतश्च परिख्यन् ॥ शकुनिः शक्नोत्युन्नेतुमात्मानं शक्नोति नदितुमिति वा

१८

शक्नोति तकितुमिति वा सर्वतः शं करोत्विति वा शक्नोतेर्वा तस्यैषा भवति ॥३॥ कनिक्रदज्जनुषं प्रब्रु
वाण इयर्ति वाचमरितेव नावं ॥ सुमंगलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या विदत् ॥ क्र

न्दज्जन्म प्रब्रुवाणो यथास्य शब्दस्तथा नामेरयति वाचमीरयितेव नावं सुमंगलश्च शकुने भव
कल्याणमंगलो मंगलं गिरतेर्गृणात्यर्थे गिरत्यनर्थानिति वांऽगलमंगवन्मज्जयति पापकमिति नै
रुक्ता मा गच्छतीति वा मा च त्वा काचिदभिभूतिः सर्वतो विदत् गृत्समदमर्थमभ्युत्थितं कपिंजलोऽभिववाशे
तदभिवादिन्येषर्ग्भवति ॥४॥ भद्रं वद दक्षिणतो भद्रमुत्तरतो वद ॥ भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिंजल ॥
इति सा निगदव्याख्याता गृत्समदो गृत्समदनो गृत्स इति मेधाविनाम गृणातेः स्तुतिकर्मणो मंडूका मज्जू
का मज्जनान्मदतेर्वा मोदतिकर्मणो मंदतेर्वा तृप्तिकर्मणो मंडयतेरिति वैयाकरणा मंड एषामोक इति वा
मंडो मदेर्वा मुदेर्वा तेषामेषा भवति ॥५॥ संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ॥ वाचं पर्जन्यजि
न्वितां प्र मंडूका अवादिषुः ॥ संवत्सरं शिश्याना ब्राह्मणा व्रतचारिणो ब्रुवाणा अपि वोपमार्थे स्या
द्ब्राह्मणा इव व्रतचारिण इति वा वाचं पर्जन्यप्रीतां प्रावादिषुर्मंडूका वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव तं

नि·उ·२

१७

मंडूका अन्वमोदंतसमंडूकाननुमोदमानानदृष्ट्वा तुष्टावेतदभिवादिन्येषा भवति ॥६॥ उपप्लवदमं
डूकि वर्षमावद तादुरि ॥ मध्ये ह्रदस्य प्लवस्व विगृह्य चतुरः पदः ॥ इति सा निगदव्याख्याता ॥ अक्षा अ
श्नुवत एनानिति वाभ्यश्नुवत एभिरिति वा तेषामेषा भवति ॥७॥ प्रावेपा मा बृहतो मादयंति प्रवातेजा
इरिणे वर्वृतानाः ॥ सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥ प्रवेपिणो मा महतो वि
भीदकस्य फलानि मादयंति प्रवातेजाः प्रवणेजा इरिणे वर्तमाना इरिणं निर्ऋणमृणातेरपार्णं भ
वत्यपरता अस्मादोषधय इति वा ॥ सोमस्येव मौजवतस्य भक्षः ॥ मौजवतो मूजवति जातो मूजवा
न्पर्वतो मुंजवान्मुंजो विमुच्यत इषीकयेषीका इषतेर्गतिकर्मण इयमपीतरेषीकैतस्मादेव विभी
दको विभेदनाज्जागृविर्जागरणान्मह्यमचच्छदत्प्रशंसत्येनान्प्रथमया निंदत्युत्तराभिर्ऋषेर
क्षपरिद्यूनस्यैतदार्षं वेदयंते ग्रावाणो हंतेर्वा गृणातेर्वा गृह्णातेर्वा तेषामेषा भवति ॥८॥ प्रैते वदं

१७

तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः ॥ यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेंद्राय सो
मिनः ॥ प्रवदंत्वेते प्रवदाम वयं ग्रावभ्यो वाचं वदत वदद्भ्यो यदद्रयः पर्वता आदरणीयाः सह सोममाशा
वः क्षिप्रकारिणः श्लोकः शृणोतेर्घोषो घुष्यतेः सोमिनो यूयं स्थेति वा सोमिनो गृहेष्विति वा येन नरः
प्रशस्यंते स नाराशंसो मंत्रस्तस्यैषा भवति ॥९॥ अमंदान्स्तोमान्प्रभरे मनीषा सिंधावधि क्षिय
तो भाव्यस्य ॥ यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥ अमंदान्स्तोमानबालिशा
ननल्पान्वा बालो बलवर्ती भर्तव्यो भवत्यर्थवास्मा अलं भवतीति वाऽ वास्मै बलं भवतीति वा बलो वा
प्रतिषेधव्यवहितः प्रभरे मनीषया मनस ईषया स्तुत्या प्रज्ञया वा सिंधावधि निवसतो भावयव्यस्य
राज्ञो यो मे सहस्रं निरमिमीत सवानतूर्तो राजाऽतूर्ण इति वा त्वरमाण इति वा प्रशंसामिच्छमानः ॥
॥१०॥ यज्ञसंयोगाद्राजा स्तुतिं लभेत राजसंयोगाद्युद्धोपकरणानि तेषां रथः प्रथमागामी भवति

नि॰ उ॰ २

१८

रथो रंहतेर्गतिकर्मणः स्थिरतेर्वा स्याद्विपरीतस्य रममाणोऽस्मिंस्तिष्ठतीति वा रपतेर्वा रसतेर्वा तस्यैषा भव
ति ॥११॥ वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ॥ गोभिः संनद्धो असि वीळयस्वास्था
ता ते जयतु जेत्वानि ॥ वनस्पते दृढाङ्गो हि भव अस्मत्सखा प्रतरणः सुवीरः कल्याणवीरो गोभिः सं
नद्धो असि वीळयस्वेति संस्तंभस्वास्थाता ते जयतु जेतव्यानि दुंदुभिरिति शब्दानुकरणं द्रुमो भिन्न
इति वा दुंदुभ्यतेर्वा स्याच्छब्दकर्मणस्तस्यैषा भवति ॥१२॥ उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते
मनुतां विष्ठितं जगत् ॥ स दुंदुभे सजूरिंद्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥ उप श्वासय पृथिवीं
च दिवं च बहुधा ते घोषं मन्यतां विष्ठितं स्थावरं जंगमं च यत्स दुंदुभे सहजोषण इंद्रेण च देवैश्च दू
राद्दूरतरमपसेध शत्रूनिषुधिरिषूणां निधानं तस्यैषा भवति ॥१३॥ बह्वीनां पिता बहुरस्य पुत्रः
श्चिश्चा कृणोति समनावगत्य ॥ इषुधिः संकाः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥ बहू

१८

त

नां पिता बहुरस्य पुत्र इतीषूनभिप्रेत्य प्रस्मयत इवापाव्रियमाणः शब्दानुकरणं वा संकाः सचतेः संपूर्वाद्वा
किरतेः पृष्ठे निनद्धो जयति प्रसूत इति व्याख्यातं हस्तघ्नो हस्ते हन्यते तस्यैषा भवति ॥१४॥ अहिरिव भोगैः
पर्येति बाहुं ज्याया हेतिं परिबाधमानः ॥ हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ॥
अहिरिव भोगैः परिवेष्टयति बाहुं ज्याया वधात्परित्रायमाणो हस्तघ्नः सर्वाणि प्रज्ञानानि प्रजानन्पु
मान्पुरुमना भवति पुंसतेर्वाभीशवो व्याख्यातास्तेषामेषा भवति ॥१५॥ रथे तिष्ठन्नयति वाजिनः पुरो यत्रय
त्र कामयते सुषारथिः ॥ अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छंति रश्मयः ॥ रथे तिष्ठन्नयति
वाजिनः पुरस्तात्सतो यत्रयत्र कामयते सुषारथिः कल्याणसारथिरभीशूनां महिमानं पूजयामि
मनः पश्चात्संतो नु यच्छंति रश्मयो धनुर्धन्वतेर्गतिकर्मणो वधकर्मणो वा धन्वंत्यस्मादिषवस्तस्यैषा
भवति ॥१६॥ धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ॥ धनुः शत्रोरपकामं कृणोति

नि॰ ३॰२

१९

धन्वनासर्वाःप्रदिशोजयेम॥इतिसानिगदव्याख्याता॥समदःसमदोवात्तेःसंमदोवामदतेर्वाजयतेर्वी
जिनातेर्वाप्रजावयतीभूनितिर्वातस्याएषाभवति॥१७॥वक्ष्यंतीवेदागनीगंतिकर्णंप्रियंसखायंपरिषस्व
जाना॥योषेवशिंक्तेविततादिधन्वञ्ज्याइयंसमनेपारयंती॥वक्ष्यंतीवागच्छतिकर्णंप्रियमिवसखाय
मिषुंपरिष्वजमानायोषेवशिंक्तेशब्दंकरोतिविततादिधनुषिज्येयंसमनेसंग्रामेपारयंतीपारंनयंती
पुरिषतेर्गतिकर्मणोवधकर्मणोवातस्यैषाभवति॥१८॥सुपर्णंवस्तेमृगोअस्यादंतोगोभिःसंनद्धापत
तिप्रसूता॥यत्रानरःसंचविचद्रवंतितत्रास्मभ्यमिषवःशर्मयंसन्॥सुपर्णंवस्तइतिवाजानभिप्रेत्य
मृगमयोऽस्यादंतोमृगयतेर्वागोभिःसंनद्धापततिप्रसूतेतिव्याख्यातंयत्रनराःसंद्रवंतिचविद्रवंतिचतत्
त्रास्मभ्यमिषवःशर्मयच्छंतुशरणंसंग्रामेष्वश्वाजनीकशेत्याहुःकशाप्रकाशयतिभयमश्वायकृष्य
तेर्वाणुभावाद्वाकुपुनःप्रकाशमस्यर्थानवशासेक्रोशतेवश्विकशायाएषाभवति॥१९॥आजंघंतिसान्वे

१९

षांजघनाँउपजिघ्नते॥अश्वाजनिप्रचेतसोऽश्वान्त्समत्सुचोदय॥आजंघंतिसान्वेषांसरणा
निसक्थीनिसक्थिसचतेरासक्तोऽस्मिन्कायइतिजघनानिचोपघ्नंतिजघनंजंघन्यतेःअश्वाजनिप्रचेत
सःप्रवृद्धचेतसोऽश्वान्त्समत्सुसमरणेषुसंग्रामेषुचोदय॥उलूखलमुरुकरंवोर्ध्वकरंवोर्ध्वखंवाऊरुमेकु
र्वित्यब्रवीत्तदुलूखलमभवदुरुकरंवैतदुलूखलमित्याचक्षतेपरोक्षेणेतिचब्राह्मणंतस्यैषाभवति॥
॥२०॥यच्चिद्धित्वंगृहेगृहउलूखलकयुज्यसे॥इहद्युमत्तमंवदजयतामिवदुंदुभिः॥इतिसानिगदव्या
ख्याता॥२१॥वृषभःप्रजांवर्षतीतिवातिबृहतिरेतइतिवातद्वृषकर्मावर्षणाद्वृषभस्तस्यैषाभवति॥
॥२२॥न्यक्रंदयन्नुपयंतएनममेहयन्वृषभंमध्यआजेः॥तेनसूभर्वंशतवत्सहस्रंगवांमुद्गलःप्र
धनेजिगाय॥न्यक्रंदयन्नुपयंतएनमितिव्याख्यातममेहयन्वृषभंमध्यआजेराजयनस्याजवन
स्येतिवातेनतंसूभर्वंराजानंभर्वतिरत्तिकर्मातद्वासूभर्वंसहस्रंगवांमुद्गलःप्रधनेजिगायप्रधनइ

नि॰उ॰३

२०

तिसंग्रामनामप्रकीर्णान्यस्मिन्धनानिभवंतिद्रुघणोद्रुममयोघनस्तत्रेतिहासमाचक्षतेमुद्गलोभार्म्यश्व
ऋषिर्वृषभंचद्रुघणंचयुक्त्वासंग्रामेव्यवहृत्याजिंजिगायतदृत्तिवादिन्येषर्ग्भवति॥२३॥इमंतंपश्यवृ
षभस्ययुंजंकाष्ठायामध्येद्रुघणंशयानं॥येनजिगायशतवत्सहस्रंगवांमुद्गलःपृतनाज्येषु॥इमंतंप
श्यवृषभस्यसहयुजंकाष्ठायामध्येद्रुघणंशयानंयेनजिगायशतवत्सहस्रंगवांमुद्गलःपृतनाज्ये
षुपृतनाज्यमितिसंग्रामनामपृतनानामजनाद्वाजयनाद्वामुद्गलोमुद्गवान्मुद्गगिलोवामदनंगिलती
तिवामदंगिलोवामुदंगिलोवाभार्म्यश्वोभृम्यश्वस्यपुत्रोभृम्यश्वोभृमणोस्याश्वाअश्वभरणाद्वापितु
रित्यन्ननामपातेर्वापिबतेर्वाप्यायतेर्वातस्यैषाभवति॥२४॥पितुंनुस्तोषंमहोधर्माणंतविषीं॥यस्य
त्रितोव्योजसावृत्रंविपर्वमर्दयत्॥तंपितुंस्तौमिमहतोधारयितारंबलस्यतविषीतिबलनामतवतेर्वा
वृद्धिकर्मणोयस्यत्रितओजसाबलेनत्रितस्त्रिस्थानइंद्रोवृत्रंविपर्वाणंव्यर्दयतिनद्योव्याख्यातास्तासा

२०

मेषाभवति॥२५॥इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या॥असिक्न्यामरुद्वृधेवितस्त
यार्जीकीयेशृणुह्यासुषोमया॥इमंमेगंगेयमुनेसरस्वतिशुतुद्रिपरुष्णिस्तोमममासेवध्वमसिक्न्या
चसहमरुद्वृधेवितस्तयाचार्जीकीयआशृणुहिसुषोमयाचेतिसमस्तार्थोथैकपदनिरुक्तंगंगागा
मनाद्यमुनाप्रयुवतीगच्छतीतिवाप्रवियुतंगच्छतीतिवासरस्वतीसरइत्युदकनामसर्तेस्तद्वती
शुतुद्रीशुद्राविणीक्षिप्रद्राविण्याशुतुन्नेवद्रवतीतिइरावतींपरुष्णीत्याहुःपर्ववतीभास्वतीकुटि
लगामिन्यसिक्न्यशुक्लासितासितमितिवर्णनामतत्प्रतिषेधोसितंमरुद्वृधाःसर्वानद्योमरुत
एनावर्धयंतिवितस्ताविदग्धाविवृद्धामहाकूलार्जीकीयांविपाडित्याहुःऋजूकप्रभवावर्जुगा
मिनीवाविपाड्विपाटनाद्वाविपाशनाद्वाविप्रापणाद्वापाशाअस्यांव्यपाश्यंतवसिष्ठस्यमुमूर्षतस्त
स्माद्विपाडुच्यतेपूर्वमासीदुरुंजिरासुषोमासिंधुर्यदेनामभिप्रस्रवंतिनद्यःसिंधुःस्यंदनादापआ

ज्ञीलेस्तासामेषाभवति॥२६॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन॥ महे रणाय चक्षसे॥ आपो हि
स्थ सुखभुवस्ता नो ऽन्नाय धत्त महते च नो रणाय रमणीयाय च दर्शनायौषधय ओषद्धयन्तीति
वौषत्येनाधयन्तीति वा दोषं धयन्तीति वा तासामेषाभवति॥२७॥ या ओषधीः पूर्वा जाता देवेभ्यस्त्रि
युगं पुरा॥ मनै नु बभ्रूणामहं शतं धामानि सप्त च॥ या ओषधयः पूर्वा जाता देवेभ्यस्त्रीणि युगा
नि पुरा मन्ये नु तद् बभ्रूणामहं बभ्रुवर्णानां हरणानां भरणानामिति वा शतं धामानि सप्त चेति धा
मानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति जन्मान्यत्राभिप्रेतानि सप्तशतं पुरुषस्य
मर्मणां तेष्वेना दधतीति वा रात्रिर्व्याख्याता तस्या एषाभवति॥२८॥ आ रात्रि पार्थिवं रजः पि
तुरप्रायि धामभिः॥ दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः॥ आपूपुरस्त्वं रात्रि पार्थि
वं रजः स्थानैर्मध्यमस्य दिवः सदांसि बृहती महती वितिष्ठस आवर्तते त्वेषं तमो रजो ऽरण्यान्य

रण्यस्य पत्न्यरण्यमपार्णं ग्रामादरमणं भवतीति वा तस्या एषाभवति॥२९॥ अरण्यान्यरण्या
न्यसौ या प्रेव नश्यसि॥ कथा ग्रामं न पृच्छसि न त्वा भीरिव विन्दतीँ३॥ अरण्यानीत्येनामामन्त्रय
ते यासावरण्यानि वनानि पराचीव नश्यसि कथं ग्रामं न पृच्छसि न त्वा भीर्विन्दतीवेतीवः परिदेव्या
र्थे वीश्रद्धा श्रद्धानात् तस्या एषाभवति॥३०॥ श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः॥ श्रद्धां भग
स्य मूर्धनि वचसा वेदयामसि॥ श्रद्धयाग्निः साधु समिध्यते श्रद्धया हविः साधु हूयते श्रद्धां भग
स्य भागधेयस्य मूर्धनि प्रधानाङ्गे वचनेनावेदयामः पृथिवी व्याख्याता तस्या एषाभवति॥३१॥
स्योना पृथिवि भवानृक्षरा निवेशनी॥ यच्छा नः शर्म सप्रथः॥ सुखा नः पृथिवि भवानृक्षरा
निवेशन्यृक्षरः कण्टक ऋच्छतेः कण्टकः कन्तपो वा कृन्ततेर्वा कण्टतेर्वा स्याद्गतिकर्मण उद्गततमो भ
वति यच्छ नः शर्म यच्छ नः शरणं सर्वतः पृथु वा व्याख्याता तस्या एषाभवति॥३२॥ अमीषांचि

नि॰ उ॰ २

तं प्रतिलोभयंती गृह्णाणांगान्यप्वे परेहि॥ अभिप्रेहि निर्दह हृत्सु शोकैरंधेनामित्रास्तमसा सचंतां॥ अमीषां चित्तानि प्रज्ञानानि प्रतिलोभयमाना गृह्णाणांगान्यप्वे परेहि अभिप्रेहि निर्दहैषां हृदयानि शोकैरंधेनामित्रास्तमसा संसेव्यंतां मग्नाय्यग्नेः पत्नी तस्या एषा भवति॥ २३॥ इहेंद्राणीमुपह्वये वरुणानीं स्वस्तये॥ अग्नायीं सोमपीतये॥ इति सा निगदव्याख्याता॥ २४॥ अथातो द्वंद्वानि उलूखलमुसले उलूखलं व्याख्यातं मुसलं मुहुः सरं तयोरेषा भवति॥ २५॥ आयजी वाजसातमा ता ह्यु१च्चा विजर्भृतः॥ हरी इवांधांसि बप्सता॥ आयष्टव्ये अन्नानां संभक्तृतमे ते ह्युच्चैर्विह्रियेते हरी इवान्नानि भुंजाने हविर्धाने हविषां निधाने तयोरेषा भवति॥ २६॥ आ वामुपस्थमद्रुहा देवाः सीदंतु यज्ञियाः॥ इहाद्य सोमपीतये॥ आसीदंतु वामुपस्थमुपस्थानं मद्रोग्धव्ये इति वा यज्ञिया देवा यज्ञसंपादिने इहाद्य सोमपानाय द्यावापृथिव्यौ व्याख्याते तयोरेषा भवति॥ २७॥ द्यावा नः पृथिवी इमं

२२

सिध्रमद्य दिविस्पृशं॥ यज्ञं देवेषु यच्छतां॥ द्यावापृथिव्यौ न इमं साधनमद्य दिविस्पृशं यज्ञं देवेषु नियच्छतां विपाट्छुतुद्र्यौ व्याख्याते तयोरेषा भवति॥ २८॥ प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने॥ गावेव शुभ्रे मातरा रिहाणे विपाट्छुतुद्री पयसा जवेते॥ पर्वतानामुपस्थादुपस्थानादुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषण्णे इति वा हासमाने हासतिः स्पर्धायां हर्षमाणे वा गावाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्र्यौ पयसा प्रजवेते आर्त्नी आर्त्न्यौ वा अरण्यौ वा अरिषण्यौ वा तयोरेषा भवति॥ २९॥ ते आचरंती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे॥ अप शत्रून्विध्यतां संविदाने आर्त्नी इमे विष्फुरंती अमित्रान्॥ ते आचरंत्यौ समनसाविव योषे मातेव पुत्रं बिभृतामुपस्थ उपस्थाने अपविध्यतां शत्रून्संविदाने आर्त्न्याविमे विघ्नत्यावमित्रान् शुनासीरौ शुनो वायुः शु एत्यंतरिक्षे सीर आदित्यः सरणात्तयोरेषा भवति॥ ३०॥ शुनासीराविमां वाचं जुषेथां यद्दिवि च

२२

नि॰ उ॰ २

कृधुः पर्यः ॥ तेनेमामुपसिंचतं ॥ इति सा निगदव्याख्याता ॥ देवी जोष्ट्री देव्यौ जोषयित्र्यौ द्यावापृथिव्यावि
तिवाहोरात्रे इति वा सस्यं च समा चेति कात्थक्यस्तयोरेष संप्रैषो भवति ॥४१॥ देवी जोष्ट्री वसुधितीय
योरन्याघा द्वेषांसि युयवदान्या वक्षद्वसु वार्याणि यजमानाय वसुवने वसुधेयस्य वीतां यज ॥ देवी
जोष्ट्री देव्यौ जोषयित्र्यौ वसुधिती वसुधान्यौ ययोरन्याघानि द्वेषांस्यवयावयत्यावहत्यन्या वसूनि

२२

वननीयानि यजमानाय वसुवननाय च वसुधानाय च वीतां पिबेतां कामयेतां वा यजेति संप्रैषो देवी
ऊर्जाहुती देव्या ऊर्जाह्वान्यौ द्यावापृथिव्याविति वाहोरात्रे इति वा सस्यं च समा चेति कात्थक्यस्तयोरेष सं
प्रैषो भवति ॥४२॥ देवी ऊर्जाहुती इषमूर्जमन्या वक्षत्सग्धिं सपीतिमन्या नवेन पूर्वं दयमानाः स्याम
पुराणेन नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यज ॥ देवी ऊर्जाहु
ती देव्या ऊर्जाह्वान्यौ अन्नं च रसं चावहत्यावहत्यन्या सहजग्धिं च सहपीतिं चान्या नवेन पूर्वं दयमा

२२

नाः स्याम पुराणेन नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवननाय च वसुधानाय च वी
तां पिबेतां कामयेतां वा यजेति संप्रैषो यजेति संप्रैषः ॥४३॥ ॥ अथ यान्यभ्वो वो ळ्हा मानो मि
त्रः कनिक्रदद्दुंदुभिर्वदत्संवत्सरमुपल्लवद्ग्रावेपाः शेलेवदुंत्वमंद्रान्यजन्नसंयोगाद्धूनस्पतउपश्वास
यवद्ध्वी नाम हिरिवश्रोगेरथेति छंन्धन्वनागावक्ष्यंतीवस्कपर्णेवस्त आजं घंति यत्किंद्धिद्धि तं दृष
भोन्यंकृंदयन्ति मंतं पितुंन्विमंम आपो हिया ओषधी रा रास्वरण्यानिश्रद्धा सास्पोनामी यामिहेंद्रा

आ

णीमथातोप्लवायजीवामुपसंद्यावानः सपर्वतानां ते आचरंतीशुनासीरो देवी जोष्ट्री देवी ऊर्जाहु
ती त्रिंचत्वारिंशत् ॥ ॥ इति निरुक्ते उत्तरषट्के तृतीयोध्यायः ॥ ॥ॐ॥ ॥ अथातो मध्यस्थाना देव
तास्तासां वायुः प्रथमागामी भवति वायुर्वातेर्वेतेर्वा स्याद्गतिकर्मण एतेरिति स्थौलाष्ठीविरनर्थको व
कारस्तस्यैषा भवति ॥१॥ वायवा याहि दर्शतेमे सोमा अरंकृताः ॥ तेषां पाहि श्रुधी हवं ॥ वायवा याहि द

र्नीयेमे सोमा अरंकृता अलंकृतास्तेषां पिब शृणु नो ह्वानमिति कमन्यं मध्यमादेवमवक्ष्य
तस्यैषापरा भवति ॥२॥ आसस्त्राणासः शवसानमच्छेंद्रं सुचक्रे रथ्यासो अश्वाः ॥ अभि श्रव ऋज्यं
तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत् ॥ आसस्त्राणासोभिग्लायमानमिंद्रं कल्याणचक्रे रथे योगा
य रथ्या अश्वा रथस्य वोढार ऋज्यंत ऋजुगामिनोऽन्नमभिवहेयुर्नवं च पुराणं च श्रव इत्यन्ननाम
श्रूयत इति सतो वायोश्चास्य भक्षो यथा न विदस्येदितीन्द्रप्रधाने त्येके नैघंटुकं वायुकर्मोभयप्र
धाने स परं वरुणो वृणोतीति सतस्तस्यैषा भवति ॥३॥ नीचीनबारं वरुणः कवंधं प्रससर्ज रो
दसी अंतरिक्षं ॥ तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम ॥ नीचीनद्वारं वरुणः कवं
धं मेघं कवनमुदकं भवति तदस्मिन्धीयते उदकमपि कवंधमुच्यते बंधिरनिभृतत्वे कमनि
भृतं च प्रसृजति द्यावापृथिव्यौ चांऽतरिक्षं च महत्वेन तेन सर्वस्य भुवनस्य राजा यवमिव वृष्टि

र्व्युनत्ति भूमिं तस्यैषापरा भवति ॥४॥ तमू षु समना गिरा पितॄणां च मन्मभिः ॥ नाभाकस्य प्रश
स्तिभिर्यः सिंधूनामुपोदये सप्तस्वसा स मध्यमो नभंतामन्यके समे ॥ तं स्वभिष्टौमि समानया गि
रा गीत्या स्तुत्या पितॄणां च मननीयैः स्तोमैर्नाभाकस्य प्रशस्तिभिर्ऋषिर्नाभाको बभूव यः स्यंदमा
नानामासामुपोदये सप्तस्वसारमेनमाह वाग्भिः स मध्यम इति निरुच्यतेऽथैष एव भवति ॥ न
भंतामन्यके समे ॥ मा भूवन्नन्यके सर्वे ये नो द्विषंति दुर्धियः पापधियः पापसंकल्पाः रुद्रो रौतीति स
तो रोरूयमाणो द्रवतीति वा रोदयतेर्वा यदरुदत्तद्रुद्रस्य रुद्रत्वमिति काठकं यदरोदीत्तद्रुद्रस्य रुद्रत्व
मिति हारिद्रविकं तस्यैषा भवति ॥५॥ इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने ॥ अषा
ळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ॥ इमा रुद्राय दृढधन्वने गिरः क्षिप्रेषवे य
देवाय स्वधावतेऽषाळ्हायान्यैः सहमानाय विधात्रे तिग्मायुधाय भरत शृणोतु नस्तिग्मं तेजतेरुत्

नि॰ ३.४

साहकर्मण आयुधमायोधनात्तस्यैषा परा भवति॥६॥ या ते दिद्युदवसृष्टा दिवस्परि
क्ष्मया चरति परि सा वृणक्तु नः॥ सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः॥
या ते दिद्युदवसृष्टा दिवस्परि दिवोऽधि दिद्युद्द्यतेर्वा द्युतेर्वा द्योतते वा क्ष्मया चरति क्ष्मा पृथि
वी तस्यां चरति तया चरति विक्ष्मापयन्ती चरतीति वा परिवृणक्तु नः सा सहस्रं ते स्वाप्तव
चन भैषज्यानि मा नस्त्वं पुत्रेषु च पौत्रेषु च रीरिषस्तोकं तुद्यतेस्तनयं तनोतेरग्निरपि रुद्र उच्य
ते तस्यैषा भवति॥७॥ जराबोध तद्विविड्ढि विशेविशे यज्ञियाय॥ स्तोमं रुद्राय दृशीकं॥ जरा स्तुति
र्जरतेः स्तुतिकर्मणस्तां बोध तया बोधयितरिति वा तद्विविड्ढि तत्कुरु मनुष्यस्य मनुष्यस्य य
जनाय स्तोमं रुद्राय दर्शनीयमिंद्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयत इति वे
रां धारयत इति वेंदवे द्रवतीति वेंदौ रमत इति वेंधे भूतानीति वा तद्यदेनं प्राणैः समैंधंस्तदिंद्र

३

वि॰रो ४

२५

च

२५

स्येंद्रत्वमिति विज्ञायते इदं करणादित्याग्रायण इदं दर्शनादित्यौपमन्यव इंदतेर्वैश्वर्यकर्मण इंदञ्छत्रू
णां दारयिता वा द्रावयिता वादरयिता च यज्वनां तस्यैषा भवति॥८॥ अदर्दरुत्समसृजो वि खानि त्व
मर्णवान्बद्बधानाँ अरम्णाः॥ महांतमिंद्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन्॥ अदृणा उत्समुत्
स उत्सरणाद्वोत्सदनाद्वोत्स्यंदनाद्वोनत्तेर्वा व्यसृजोऽस्य खानि त्वमर्णवानर्णस्वत एतान्माध्यमिकान्सं
स्त्यायान्बाबध्यमानानरम्णा रम्णातिः संयमनकर्मा विसर्जनकर्मा वा महांतमिंद्र पर्वतं मेघं यद्व्य
वृणोर्व्यसृजोऽस्य धारा अवहन्नेनं दानवं दानकर्माणं तस्यैषापरा भवति॥९॥ यो जात एव प्रथमो म
नस्वान्देवो देवान्क्रतुना पर्यभूषत्॥ यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इं
द्रः॥ यो जायमान एव प्रथमो मनस्वी देवो देवान्क्रतुना कर्मणा पर्यभवत्पर्यगृह्णात्पर्यरक्षदत्यक्राम
दिति वा यस्य बलाद्द्यावापृथिव्यावप्यबिभीतां नृम्णस्य मह्ना बलस्य महत्वेन स जनास इंद्र इत्येर्द

नि०उ०४

२६

ह्यार्थस्य प्रीतिर्भवत्याख्यानसंयुक्तां पर्जन्यस्तृपेराद्यंतविपरीतस्य तर्पयिता जन्यः परो जे
ता वा जनयिता वा प्रार्जयिता वा रसानां तस्यैषा भवति ॥१०॥ वि वृक्षान्हंत्युत हंति रक्षसो वि
श्वं बिभाय भुवनं महावधात् ॥ उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन्हंति दु
ष्कृतः ॥ विहंति वृक्षान्विहंति च रक्षांसि सर्वाणि चास्माद्भूतानि बिभ्यति महावधान्महान्ह्यस्य व
धोप्यनपराधो भीतः पलायते वर्षकर्मवतो यत्पर्जन्यः स्तनयन्हंति दुष्कृतः पापकृतो बृहस्पति
र्बृहतः पाता वा पालयिता वा तस्यैषा भवति ॥११॥ अश्मापिनद्धं मधुपर्यपश्यन्मत्स्यं न दीन उद
नि क्षियंतं ॥ निष्टज्जभार चमसं न वृक्षाद्बृहस्पतिर्विरवेणा विकृत्य ॥ अश्नानवता मेघेनापिनद्धं
मधु पर्यपश्यन्मत्स्यमिव दीन उदके निवसंतं निर्जहार तच्चमसमिव वृक्षाच्चमसः कस्माच्चमंत्य
स्मिन्निति बृहस्पतिर्विरवेण शब्देन विकृत्य ब्रह्मणस्पतिर्ब्रह्मणः पाता वा पालयिता वा तस्यैषा

२६

भवति ॥१२॥ अश्मास्यमवतं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत् ॥ तमेव विश्वे
पपिरे स्वर्दृशो बहु साकं सिसिचुरुत्समुद्रिणं ॥ अश्नानवंतमास्यंदनवंतमवातितं ब्रह्मणस्प
तिर्मधुधारमभि यमोजसा बलेनाभ्यतृणत्तमेव सर्वे पिबंति रश्मयः सूर्यदृशो बहु नं सह सिं
चंत्युत्समुद्रिणमुदकवंतं ॥१३॥ क्षेत्रस्य पतिः क्षेत्रं क्षियतेर्निवासकर्मणस्तस्य पाता वा पा
लयिता वा तस्यैषा भवति ॥१४॥ क्षेत्रस्य पतिना वयं हितेनेव जयामसि ॥ गामश्वं पोषयित्न्वा
स नो मृळातीदृशे ॥ क्षेत्रस्य पतिना वयं सुहितेनेव जयामो गामश्वं पुष्टं पोषयित्नु चाहरेति ॥
स नो मृळातीदृशे ॥ बलेन वा धनेन वा मृळतिर्दानकर्मा तस्यैषा भवति ॥१५॥ क्षेत्रस्य पते मधु
मंतमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ॥ मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयंतु ॥
क्षेत्रस्य पते मधुमंतमूर्मिं धेनुरिव पयोस्मासु धुक्ष्वेति मधुश्चुतं घृतमिवोदकं सुपूतमृतस्य नः पाता

परा

नि.उ.४
व
२७

रोवापालयितारोवामळयंतुमळयति रुपद्याकर्मोद्रज्ञाकर्मा वा तद्यत्समान्यामृचि समानाभिव्याहा
रंभवतितज्जामिभवतीत्येके मधुमंतं मधुश्चुतमितियथा यदेवसमानेपादे समानाभिव्याहारं भवतित
ज्जामिभवतीत्यपरं हिरण्यरूपः सहिरण्यसंदृगितियथा यथा कथा च विशेषेजामिभवतीत्यपरं ॥
मंडूका इवोदकान्मंडूका उदकादिवेतियथा ॥ वास्तोष्पतिर्वास्तुर्वसतेर्निवासकर्मणस्तस्य पाता वा
पालयिता वा तस्यैषा भवति ॥ १८ ॥ अमीवहा वास्तोष्पते विश्वारूपाण्याविशन् ॥ सखा सुशेव एधि
नः ॥ अभ्यमनहा वास्तोष्पते सर्वाणि रूपाण्याविशन् सखा नः सुसुखो भव न इति सुखनामत्रि
ष्यतेर्वकारो नामकरणोंऽतस्थांतरोपलिंगी विभाषितगुणः शिवमित्यप्यस्य भवति यद्यद्रूपं कामय
ते तत्तद्देवता भवति ॥ रूपं रूपं मघवा बोभवीतीत्यपि निगमो भवति वाचस्पतिर्वाचः पाता वा पालयिता
वा तस्यैषा भवति ॥ १७ ॥ पुनरेहि वाचस्पते देवेन मनसा सह ॥ वसोष्पते निरामय मय्येव तन्वं१ मम ॥

२७

इति सा निगदव्याख्याता ॥ पांनपात्तनूनपात्रा व्याख्यातस्तस्यैषा भवति ॥ १८ ॥ यो अनिध्मो दीदयद
प्स्व१ंतर्यं विप्रास ईळते अध्वरेषु ॥ अपांनपान्मधुमतीरपो दा याभिरिंद्रो वावृधे वीर्याय ॥ यो निध्मो
दीदयदीप्यतेऽभ्यंतरमप्सु यं मेधाविनः स्तुवंति यज्ञेषु सोपान्नपान्मधुमतीरपो देह्यभिषवाय याभि
रिंद्रो वर्द्धते वीर्याय वीरकर्मणे यमो यच्छतीति स्वतस्तस्यैषा भवति ॥ १९ ॥ परेयिवांसं प्रवतो महीरनु ब
हुभ्यः पंथामनुपस्पशानं ॥ वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य ॥ परेयिवांसं पर्याग
तवंतं प्रवत उद्वतो निवत इत्यवतिर्गतिकर्मा बहुभ्यः पंथानमनुपस्पाशयमानं वैवस्वतं संगमनं जना
नां यमं राजानं हविषा दुवस्येति दुवस्यती राध्नोतिकर्माऽग्निरपि यम उच्यते तमेता ऋचोनुप्रवदंति ॥
॥ २० ॥ सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका ॥ यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्ज
नीनां ॥ तं वश्चराथा वयं वसत्यास्तं न गावो नक्षंत इद्धं ॥ इति द्विपदाः सेनेव सृष्टा भयं वा बलं वा दधात्य

नि॰उ॰४

२८

स्तु रिव दिद्यु त्त्वेषप्रतीका भयप्रतीका बलप्रतीका यशः प्रतीका महाप्रतीका दीप्तप्रतीका वा ॥ यमो ह जा
त इंद्रेण सह संगतः ॥ यमाविहेह मातरे त्यपि निगमो भवति यमरवजातो यमो जनिष्यमाणो जारः कनी
नां जरयिता कन्यानां पतिर्जनीनां पालयिता जायानां तत्प्रधाना हि यज्ञसंयोगेन भवंति ॥ तृतीयो अ
ग्निष्टे पतिरित्यपि निगमो भवति तं वश्च राथा चरं त्सा पश्चाकुल्यां वसत्या च निवसं त्यौषधाकुल्यां स्तं य
था गाव अप्रभुवंति तथा प्रुयामेद्दू सम द्दुभोगैर्मित्रः प्रमीतेस्त्रायते संमिन्वानो द्रवतीति वा मेदयते र्वा
तस्यैषा भवति ॥ २१ ॥ मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्यां ॥ मित्रः कृष्टीरनि
मिषाभिचष्टे मित्राय हव्यं घृतवज्जुहोत ॥ मित्रो जनानायातयति ब्रुवाणः शब्दं कुर्वन्मित्र एव धारय
ति पृथिवीं च दिवं च मित्रः कृष्टीरनिमिषन्नभिविपश्यतीति कृष्टय इति मनुष्यनाम कर्मवंतो भवंति वि
कृष्टदेहा वा मित्राय हव्यं घृतवज्जुहोतेति व्याख्यातं जुहोतिर्दानकर्मा कः कमनो वा क्रमणो वा सुखो वा न

२८

ण्प

स्यैषा भवति ॥ २२ ॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ॥ स दाधार पृथिवीं द्यामु
ते मां कस्मै देवाय हविषा विधेम ॥ हिरण्यगर्भो हिरण्यमयो गर्भो हिरण्यमयो गर्भोस्येति वा गर्भो गृभेर्ग
णात्यर्थे गिरत्यनर्थानिति वा यदा हि स्त्रीगुणान्गृह्णाति गुणाश्चास्या गृह्यंतेऽथ गर्भो भवति समभ
वदग्रे भूतस्य जातः पतिरेको बभूव स धारयति पृथिवीं च दिवं च कस्मै देवाय हविषा विधेमेति व्या
ख्यातं विधतिर्दानकर्मा सरस्वान्व्याख्यातस्तस्यैषा भवति ॥ २३ ॥ ये ते सरस्व ऊर्मयो मधुमंतो घृतश्चु
तः ॥ तेभिर्नोविता भव ॥ इति सा निगदव्याख्याता ॥ २४ ॥ विश्वकर्मा सर्वस्य कर्ता तस्यैषा भवति ॥ २५ ॥
विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ॥ तेषामिष्टानि समिषा मदंति यत्रा सप्त ऋ
षीन्पर एकमाहुः ॥ विश्वकर्मा विभूतमना व्याप्ता धाता च विधाता च परमश्च संद्रष्टा भूतानां तेषामिष्टा
नि वा कांतानि वा क्रांतानि वा गतानि वा मतानि वा नतानि वाऽद्भिः सह संमोदंते यत्रैतानि सप्त ऋषीणा

नि॰ उ॰ ४

२९

निज्योतींषितेभ्यः परआदित्यस्तान्येतस्मिन्नेकंभवंतीत्यधिदैवतमथाध्यात्मं विश्वकर्मा विभूतमना
व्याप्ताधाताचविधाताचपरमश्च संदर्शयितेंद्रियाणमिषामिष्टानिवाकांतानिवाक्रांतानि वागतानि
वामतानिवानतानिवाऽन्नेनसहसंमोदंयंते ऽमानिसप्तऋषीणानींद्रियाण्येभ्यः परआत्मातान्येत
स्मिन्नेकंभवंतीत्यात्मगतिमाचष्टे तत्रेतिहासमाचक्षते विश्वकर्माभौवनः सर्वमेधेसर्वाणिभूतानिजु
हवांचकारस आत्मानमप्यंततोजुहवांचकार तदभिवादिन्येषर्ग्भवति य इमाविश्वाभुवनानिजुह्वदि
तितस्योत्तराभूयसेनिर्वचनाय॥२६॥ विश्वकर्मन्हविषावावृधानः स्वयंयजस्वपृथिवीमुतद्यां॥मु
ह्यंत्वन्येऽभितोजनासइहास्माकंमघवासूरिरस्तु॥ विश्वकर्मन्हविषावर्द्धयमानः स्वयंयजस्वपृ
थिवींचदिवंचमुह्यंत्वन्ये ऽभितोजनाःसपत्नाइहास्माकंमघवासूरिरस्तु प्रज्ञाताताक्ष्यस्त्वष्ट्राव्या
ख्यातस्तीर्णेंतरिक्षेक्षियतितूर्णमर्थंरक्षत्यश्नोतेर्वातस्यैषाभवति॥२७॥ त्यमूषुवाजिनंदेवजूतंसहावा

२९

नंतरुतारंरथानां॥ अरिष्टनेमिंपृतनाजमाशुंस्वस्तयेताक्ष्यमिहाहुवेम॥ तंभृशमन्नवंतं
जूतिर्गतिःप्रीतिर्वादेवजूतंदेवगतंदेवप्रीतंवासहस्वंतंतारयितारंरथानामरिष्टनेमिंपृत
नाजितमाशुंस्वस्तयेताक्ष्यमिहह्वयेमेतिकमन्यंमध्यमादेवमवक्ष्यत्तस्यैषापराभवति॥२८॥
सद्यश्चिद्यःशवसापंचकृष्टीःसूर्यइवज्योतिषापस्ततान॥ सहस्रसाःशतसाअस्यरंहिर्नस्मा
वरंतेयुवतिंनशर्यां॥ सद्योपियःशवसाबलेनतनोत्यपःसूर्यइवज्योतिषापंचमनुष्यजाता
निसहस्रसानिनीशतसानिन्यस्यसागतिर्नस्मैनांवारयंतिप्रयुवतीमिवशरमयीमिषुंमन्युर्म
न्यतेर्दीप्तिकर्मणःक्रोधकर्मणोवधकर्मणोवामन्युंत्यस्मादिषवस्तस्यैषाभवति॥२९॥ त्वया
मन्योसरथमारुजंतोहर्षमाणासोधृषितामरुत्वः॥ तिग्मेषवआयुधासंशिशानाअभिप्रयंतु
नरोअग्निरूपाः॥ त्वयामन्योसरथमारुह्यरुजंतोहर्षमाणासोधृषितामरुत्वस्तिग्मेषवआयु

नि॰ ३॰ ४

धानि संशिश्यमानो अभिप्रयंतु नरो अग्निरूपा अग्निकर्माणः संनद्धाः कवचिन इति वा दधि
क्रा व्याख्यातस्तस्यैषा भवति ॥ ३० ॥ आ दधिक्राः शवसा पंच कृष्टीः सूर्य इव ज्योतिषापस्ततान ॥
सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि ॥ आतनोति दधिक्राः शवसा बलेनाऽपः
सूर्य इव ज्योतिषा पंच मनुष्यजातानि सहस्रसाः शतसा वाजी वेजनवानर्वेरणवान्संपृणक्तु नो
मधुनोदकेन वचनानीमानीति मधु धमतेर्विपरीतस्य सविता सर्वस्य प्रसविता तस्यैषा भवति ॥
॥ ३१ ॥ सविता यंत्रैः पृथिवीमरम्णादस्कंभने सविता द्यामदृंहत् ॥ अश्वमिवाधुक्षद्धुनिमंतरिक्ष
मतूर्ते बद्धं सविता समुद्रं ॥ सविता यंत्रैः पृथिवीमरमयदनारंभणेंतरिक्षे सविता द्यामदृंहदश्व
मिवाधुक्षद्धुनिमंतरिक्षे मेघं बद्धमतूर्ते बद्धमतूर्ण इति वा त्वरमाण इति वा सविता समुदितार
मिति कमन्यं मध्यमादेवमवक्ष्यदादित्योपि सवितोच्यते तथा च हैरण्यस्तूपे स्तुतो र्चन्हिरण्य

ता २

३० स्त

३०

स्तूप ऋषिरिदं सूक्तं प्रोवाच तदभिवादिन्येषर्ग्भवति ॥ ३२ ॥ हिरण्यस्तूपः सवितर्यथा त्वांगिरसो जु
ह्वे वाजे अस्मिन् ॥ एवा त्वार्चन्नवसे वंदमानः सोमस्यैवांशुं प्रतिजागराहं ॥ हिरण्यस्तूपो हिरण्यमयः
स्तूपो हिरण्यमयः स्तूपोस्येति वा स्तूपः स्त्यायतेः संघातः सवितर्यथा त्वांगिरसो जुह्वे वाजेन्नेस्मिन्न्ने
वं त्वार्चन्नवनाय वंदमानः सोमस्यैवांशुं प्रतिजागर्म्यहं त्वष्टा व्याख्यातस्तस्यैषा भवति ॥ ३३ ॥ देवस्त्व
ष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान ॥ इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमे
कं ॥ देवस्त्वष्टा सविता सर्वरूपः पोषति प्रजा रसानुप्रदानेन बहुधा चेमा जनयतीमानि च सर्वाणि
भूतान्युदकान्यस्य महच्चास्मै देवानामसुरत्वमेकं प्रज्ञावत्त्वं वानवत्त्वं वाऽपि वासुरिति प्रज्ञाना
मास्यत्यनर्थानस्ताश्चास्यामर्था असुरत्वमादिलुप्तं वातो वातीति सतस्तस्यैषा भवति ॥ ३४ ॥ वात
आ वातु भेषजं शंभु मयोभु नो हृदे ॥ प्रण आयूंषि तारिषत् ॥ वात आवातु भेषज्यानि शंभु मयोभु च नो

नि॰३॰४

३९

सूर्यायप्रवर्द्धयतु च न आयुरग्निर्व्याख्यातस्तस्यैषाभवति ॥३५॥ प्रति त्यं चारुमध्वरं गोपीथाय प्रहू-
यसे ॥ मरुद्भिरग्न आगहि ॥ तं प्रति चारुमध्वरं सोमपानाय प्रहूयसे सोऽग्ने मरुद्भिः सहागच्छेति कम-
नीयं मध्यमो देवमवक्ष्यत्तस्यैषापराभवति ॥३६॥ अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु ॥ मरुद्भिर-
ग्न आगहि ॥ अभिसृजामि त्वा पूर्वपीतये पूर्वपानाय सोम्यं मधु सोममयं सोऽग्ने मरुद्भिः सहागच्छेति ॥
॥३७॥ वेनो वेनतेः कान्तिकर्मणस्तस्यैषाभवति ॥३८॥ अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू र-
जसो विमाने ॥ इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥ अयं वेनश्चोदयत्पृश्निगर्भाः
प्राष्टवर्णगर्भा आप इति वा ज्योतिर्जरायुर्ज्योतिरस्य जरायुस्थानीयं भवति जरायु जरया गर्भस्य
जरया यूयत इति वेममपां च संगमने सूर्यस्य च शिशुमिव विप्रा मतिभी रिहन्ति लिहन्ति स्तुवन्ति व-
र्धयन्ति पूजयन्तीति वा शिशुः शंसनीयो भवति शिशीतेर्वा स्याद्दानकर्मणश्चिरलब्धो गर्भो भवत्य

३९

सुनीतिरसून्नयति तस्यैषाभवति ॥३९॥ असुनीते मनो अस्मासु धारय जीवातवे सु प्रतिरा
न आयुः ॥ रारन्धि नः सूर्यस्य संदृशि घृतेन त्वं तन्वं वर्द्धयस्व ॥ असुनीते मनोऽस्मासु धारय चि-
रं जीवनाय प्रवर्द्धय च न आयू रन्धय च नः सूर्यस्य संदर्शनाय रध्यतिर्वशगमनेऽपि दृश्यते ॥ मार-
धाम द्विषते सोम राजन्नित्यपि निगमो भवति घृतेन त्वमात्मानं तन्वं वर्द्धयस्व ऋतो व्याख्यातस्तस्यै-
षाभवति ॥४०॥ ऋतस्य हि शुरुधः सन्ति पूर्वीः ऋतस्य धीतिर्वृजिनानि हन्ति ॥ ऋतस्य श्लोको बधि-
रा ततर्द कर्णा बुधानः शुचमान आयोः ॥ ऋतस्य हि शुरुधः सन्ति पूर्वीः ऋतस्य प्रज्ञा वर्जनीया-
नि हन्ति ऋतस्य श्लोको बधिरस्यापि कर्णावातृणत्ति बधिरो बद्धश्रोत्रः कर्णौ बोधयन्दीप्यमा-
नश्चायोरयनस्य मनुष्यस्य ज्योतिषो वोदकस्य वैन्दुरिन्धेरुनत्तेर्वा तस्यैषाभवति ॥४१॥ प्रतद्वो वे-
षं भ आयेंदविह व्योन यदृष्वान्मन्मरेजति रक्षोहा मन्म रेजति ॥ स्वयंसो अस्मदा निदो वधैरजे

तदुर्मृतिं॥ अव स्म वेदघशंसोवतरमवरं क्षुद्रमिव स्रवेत॥ अब्रवीमि तद्वायेंद्र वेहवना
हृद्रवयद्रेषवानंन्नवान्कामवान्वामननानि च नो रेजयति रक्षोहा च बलेन रेजयति स्वयं
सोस्मद्वष्टिर्निर्दितारं॥ वध्रे रेजित दुर्मृतिं॥ अवस्रवेदघशंसस्ततश्चावतरं क्षुद्रमिवावस्रवे
दभ्यासेभूयांस मर्थंमन्यंते यथाहो दर्शनीयाहो दर्शनीयेति तत्सरुच्छेपस्य शीलं परुच्छेप ऋ
षिः पर्ववच्छेपः परुषि परुषि शेपोस्येति वैतानि मानि सप्तविंशतिर्देवतानामधेयान्यनुक्रां
तानि सूक्तभांजि हविर्भांजि तेषामेतान्य हविर्भांजि वेनो सूनीतिर्ऋत इंदुः प्रजापतिः प्रजा
नां पाता वा पालयिता वा तस्यैषा भवति॥ ४२॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता
बभूव॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां॥ प्रजापते न हि त्वदेतान्य
न्यः सर्वाणि जातानि तानि परि बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयी

णामित्याशीराहिर्व्याख्यातस्तस्यैषा भवति॥ ४३॥ अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु
षीदन्॥ अप्सुजमुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु सदनेषु सीदन्बुध्नमंतरिक्षं बद्धा अस्मि
न्धृता आप इति वेदमपीतरद्बुध्नमेतस्मादेव बद्धा अस्मिन्धृताः प्राणा इति योहिः स बुध्न्यो बु
ध्नमंतरिक्षं तन्निवासात्तस्यैषा भवति॥ ४४॥ मा नो हिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृ
तायोः॥ मा च नो हिर्बुध्न्यो रेषणाय धान्मास्य यज्ञोरवान्वस्त्रिधद्यज्ञकामस्य सुपर्णो व्याख्या
तस्तस्यैषा भवति॥ ४५॥ एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे॥ तं पाके
न मनसा पश्यमंतितस्तं माता रेळ्हि स उ रेळ्हि मातरं॥ एकः सुपर्णः स समुद्रमाविशति स इमा
नि सर्वाणि भूतान्यभिविपश्यति तं पाकेन मनसा पश्यमंतित इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्या
ख्यानसंयुक्तातं माता रेळ्हि वागेषा माध्यमिका स उ मातरं रेळ्हि पुरूरवा बहुधा रोरूयते तस्यै

नि॰ उ॰ ४

३२

पा भवति ॥४६॥ समस्मिञ्जायमान आसत ग्ना उतेमवर्द्धन्नद्यः स्वगूर्त्ताः ॥ महे यत्त्वा पुरूरवो र
णायावर्द्धयन्दस्युहत्याय देवाः ॥ समासतास्मिञ्जायमाने ग्ना गमनादापो देवपत्न्यो वाऽपि चै
नमवर्द्धयन्नद्यः स्वगूर्त्ताः स्वयंगामिन्यो महते च यत्त्वा पुरूरवो रणाय रमणीयाय संग्रामा
याऽवर्द्धयन्दस्युहत्याय च देवा देवाः ॥४७॥ ॥ अथातो मध्यस्थाना वायुर्वायो याह्यासस्त्राणा सोनी
चीनं बारं तमस्मिन्मारुद्राय यातेदिद्युत्सारा नो धारा दर्द्युर्जातो विद्युक्षान आपिनक्मभ्यास्यमवृतं
क्षेत्रस्य पतिः क्षेत्रस्य पतिना क्षेत्रस्य पते मीव हा पुनेरद्दि यो अनिध्मः परिषिवांस सेनेव सृष्टामि
त्रो जनान्हिरण्यगर्भो ये ते सरस्वो विश्वकर्मा सर्वस्य विश्वकर्मा विमना विश्वकर्मन्नु विषात्यमूषु
सघश्वित्त्वा यो मन्यो आ दधिक्राः सविता हिरण्यरूपो देवस्त्वष्टा वात आ वातु प्रतित्यमभि त्वा वेनो
वेनतेरयं वेनो असुनीत ऋतस्य हि प्रतद्वोचेयं प्रजापते आमुवत्येर्मा नो अहिरेकः सुपर्णः समस्मिन्नस

३२

न्न चत्वारिंशत् ॥ ॥ इति निरुक्ते उत्तरषट्के चतुर्थोध्यायः ॥ ॥ ॐ ॥ ॥ श्येनो व्याख्यातस्तस्यैषा भव
ति ॥१॥ आदाय श्येनो अभरत्सोमं सहस्रं सवाँ अयुतं च साकं ॥ अत्रा पुरंधिरजहादरातीर्मदे सोम
स्य मूरा अमूरः ॥ आदाय श्येनोऽहरत्सोमं सहस्रं सवानयुतं च सह सहस्रं सहस्रसाव्यमभिप्रेत्य त
त्रायुतं सोमभक्षास्तत्संबंधेनायुतं दक्षिणा इति वा तत्र पुरंधिरजहादमित्रानदानानिति वा मदे सो
मस्य मूरा अमूर इत्यैंद्रे च सूक्ते सोमपानेन च स्तुतस्तस्मादिंद्रं मन्यंते ओषधिः सोमः सुनो
तेर्यदेनमभिषुण्वंति बहुलमस्य नैघंटुकं वृत्तमाश्चर्यमिव प्राधान्येन तस्य पावमानीषु निद
र्शनायोदाहरिष्यामः ॥२॥ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ॥ इंद्राय पातवे सुतः ॥ इति
सा निगदव्याख्याताऽथैषाऽपरा भवति चंद्रमसो वैतस्य वा ॥३॥ सोमं मन्यते पपिवान्यत्संपिं
षंत्योषधिं ॥ सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥ सोमं मन्यते पपिवान्यत्संपिंषंत्योष

नि॰उ॰५

धिमिति ह्यथासुतमसोममाह सोमं यं ब्रह्माणो विदुरिति न तस्याश्नाति कश्चनायज्वेत्यधियज्ञमथा
धिदैवतं सोमं मन्यते पपिवान्यत्संपिंषंत्योषधिमिति यजुः सुतमसोममाह सोमं यं ब्रह्माणो
विदुश्चंद्रमसं न तस्याश्नाति कश्चनादेव इत्यथैषापरा भवति चंद्रमसो वै तस्य वा ॥४॥ यत्त्वा देव
प्रपिबंति तत आप्यायसे पुनः ॥ वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥ यत्त्वा देव प्रपिबं
ति तत आप्यायसे पुनरिति नाराशंसानभिप्रेत्य पूर्वपक्षापरपक्षाविति वा वायुः सोमस्य रक्षि
ता वायुमस्य रक्षितारमाह साहचर्याद्रसहरणाद्वा समानां संवत्सराणां मास आकृतिः सोमो रू
पविशेषैरोषधिश्चंद्रमा वा चंद्रमाश्चायं द्रमति चंद्रो माता चांद्रं मानमस्येति वा चंद्रश्चंदतेः कांति
कर्मणश्चंदनमित्यप्यस्य भवति चारु द्रमति चिरं द्रमति चमेर्वा पूर्वं चारु रुचेर्विपरीतस्य तस्यै
षा भवति ॥५॥ नवो नवो भवति जायमानो ह्नां केतुरुषसामेत्यग्रं ॥ भागं देवेभ्यो विदधात्यायन्प्र

३४

नभक्षयमिति कलशः कस्मात्कला अस्मिन्शेरते मात्राः कलिश्च कलाश्च किरतेर्विकीर्णमात्राः ॥
॥१२॥ अथातो मध्यस्थाना देवगणास्तेषां मरुतः प्रथमागामिनो भवंति मरुतो मितराविणो वा
मितरोचिनो वा महद्द्रवंतीति वा तेषामेषा भवति ॥१३॥ आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्या
त ऋष्टिमद्भिरश्वपर्णैः ॥ आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥ विद्युन्मद्भिर्मरुतः स्वर्कैः
स्वंचनैरिति वा स्वर्चनैरिति वा स्वर्चिभिरिति वा रथैरायात ऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठे
न च नो न्नेन वय इवापतत सुमायाः कल्याणकर्माणो वा कल्याणप्रज्ञा वा रुद्रा व्याख्यातास्तेषा
मेषा भवति ॥१४॥ आ रुद्रास इंद्रवंतः सजोषसो हिरण्यरथाः सुविताय गंतन ॥ इयं वो अस्मत्
प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे ॥ आगच्छत रुद्रा इंद्रेण सहजोषणाः सुविताय क
र्मण इयं वो स्मदपि प्रतिकामयते मतिस्तृष्णज इव दिव उत्सा उदन्यवे तृष्णक् तृष्यतेरुदन्युरुदन्य

नि॰उ॰५

तैर्ऋभवउरु भान्तीति वर्त्तेन भान्तीति वर्त्तेन भवन्तीति वा तेषामेषा भवति ॥१५॥ विष्ट्वी शमी तरणित्वेन
वाघतो मर्त्तासः सन्तो अमृतत्वमानशुः ॥ सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यं
त धीतिभिः ॥ कृत्वा कर्माणि क्षिप्रत्वेन वोढारो मेधाविनो वा मर्त्तासः सन्तो अमृतत्वमानशिरे सौ

३६

धन्वना ऋभवः सूरख्याना वा सूरप्रज्ञा वा संवत्सरे समपृच्यन्त धीतिभिः कर्मभिर्ऋभुर्विभ्वा
वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुस्तेषां प्रथमोत्तमाभ्यां बहुवन्निगमा भ
वन्ति न मध्यमेन तदेतदृभोश्च बहुवचनेन चमसस्य च संस्तवेन बहूनि दशतयीषु सूक्ता
निभवन्त्यादित्यरश्मयोप्यृभव उच्यन्ते ॥ अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु

३६

गच्छथ ॥ अगोह्य आदित्योगूहनीयस्तस्य यदस्वपथ गृहे यावत्तत्र भवथ न तावदिह भ
वथेत्यङ्गिरसो व्याख्यातास्तेषामेषा भवति ॥१६॥ विरूपास इदृषयस्त इद्गम्भीरवेपसः॥

चंद्रमास्तिरते दीर्घमायुः ॥ नवोनवो भवति जायमान इति पूर्वपक्षादिमभिप्रेत्याह्नां केतुरुषसामे
त्यग्रमित्यपरपक्षान्तमभिप्रेत्यादित्यदैवतो द्वितीयः पाद इत्येके भागं देवेभ्यो विदधात्यायन्नित्य
र्द्धमासेज्यामभिप्रेत्य प्रवर्द्धयते चंद्रमा दीर्घमायुर्मृत्युर्मारयतीति सतो मृतं च्यावयतीति वा श
तबलाक्षो मौद्गल्यस्तस्यैषा भवति ॥६॥ परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात् ॥ च
क्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥ परं मृत्यो ध्रुवं मृत्यो ध्रुवपरेहि मृत्यो
कथितं तेन मृत्यो मृतं च्यावयते भवति मृत्यो मदेर्वा मुदेर्वा तेषामेषा भवति ॥७॥ त्वेषमित्था समर
णं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति ॥ या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामुरु
ष्यथः ॥ इति सा निगदव्याख्याता विश्वानरो व्याख्यातस्तस्यैषा भवति ॥८॥ प्र वो महे मंदमानायां
धसोर्चा विश्वानराय विश्वाभुवे ॥ इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ॥ प्रा

नि॰३॰५

र्वतमूसंस्कृतिंमहतेंधसोन्नस्यदात्रेमंदमानायमोदमानायस्तूयमानायस्तूयमानायेति
वाविश्वानरायसर्वंविभ्रतायेंद्रस्यायस्यप्रीतौस्म॰ महद्बलंमहच्छ्रवणीयंयन्नोन्मणंचबलं
न्नृम्णंतंद्यावापृथिव्योवःपरिचरतइतिकमन्यंमध्यमादेवमवक्ष्यत्तस्यैषापराभवति॥९॥उदुज्योति
रमृतंविश्वजन्यंविश्वानरःसवितादेवोअश्रेत्॥उदश्रिश्रियज्ज्योतिरमृतंसर्वजन्यंविश्वानरःसविता
देवइतिधातासर्वस्यविधातातस्यैषाभवति॥१०॥धातादंदातुदाशुषेप्राचींजीवातुमक्षितां॥वयं
देवस्यधीमहिसुमतिंसत्यधर्मणः॥धातादंदातुदत्तवतेप्रवृद्धांजीविकामनुपक्षीणांवयंदेवस्य
धीमहिसुमतिंकल्याणींमतिंसत्यधर्मणोविधाताधात्राव्याख्यातस्तस्यैषनिपातोभवतिबहु
देवतायामृचि॥११॥सोमस्यराज्ञोवरुणस्यधर्मणिबृहस्पतेरनुमत्याउशर्मणि॥तवाहमद्यम
घवन्नुपस्तुतौधातर्विधातःकलशांअभक्षयं॥इत्येताभिर्देवताभिरभिप्रसूतःसोमकलशा

३५

३५

तेअंगिरसःसूनवस्तेअग्नेःपरिजज्ञिरे॥बहुरूपाऋषयस्तेगंभीरकर्मणोवागंभीरप्रज्ञा
वांतेंगिरसःपुत्रास्तेग्नेरधिजज्ञिरइत्यग्निजन्मपितरोव्याख्यातास्तेषामेषाभवति॥१७॥उदी
रतामवरउत्परासउन्मध्यमाःपितरःसोम्यासः॥असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोह
वेषु॥उदीरतामवरउदीरतांपरउदीरतांमध्यमाःपितरःसोम्याःसोमसंपादिनस्तेसुंयेप्राण
मन्वीयुरवृकाअनमित्राःसत्यज्ञावायज्ञज्ञावातेनआगच्छंतुपितरोह्वानेषुमाध्यमिकोयमइत्या
हुस्तस्मान्माध्यमिकान्पितॄन्मन्यंतेंगिरसोव्याख्याताःपितरोव्याख्याताभृगवोव्याख्याताअ
थर्वाणोथनर्वतःस्थर्वतिश्चरतिकर्मातत्प्रतिषेधस्तेषामेषासाधारणाभवति॥१८॥अंगिरसोनः
पितरोनवग्वाअथर्वाणोभृगवःसोम्यासः॥तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसेस्या
म॥अंगिरसोनःपितरोनवगतयोनवनीतगतयोवाथर्वाणोभृगवःसोम्याःसोमसंपादिनस्ते

नि॰उ॰५

३२

षां वयं सुमतौ कल्याण्यां मतौ यज्ञियानामपि चैषां भद्रे भंदनीये भाजनवति वा कल्याणे मनसि
स्यामेति माध्यमिको देवगण इति नैरुक्ताः पितर इत्याख्यानमथाप्यृषयः स्तूयंते ॥१९॥ सूर्य
स्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः ॥ वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अ
न्वेतवे वः ॥ इति यथा आदित्या आप्नोते स्तेषामेषा निपातो भवत्यैंद्र्यामृचि ॥२०॥ सुषेध्यं पुरुव
र्पसमृभ्वमिनतममाप्त्यमाप्त्यानां ॥ आदर्षते शवसा सप्त दानून्प्रसाक्षते प्रतिमानानि भू
रि ॥ सुषोतव्यं बहुरूपमुरुभूतमीश्वरतममाप्तव्यमाप्तव्यानां आदृणाति यः शवसा बलेन सप्त
दातॄनिति वा सप्त दानवानिति वा प्रसाक्षते प्रतिमानानि बहूनि साक्षतिराप्नोतिकर्मा ॥२१॥ अ
थातो मध्यस्थाना स्त्रियस्तासामदितिः प्रथमागामिनी भवत्यदितिर्व्याख्याता तस्या एषा भ
वति ॥२२॥ दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि ॥ अतूर्तपंथाः पुरुरथो अ

३७

र्यमा सप्तहोता विषुरूपेषु जन्मसु ॥ दक्षस्य वादिते जन्मनि व्रते कर्मणि राजानौ मित्रावरुणौ परिचरसि
विवासतिः परिचर्यायां हविष्मां आविवासतीत्याशास्ते वा ऽतूर्तपंथा अत्वरमाणपंथा बहुरथो र्य
मादित्योऽरीनभियच्छति सप्तहोता सप्तास्मै रश्मयो रसानभिसंनामयंति सप्तैनमृषयः स्तुवंतीति वा वि
षमरूपेषु जन्मसु कर्मसूदयेष्वादित्यो दक्ष इत्याहुरादित्यमध्ये च स्तुतोऽदितिर्दाक्षायणी ॥ अदितेर्द
क्षो अजायत दक्षाद्वदितिः परीति च तत्कथमुपपद्येत समानजन्मानौ स्यातामित्यपि वा देवधर्मेणेत
रेतरजन्मानौ स्यातामितरेतरप्रकृती आग्निरप्यदितिरुच्यते तस्यैषा भवति ॥२३॥ यस्मै त्वं सुद्रवि
णो ददाशो ऽनागास्त्वमदिते सर्वताता ॥ यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम ॥ यस्मै त्वं सु
द्रविणो ददास्यनागास्त्वमनपराधत्वमदिते सर्वासु कर्मततिष्वाग आङ्पूर्वाद्गमेरेन एतेः किल्बिषं कि
ल्भिदं सुकृतकर्मणो भयं कीर्त्तिमस्य भिनत्तीति वा यं भद्रेण शवसा बलेन चोदयसि प्रजावता च राधसा

स्य

नि॰उ॰५

धनेनेतिवयमिहस्यामेतिसरमासरणात्तस्याएषाभवति॥२४॥किमिछंतीसरमाप्रेदमानट्दू
रेह्यध्वाजगुरिःपराचैः॥कास्मेहितिःकापरितक्म्यासीत्कथंरसायाअतरःपयांसि॥किमिछंती
सरमेदंप्रानट्दूरेह्यध्वाजगुरिर्जंगम्यतेःपरांचैनैरंचितःकातेस्मास्वर्थहितिरासीत्किंपरितक

३८

नंपरितक्म्याराज्ञिःपरितएनांतक्मतक्मेत्यल्पनामतकतइतिसतःकथंरसायाअतरःपयां
सीतिरसानदीरसतेःशब्दकर्मणःकथंरसानितान्युदकानीतिवादेवशुनींद्रेणप्रहितापणिभि

म॰

रसुरैःसंवदइत्याख्यानंसरस्वतीव्याख्यातातस्याएषाभवति॥२५॥पावकानःसरस्वतीवाजेभि
र्वाजिनीवती॥यज्ञंवष्टुधियावसुः॥पावकानःसरस्वत्यन्नैरन्नवतीयज्ञंवष्टुधियावसुःकर्मवसु

३८

स्तस्याएषापराभवति॥२६॥महोअर्णःसरस्वतीप्रचेतयतिकेतुना॥धियोविश्वाविराजति॥मह
दर्णःसरस्वतीप्रचेतयतिप्रज्ञापयतिकेतुनाकर्मणाप्रज्ञयावेमानिचसर्वाणिप्रज्ञानान्यभिविराज

तिवागर्थेषुविधीयतेतस्मान्माध्यमिकांवाचंमन्यंतेवाग्व्याख्यातातस्याएषाभवति॥२७॥यद्वाग्वदं
त्यविचेतनानिराष्ट्रीदेवानांनिषसादमंद्रा॥चतस्रऊर्जंदुदुहेपयांसिक्वस्विदस्याःपरमंजगाम॥यद्वा
ग्वदंत्यविचेतनान्यविज्ञातानिराष्ट्रीदेवानांनिषसादमंद्रामदनाचतस्रोनुदिशऊर्जंदुदुहेपयांसि
क्वस्विदस्याःपरमंजगामेतियत्पृथिवींगच्छतीतिवायदादित्यरश्मयोहरंतीतिवातस्याएषापराभ
वति॥२८॥देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवोवदंति॥सानोमंद्रेषमूर्जंदुहानाधेनुर्वा
गस्मानुपसुष्टुतैतु॥देवींवाचमजनयंतदेवास्तांसर्वरूपाःपशवोवदंतिव्यक्तवाचश्चाव्यक्तवाच
श्चसानोमदनान्नंचरसंचदुहानाधेनुर्वागस्मानुपैतुसुष्टुतानुमतीराकेतिदेवपत्न्याविति नैरुक्ताः
पौर्णमास्याविति याज्ञिकायापूर्वापौर्णमासीसानुमतिर्योत्तरासाराकेतिविज्ञायतेऽनुमतिरनुम
ननात्तस्याएषाभवति॥२९॥अन्विदनुमतेत्वंमन्यासैशंचनस्कृधि॥क्रत्वेदक्षायनोहिनुप्रणआयूं

एषा

नि॰उ॰५

२९

पितारिषः॥ अनुमन्यस्वानुमते त्वं सुखं च नः कुर्वन्नं च नोपत्याय धेहि प्रवर्द्धय च न आयुः प्रतारयाराते
र्दनकर्मणस्तस्या एषा भवति॥३०॥ राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना॥ सीव्य
त्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यं॥ राकामहं सुह्वानां सुष्टुत्या ह्वये शृणोतु नः सुभगा
बोधत्वात्मनां सीव्यत्वपः प्रजननकर्म सूच्याछिद्यमानया सूची सीव्यतेर्ददातु वीरं शतप्रदमुक्थ्यं व
क्तव्यप्रशंसं सिनीवाली कुहूरिति देवपत्न्याविति नैरुक्ता अमावास्ये इति याज्ञिका या पूर्वामावास्या
सा सिनीवाली योत्तरा सा कुहूरिति विज्ञायते सिनीवाली सिनमन्नं भवति सिनाति भूतानि वालं पर्व
वृणोतेस्तस्मिन्नन्नवती वालिनी वा वालेनेवास्यामणुत्वाच्चंद्रमाः सेवितव्यो भवतीति वा तस्या एषा
भवति॥३१॥ सिनीवालि पृथुष्टुके या देवानामसि स्वसा॥ जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः॥
सिनीवालि पृथुजघने स्तुकः स्त्यायतेः संघातः पृथुकेशस्तुके पृथुस्तुके वा या त्वं देवानामसि स्व

२९

सा स्वसा सु असा स्वेषु सीदतीति वा जुषस्व हव्यमदनं प्रजां च देवि दिशस्व नः कुहूर्गूहतेः क्वाभूदिति वा क्व
सती हूयत इति वा क्वाहुतं हविर्जुहोतीति वा तस्या एषा भवति॥३२॥ कुहूमहं सुवृतं विद्मनापसमस्मिन्य
ज्ञे सुहवां जोहवीमि॥ सा नो ददातु श्रवणं पितॄणां तस्यै ते देवि हविषा विधेम॥ कुहूमहं सुकृतं विदितकर्माणम
स्मिन्यज्ञे सुह्वानामाह्वये सा नो ददातु श्रवणं पितॄणां पित्र्यं धनमिति वा पित्र्यं यश इति वा तस्यै ते देवि हवि
षा विधेमेति व्याख्यातं यमी व्याख्याता तस्या एषा भवति॥३३॥ अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लि
बुजेव वृक्षं॥ तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्रां॥ अन्यमेव हि त्वं यम्यन्यस्त्वां परिष्वं
क्ष्यते लिबुजेव वृक्षं तस्य वा त्वं मन इच्छ स वा तवाथानेन कुरुष्व संविदं सुभद्रां कल्याणभद्रां यमी यमं च
कमे तां प्रत्याचचक्ष इत्याख्यानं॥३४॥ उर्वशी व्याख्याता तस्या एषा भवति॥३५॥ विद्युन्न या पतन्ती दविद्यो
द्भरन्ती मे अप्या काम्यानि॥ जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः॥ विद्युदिव या पतंत्य

नि॰उ॰५

४०

द्यौ ततहरंतीमे अप्याकाम्यान्युदकान्यंतरिक्षलोकस्य यदा नून मयं जायेतांद्रोध्यपद्मतिर्नर्योमनु
ष्यो नरस्यो हितो नरापत्यमिति वा सुजातः सुजाततरो धीर्वशी प्रवर्द्धयते दीर्घमायुः पृथिवी व्याख्याता
तस्या एषा भवति ॥ ३६ ॥ बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि ॥ प्र या भूमिं प्रवत्वति मह्ना जिनोषि
महिनि ॥ सत्यं त्वं पर्वतानां मेघानां खेदनं छेदनं भेदनं बलमत्र धारयसि पृथिवि प्रजिन्वसि या भू
मिं प्रवणवति महत्वेन महती उदकवतीति वेन्द्राणी इन्द्रस्य पत्नी तस्या एषा भवति ॥ ३७ ॥ इन्द्राणीमासु
नारिषु सुभगामहमश्रवं ॥ नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥ इन्द्राणीमा
सु नारिषु सुभगामहमश्रौषं नह्यस्या अपरामपि समां जरया म्रियते पतिः सर्वस्माद्य इन्द्र उत्तरस्त
मेतद्ब्रूमस्तस्या एषापरा भवति ॥ ३८ ॥ नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते ॥ यस्येदमप्यं हविः
प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥ नाहमिन्द्राणि रमे सख्युर्वृषाकपेर्ऋते यस्येदमप्यं हविः

४०

रप्सु भृतमद्भिः संस्कृतमिति वा प्रियं देवेषु निगच्छति सर्वस्माद्य इन्द्र उत्तरस्तमेतद्ब्रूमो गौरी रोचते
र्ज्वलतिकर्मणो ऽयमपीतरो गौरो वर्ण एतस्मादेव प्रशस्यो भवति तस्या एषा भवति ॥ ३९ ॥ गौरीर्मिमाय स
लिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ॥ अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥
गौरी निर्मिमाय सलिलानि तक्षती कुर्वत्येकपदी मध्यमेन द्विपदी मध्यमेन चादित्येन च चतुष्प
दी दिग्भिरष्टापदी दिग्भिश्चावान्तरदिग्भिश्च नवपदी दिग्भिश्चावान्तरदिग्भिश्चादित्येन च सहस्रा
क्षरा बहूदका परमे व्यवने तस्या एषापरा भवति ॥ ४० ॥ तस्याः समुद्रा अधि विक्षरन्ति तेन जीवन्ति प्र
दिशश्चतस्रः ॥ ततः क्षरत्यक्षरं तद्विश्वमुपजीवति ॥ तस्याः समुद्रा अधिविक्षरन्ति वर्षन्ति मेघास्तेन
जीवन्ति दिगाश्रयाणि भूतानि ततः क्षरत्यक्षरमुदकं तत्सर्वाणि भूतान्युपजीवन्ति गौर्व्याख्याता त
स्या एषा भवति ॥ ४१ ॥ गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ॥ सृक्वाणं घर्ममभि वा

नि॰उ॰५

४१

वसूनांनाभिमादितिमायुंपयतिपयोभिः॥ गौरन्वमीमेद्वत्संनिमिषंतमनिमिषंतमादित्यमितिवामूर्द्
नमस्याभिहिङ्कृणोतिस्मनन्नायस्रक्वाणंसरणंघर्मंहरणमभिवावशानामिमातिमायुंप्यायेत
पयोभिर्मायुमिवादित्यमितिवावागेषामाध्यमिकाघर्मधुगितियाज्ञिकाधेनुर्दीयतेवाधिनो
तेर्वातस्याएषाभवति॥४२॥ उपह्वयेसुदुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनां॥ श्रेष्ठंसवंसवि
तासाविषन्नोऽभीद्धोघर्मस्तदुषुप्रवोचं॥ उपह्वयेसुदोहनांधेनुमेतांकल्याणहस्तोगोधुगपिच
दोग्ध्येनांश्रेष्ठंसवंसवितासुनोतुनइत्येषहिश्रेष्ठः सर्वेषांसवानांयदुदकंयद्वापयोयजुष्मदभी
द्धोघर्मस्तंसुप्रब्रवीमिवागेषामाध्यमिकाघर्मधुगितियाज्ञिकाअघ्न्याहंतव्याभवत्यघघ्नीतिवा
तस्याएषाभवति॥४३॥ सूयवसाद्भगवतीहिभूयाअथोवयंभगवंतःस्याम॥ अद्धितृणमघ्न्येवि
श्वदानींपिबशुद्धमुदकमाचरंती॥ सुयवसादिनीभगवतीहिभवअथेदानींवयंभगवंतःस्याम॥

४१

द्धितृणमघ्न्येसर्वदापिबचशुद्धमुदकमाचरंतीतस्याएषापराभवति॥४४॥ हिङ्कृण्वतीवसुपत्नी
वसूनांवत्समिच्छंतीमनसाभ्यागात्॥ दुहामश्विभ्यांपयोअघ्न्येयंसावर्द्धतांमहतेसौभगाय॥ इतिसा
निगदव्याख्यातापथ्यास्वस्तिःपंथाअंतरिक्षंतन्निवासात्तस्याएषाभवति॥४५॥ स्वस्तिरिद्धिप्र
पथेश्रेष्ठारेक्णस्वत्यभियावाममेति॥ सानोअमासोअरणेनिपातुस्वावेशाभवतुदेवगोपा॥ स्व
स्तिरेवहिप्रपथेश्रेष्ठारेक्णस्वतीधनवत्यभ्येतियावसूनिवननीयानिसानोअमागृहेसानिरमणे
सानिर्गमनेपातुस्वावेशाभवतुदेवीगोप्त्रीदेवानांगोपायित्रीतिदेवाएनांगोपायंत्वितिवोषाव्याख्याता
तस्याएषाभवति॥४६॥ अपोषाअनसःसरत्संपिष्टादहबिभ्युषी॥ निषत्सींशिश्नथद्वृषा॥ अपासर
दुषाअनसःसंपिष्टान्मेघाद्बिभ्युष्यतोवायुरनितेरपिवोपमार्थेस्यादनसइवशकटादिवानःशक
टमानद्धमस्मिंश्चीवरमनितेर्वास्याज्जीवनकर्मणउपजीवंत्वेनन्मेघोप्यनएतस्मादेवयन्निरराशिश्न

नि.उ.५

४२

भद्रुषा वर्षिता मध्यमस्तस्या एषा परा भवति ॥४७॥ एतदस्या अनः शये सुसंपिष्टं विपाश्या ॥ ससार सीं प
रावतः ॥ एतदस्या अनः आशेते सुसंपिष्टमितरदिव विपाश्यां विमुक्तपात्री ससार सेषा परावतः प्रेरितवतः प
परागताद्धैळा व्याख्याता तस्या एषा भवति ॥४८॥ अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु ॥
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः ॥ सिषक्तु न ऊर्जव्यस्य पुष्टेः ॥ अभिगृणातु न इळा
यूथस्य माता सर्वस्य माता स्मदभि नदीभिरुर्वशी वा गृणातूर्वशी वा बृहद्दिवा महद्दिवा गृणानाभ्यू
र्ण्वाना प्रभृथस्य प्रभृतस्यायोरयनस्य मनुष्यस्य ज्योतिषो वोदकस्य वा सेवतामन्नस्य पुष्टे रो
दसी रुद्रस्य पत्नी तस्या एषा भवति ॥४९॥ रथं नु मारुतं वयं श्रवस्युमा हुवामहे ॥ आ यस्मिन्तस्थौ
सुरणानि बिभ्रती सचा मरुत्सु रोदसी ॥ रथं क्षिप्रं मारुतं मेघं वयं श्रवणीयमाह्वयामहे आ य
स्मिन्तस्थौ सुरमणीयान्युदकानि बिभ्रती सचा मरुद्भिः सह रोदसी रोदसी ॥ ॥५०॥ ॥

४२

॥ ॥ श्येन आदाय स्वादिष्ठया सोमं मन्यते यत्त्वा देव न वेन वः पर मृत्यो त्वेष मित्था प्रवो महे उदु ज्यो
तिर्हृतादिदहतु सोमस्य राज्ञोऽथातो मध्यस्थाना देवगणा आ विद्युन्मद्भिरारुद्रासो विष्णो त्रामी विदरू
पास उदीरतामंगिरसो नः सूर्यस्येव रश्मयो यमथातो मध्यस्थानास्त्रियो दक्षस्य वा यस्मै त्वं कि मि
च्छं तपावकानो महो अर्णो यदुवाग्देवी वाचमन्विदनु मते राकां सिनीवालि कुहूमन्यमस्सूर्वशी वि
घ्नत्यू लिस्थेंद्राणी नाहं गौरीर्मिमाय तस्याः समुद्रा गौरमी मेदुपल्ये स्त्यपवृत्ता द्धू उ रुरूण्वती स्वस्ति
रिद्धि प्रपथे एतदस्या अभि न इळा रथं नु पंचाशत् ॥ ॥इति निरुक्ते उत्तरषट्के पंचमोध्यायः ॥ ॥
॥ ॥ॐ॥ ॥अथातो द्युस्थाना देवतास्तासामश्विनौ प्रथमागामिनौ भवतोऽश्विनौ यद्व्यश्नुवा
ते सर्वं रसेनान्यो ज्योतिषान्योऽश्वैरश्विनावित्यौर्णवाभस्तत्कावश्विनौ द्यावापृथिव्यावित्येकेऽहोरात्रा
वित्येके सूर्याचन्द्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकास्तयोः काल ऊर्ध्वमर्द्धरात्रात्

नि॰उ॰६

काशीभावस्यानुविष्टं मनुतमोभागो हि मध्यमो ज्योतिर्भाग आदित्यस्तयोरेषा भवति॥१॥ व
सातिषुस्मचरथो सितौ पेत्वाविव॥ कदिदमश्विना युवमभि देवाँ अगच्छतं॥ इति सा निगदव्याख्या
तावसातिषुस्मचरथो वसातयो रात्रयो वसंते स्मादुत्तरेतर रात्रयो वक्षे वा वहते वासितौ पेत्वाविव॥
अपेत्वा इत्यत्रहणं स्यु रात्रयोस्तयोः समानकालयोः समानकर्मणोः संस्तुतप्राययोरसंस्तवेनैषोर्द्धू
र्चो भवति वासात्योऽन्य उच्यत उषः पुत्रस्तवान्य इति तयोरेषापराभवति॥२॥ इहेह जाता समवाव
शीतामरेपसा तन्वा३ नामभिः स्वैः॥ जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे॥
इहचेह च जातौ संस्तूयेते पापेनालिप्यमानया तन्वा नामभिश्च स्वैर्जिष्णुर्वामन्यः सुमहतो बल
स्येरयिता मध्यमो दिवोन्यः सुभगः पुत्र उह्यत आदित्यस्तयोरेषापराभवति॥३॥ प्रातर्युजा विबो
धयाश्विनावेह गच्छतां॥ अस्य सोमस्य पीतये॥ प्रातर्योगिनौ विबोधयाश्विनाविहागच्छताम

४३

४३

स्य सोमस्य पानायतयोरेषापराभवति॥४॥ प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजु
ष्टं॥ उतान्यो अस्मद्यजते विचावः पूर्वः पूर्वो यजमानो वनीयान्॥ प्रातर्यजध्वमश्विनौ प्रहिणुतन
सायमस्ति देवेज्या अजुष्टमेतदप्यन्यो स्मद्यजते विचावः पूर्वः पूर्वो यजमानो वनीयान्वनयितृत
मस्तयोः कालः सूर्योदयपर्यंतस्तस्मिन्नन्या देवता ओप्यंत उषा वष्टेः कांतिकर्मण उछतेरितरा
माध्यमिका तस्या एषा भवति॥५॥ उषस्तच्चित्रमाभरास्मभ्यं वाजिनीवति॥ येन तोकं च तनयं च
धामहे॥ उषस्तच्चित्रं चायनीयं मंहनीयं धनमाहरास्मभ्यमन्नवति येन पुत्रांश्च पौत्रांश्च दधामहि त
स्या एषापराभवति॥६॥ एता उ त्या उषसः केतुमक्रत पूर्वे अर्द्धे रजसो भानुमंजते॥ निष्कृण्वाना आयु
धानीव धृष्णवः प्रति गावो रुषीर्यंति मातरः॥ एतास्ता उषसः केतुमकृषत प्रज्ञानमेकस्या एव पू
जनार्थे बहुवचनं स्यात्पूर्वेर्द्धेऽतरिक्षलोकस्य समंजते भानुना॥ निष्कृण्वाना आयुधानीव धृष्ण

नि॰उ॰६

४४

वं॥ निरित्येष समित्येतस्य स्थाने एमादेषां निष्टुतं जारिणी वेत्यपि निगमो भवति प्रतियं
तिगा वोगमन्नादस्पषीरारो च नाम्नातरो भासो निर्मार्ध्यः॥ सूर्या सूर्यस्य पत्न्येषैवाभिसृ
ष्टकालतमा तस्या एषा भवति॥७॥ सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुच
क्रं॥ आरोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व॥ सुकाशनं शल्मलं सर्वरूप
मपि वोपमार्थे स्यात् सुकिंशुकमिव शल्मलिमिति किंशुकं क्रंशतेः प्रकाशयतिकर्मणः श
ल्मलिः सुशरो भवति शरवान्वारोह सूर्ये अमृतस्य लोकमुदकस्य सुखं पत्ये वहतुं कुरुष्व
सविता सूर्यां प्रायच्छत्सोमाय राज्ञे प्रजापतये वेति च ब्राह्मणं वृषाकपायी वृषाकपेः पत्न्येषै
वाभिसृष्टकालतमा तस्या एषा भवति॥८॥ वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे॥ घस
त्त इंद्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिंद्र उत्तरः॥ वृषाकपायि रेवति सुपुत्रे मध्य

४४

मेन सुस्नुषे माध्यमिकया वाचा स्नुषा साधुसादिनीति वा साधुसानिनीति वा स्वपत्यं तत्सनोतीति वा
प्राश्नातु त इंद्र उक्षण एतान्माध्यमिकान्संस्त्यायानुक्षण उक्षतेर्वृद्धिकर्मण उक्षंत्युदकेनेति वा प्रियं कुरु
ष्व सुखाचयकरं हविः सुखकरं हविः सर्वस्माद्य इंद्र उत्तरस्तमेतद्ब्रूम आदित्यं सरण्यूः सरणात्तस्या
एषा भवति॥९॥ अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामददुर्विवस्वते॥ उताश्विनावभरद्यत्तदासी
दजहादु द्वा मिथुना सरण्यूः॥ अपागूहन्नमृतां मर्त्येभ्यः कृत्वा सवर्णामददुर्विवस्वते अश्विनावभर
द्यत्तदासीदजहाद्द्वौ मिथुनौ सरण्यूर्मध्यमं च माध्यमिकां च वाचमिति नैरुक्ता यमं च यमीं चेत्यैतिहासिका
स्तत्रेतिहासमाचक्षते त्वाष्ट्री सरण्यूर्विवस्वत आदित्याद्यमौ मिथुनौ जनयांचकार सा सवर्णामन्यां प्र
तिनिधायाश्वं रूपं कृत्वा प्रदुद्राव स विवस्वानादित्य आश्वमेव रूपं कृत्वा तामनुसृत्य संबभूव ततोऽश्विनौ
जज्ञाते सवर्णायां मनुस्तदभिवादिन्येषर्ग्भवति॥१०॥ त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समे

नि॰उ॰६

४५

ति॥ यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश॥ त्वष्टा दुहितुर्वहनं करोतीतीदं विश्वं भु
वनं समेतीमानि च सर्वाणि भूतान्यभिसमागच्छंति यमस्य माता पर्युह्यमाना महतो जाया विवस्व
तो ननाश रात्रिरादित्यस्यादित्योदयेंतर्धीयते॥११॥ सविता व्याख्यातस्तस्य कालो यदा द्यौरपहत
तमस्काकीर्णरश्मिर्भवति तस्यैषा भवति॥१२॥ विश्वा रूपाणि प्रतिमुंचते कविः प्रासावीद्भद्रं द्विप
दे चतुष्पदे॥ वि नाकमख्यत्सविता वरेण्योनु प्रयाणमुषसो विराजति॥ सर्वाणि प्रज्ञानानि प्रतिमुंच
ते मेधावी कविः क्रांतदर्शनो भवति कवतेर्वा प्रसूवति भद्रं द्विपाद्भ्यश्च चतुष्पाद्भ्यश्च व्यचिख्यपन्ना
कं सविता वरणीयः प्रयाणमनूषसो विराजत्यधोरामः सावित्र इति पशुसमाम्नाये विज्ञायते कस्मा
त्सामान्यादित्यधस्तात्तद्वेलायां तमो भवत्येतस्मात्सामान्यादधस्ताद्रामोधस्तात्कृष्णः कस्मात्सा
मान्यादित्यग्निं चित्वा न रामामुपेयाद्रामा रमणायोपेयते न धर्माय कृष्णजातीयैतस्मात्सामान्या

४५

त्कृकवाकुः सावित्र इति पशुसमाम्नाये विज्ञायते कस्मात्सामान्यादिति कालानुवादं परीत्य कृक
वाकोः पूर्वं शब्दानुकरणं वचेरुत्तरं भगो व्याख्यातस्तस्य कालः प्रागुत्सर्पणात्तस्यैषा भवति॥
॥१३॥ प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता॥ आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चि
द्यं भगं भक्षीत्याह॥ प्रातर्जितं भगमुग्रं ह्वयेम वयं पुत्रमदितेर्यो विधारयिता सर्वस्याध्रश्चिद्यं म
न्यमान आध्याकुर्दरिद्रस्तुरश्चित्तुर इति यमनाम तरतेर्वा त्वरतेर्वा त्वरयातूर्णगतिर्यमो राजा चि
द्यं भगं भक्षीत्याह॥ अंधो भग इत्याहुरनुत्सृप्तो न दृश्यते प्राशित्रमस्याक्षिणी निर्जघानेति च ब्राह्मणं
जनं भगो गच्छतीति वा जनं गच्छत्यादित्य उदयेन सूर्यः सर्तेर्वा सुवतेर्वा स्वीर्यतेर्वा तस्यैषा भवति॥
॥१४॥ उदु त्यं जातवेदसं देवं वहंति केतवः॥ दृशे विश्वाय सूर्यं॥ उद्वहंति तं जातवेदसं रश्मयः के
तवः सर्वेषां भूतानां दर्शनाय सूर्यमिति कमन्यमादित्यादेवमवक्ष्यत्तस्यैषापरा भवति॥१५॥

नि॰उ॰१

४६

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जग
तस्तस्थुषश्च॥ चायनीयं देवानामुदगमदनीकं ख्यानं मित्रस्य वरुणस्याग्नेश्चापूपुरद्द्यावापृथिव्यौ
चांतरिक्षं च महत्वेन तेन सूर्य आत्मा जंगमस्य च स्थावरस्य च॥ अथ यद्रश्मिपोषं पुष्यति तत्पूषा भ
वति तस्यैषा भवति॥१६॥ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि। विश्वा हि माया
अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु॥ शुक्रं ते अन्यल्लोहितं ते अन्यद्यजतं ते अन्यद्यज्ञियं
ते अन्यद्विषमरूपे ते अहनी कर्म द्यौरिव चासि सर्वाणि प्रज्ञानान्यवस्यन्नवंभाजनवती ते पूषन्नि
ह दत्तिरस्त्विति तस्यैषापरा भवति॥१७॥ पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कं॥ स नो
रासच्छुरुधश्चंद्राग्रा धियंधियं सीषधाति प्र पूषा॥ पथस्पथोऽधिपतिं वचनेन कामेन कृतोऽभ्यान
ळर्कमभ्यापन्नोऽर्कमिति वा स नो ददातु चायनीयानि धनानि कर्मकर्म च नः प्रसाधयतु पूषेत्यथ
यद्विषितो भवति तद्विष्णुर्भवति विष्णुर्विशतेर्वा व्यश्नोतेर्वा तस्यैषा भवति॥१८॥ इदं विष्णुर्वि चक्रमे

४६

त्रेधा निदधे पदं॥ समूळ्हमस्य पांसुरे॥ यदिदं किं च तद्विक्रमते विष्णुस्त्रिधा निधत्ते पदं त्रेधाभावाय
पृथिव्यामंतरिक्षे दिवीति शाकपूणिः समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः समूळ्हमस्य पांसु
रे प्यायनेऽन्तरिक्षे पदं न दृश्यतेऽपि वोपमार्थे स्यात्समूळ्हमस्य पांसुल इव पदं न दृश्यत इति पांसवः
पादैः सूयंत इति वा पन्नाः शेरत इति वा पंसनीया भवंतीति वा॥१९॥ विश्वानरो व्याख्यातस्तस्यैष नि
पातो भवत्यैंद्र्यामृचि॥२०॥ विश्वानरस्य वस्पतिमनानतस्य शवसः॥ एवैश्च चर्षणीनामूती हुवे र
थानां॥ विश्वानरस्यादित्यस्यानानतस्य शवसो महतो बलस्यैवैश्च कामैरयनैरवनैर्वा चर्षणीनां म
नुष्याणामूत्या च पथा रथानामिंद्रमस्मिन्यज्ञे ह्वयामि वरुणो व्याख्यातस्तस्यैषा भवति॥२१॥ येना
पावक चक्षसा भुरण्यंतं जनाँ अनु॥ त्वं वरुण पश्यसि॥ भुरण्युरिति क्षिप्रनाम भुरण्युः शकुनिर्भु

नि॰उ॰६

श्मिध्यानेनं नयति स्वर्गस्य लोकस्यापि वोल्हा तत्संपाती भुरण्युरनेन पावक ख्यानेन ॥ भुरण्यंतं
जनाँ अनु ॥ त्वं वरुण पश्यसि ॥ तन्नेव यं स्तुम इति वाक्यशेषोपि वोत्तरस्यां ॥ २२ ॥ येना पावक च
क्षसा भुरण्यंतं जनाँ अनु ॥ त्वं वरुण पश्यसि ॥ वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः ॥ पश्य
ञ्जन्मानि सूर्य ॥ व्येषि द्यां रजश्च पृथुमहान्तं लोकं महान्ति च मिमानो अक्तुभी रात्रिभिः सह पश्यञ्ज
न्मानि जातानि सूर्यापि वा पूर्वस्यां ॥ २३ ॥ येना पावक चक्षसा भुरण्यंतं जनाँ अनु ॥ त्वं वरुण पश्यसि ॥
प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् ॥ प्रत्यङ् विश्वं स्वर्दृशे ॥ प्रत्यङ्ङिदं सर्वमुदेषि प्रत्यङ्ङिदं
ज्योतिरुच्यते प्रत्यङ्ङिदं सर्वमभिविपश्यसीत्यपि वैतस्यामेव ॥ २४ ॥ येना पावक चक्षसा भुरण्यं
तं जनाँ अनु ॥ त्वं वरुण पश्यसि ॥ तेन नो जनानभिविपश्यसि केशी केश्या रश्मयस्तैस्तद्वान्

४७

भवति काशनाद्वा प्रकाशनाद्वा तस्यैषा भवति ॥ २५ ॥ केश्यग्निं केशी विषं केशी बिभर्ति रोदसी ॥ के
शी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ॥ केश्यग्निं च विषं च विषमित्युदकनाम विष्णातेर्विपूर्वस्य स्ना
तेः शुद्ध्यर्थस्य विपूर्वस्य वा सचतेर्द्यावापृथिव्यौ च धारयति केशीदं सर्वमिदमभिविपश्यति केशीदं
ज्योतिरुच्यत इत्यादित्यमाहाथाप्येते इतरे ज्योतिषी केशिनी उच्येते धूमेनाग्नी रजसा च मध्यमस्ते
षामेषा साधारणा भवति ॥ २६ ॥ त्रयः केशिन ऋतुथा विचक्षते संवत्सरे वपत एक एषां ॥ विश्वमेको
अभिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपं ॥ त्रयः केशिन ऋतुथा विचक्षते काले कालेभिविपश्यं
ति संवत्सरे वपत एक एषामित्यग्निः पृथिवीं दहति सर्वमेकोभिविपश्यति कर्मभिरादित्यो गतिरेकस्य
दृश्यते न रूपं मध्यमस्याथ यद्रश्मिभिरभिप्रकंपयन्नेति तद्वृषाकपिर्भवति वृषाकंपनस्तस्यैषाम

२

नि॰उ॰६

४८

र

वति॥२७॥पुनरेहि वृषाकपे सुविता कल्पयावहै॥ य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिं
द्र उत्तरः॥ पुनरेहि वृषाकपे सुप्रसूतानि वः कर्माणि कल्पयावहै य एष स्वप्ननंशनः स्वप्नान्नाश
यस्यादित्य उदयेन सोऽस्तमेषि पथा पुनः सर्वस्माद्य इंद्र उत्तरस्तमेतद्भूम आदित्यं यमो व्याख्यातस्तस्ये
षा भवति॥२८॥ यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः॥ अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति॥
यस्मिन्वृक्षे सुपलाशे स्थाने वृतः क्षये वापि वोपमार्थे स्याद्वृक्ष इव सुपलाश इति वृक्षो व्रश्चनात्पलाशं
पलाशनाद्देवैः संगच्छते यमो रश्मिभिरादित्यस्तत्र नः सर्वस्य पाता वा पालयिता वा पुराणान् अनु का
मयेताऽज एकपादजन एकः पाद एकेन पादेन पातीति वैकेन पादेन पिबतीति वैकोऽस्य पाद इति वा॥ ए
कं पादं नोत्खिदतीत्यपि निगमो भवति तस्यैष निपातो भवति वैश्वदेव्यामृचि॥२९॥ पावीरवी त

श्री

४८

श्र

न्यतुरेकपादजो दिवो धर्ता सिंधुरापः समुद्रियः॥ विश्वे देवासः शृणवन्वचांसि मे सरस्वती सह धीभिः
पुरंध्या॥ पविः शल्यो भवति यद्विपुनाति कायं तद्वत्सवीरमायुधं तद्वानिंद्रः पवीरवान्॥ अतितस्थौ
पवीरवानित्यपि निगमो भवति तद्देवता वाक् पावीरवी पावीरवी च दिव्या वाक् तन्यतुस्तनयित्री वाचो
न्यस्या अजश्चैकपाद्दिवो धारयिता सिंधुश्चापश्च समुद्रियाश्च सर्वे च देवाः सरस्वती च सह पुरंध्या स्तु
त्या प्रयुक्तानि धीभिः कर्मभिर्युक्तानि शृण्वंतु वचनानीमानीति पृथिवी व्याख्याता तस्या एष निपातो
भवत्यैंद्राग्न्यामृचि॥३०॥ यदिंद्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः॥ अतः परि वृष
णावा हि यातमथा सोमस्य पिबतं सुतस्य॥ इति सा निगदव्याख्याता समुद्रो व्याख्यातस्तस्यैष निपातो
भवति पावमान्यामृचि॥३१॥ पवित्रवंतः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतं॥ महः समुद्रं

नि॰उ॰ ६

४९

त्र

पोऽसै स्तिरोदधे धारा इच्छे कुर्धुरुणे ष्वारभं ॥ पविंवंतो रश्मिवंतो माध्यमिका देवगणाः पर्यासते माध्यमिकां वाचं पितैषां प्रत्नः पुराणोऽभिरक्षति व्रतं कर्म महः समुद्रं वरुणस्तिरोंतर्दधात्यथ धीराः शक्नुवंति धरुणेषूदकेषु कर्मण आरंभमारब्धुमज एकपाद्व्याख्यातः पृथिवी व्याख्याता समुद्रो व्याख्यातस्तेषामेष निपातो भवत्यपरस्यां बहुदेवतायामृचि ॥३२॥ उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ॥ विश्वेदेवा ऋतावृधो हुवानाः स्तुता मंत्राः कविशस्ता अवंतु ॥ अपि च नोऽहिर्बुध्न्यः शृणोत्वजश्चैकपात्पृथिवी च समुद्रश्च सर्वे च देवाः सत्यवृधो वा यज्ञवृधो वा हूयमाना मंत्रैः स्तुता मंत्राः कविशस्ता अवंतु मेधाविशस्ता दध्यङ् प्रत्यक्तो ध्यानमिति वा प्रत्यक्तमस्मिन्ध्यानमिति वाऽथर्वा व्याख्यातो मनुर्मननात्तेषामेष निपातो भवत्यैंद्र्यामृचि ॥३३॥ यामथर्वा मनुष्पिता दध्यङ् धियमत्नत ॥ तस्मिन्ब्रह्माणि पूर्वथेंद्र उक्था समग्मतार्चन्ननु स्वराज्यं ॥ यामथर्वा च मनुश्च पिता मानवानां दध्यङ् च धियमतनिषत तस्मिन्ब्रह्माणि कर्माणि पूर्व इंद्र उक्थानि च संगछंतामर्चन्नाप्नोत्स्वाराज्यं ॥ ॥३४॥ अथातो द्युस्थाना देवगणास्तेषामादित्याः प्रथमागामिनो भवंत्यादित्या व्याख्यातास्तेषामेषा भवति ॥ ॥३५॥ इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ॥ शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ॥ घृतस्नूः घृतप्रस्नाविन्यो घृतप्रस्नाविण्यो घृतसानिन्यो घृतसारिण्य इति वा जुहोमि चिरं राजभ्य इति वा शृणोतु न इमा गिरो मित्रश्चार्यमा च भगश्च बहुजातश्च धाता दक्षो वरुणोंऽशश्चांशोंऽशुना व्याख्यातः सप्त ऋषयो व्याख्यातास्तेषामेषा भवति ॥ ॥३६॥ सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षंति सदमप्रमादं ॥ सप्तापः स्वपतो लोकमीयुस्तत्र

४९

नि॰उ॰६

५१

जागृतो ऽस्वप्नजौ सत्रसदौ च देवौ॥ सप्त ऋषयः प्रतिहिताः शरीरे रश्मय आदित्ये सप्त रक्षन्ति स
दमप्रमादं संवत्सरमप्रमाद्यन्तः सप्तापनास्तु एव स्वपतो लोकमस्तमितमादित्यं यन्ति तत्र जागृतो ऽस्व
प्नजौ सत्रसदौ च देवौ वाय्वादित्याविति अधिदैवतमथाध्यात्मं सप्त ऋषयः प्रतिहिताः शरीरे षडिं
द्रियाणि विद्यासप्तम्यात्मनि सप्त रक्षन्ति सदमप्रमादं शरीरमप्रमाद्यन्ति सप्तापनानीमान्येव स्व
पतो लोकमस्तमितमात्मानं यन्ति तत्र जागृतो ऽस्वप्नजौ सत्रसदौ च देवौ प्राज्ञश्चात्मा तैजसश्चेत्यात्म
गतिमाचष्टे तेषामेषापरा भवति॥ ३७॥ तिर्यग्बिलश्चमस ऊर्ध्वबुध्नो यस्मिन्यशो निहितं विश्वरू
पं॥ अत्रासत ऋषयः सप्त साकं ये अस्य गोपा महतो बभूवुः॥ तिर्यग्बिलश्चमस ऊर्ध्वबंधन
ऊर्ध्वबोधनो वा यस्मिन्यशो निहितं सर्वरूपमत्रासत ऋषयः सप्त सहादित्यरश्मयो ये अस्य गो

५०

सप्त

सुमतौ

पा महतो बभूवुरित्यधिदैवतमथाध्यात्मं तिर्यग्बिलश्चमस ऊर्ध्वबंधन ऊर्ध्वबोधनो वा यस्मिन्यशो नि
हितं सर्वरूपमत्रासत ऋषयः सप्तेंद्रियाणि यान्यस्य गोप्तॄणि महतो बभूवुरित्यात्मगतिमाचष्टे देवा
व्याख्याताः तेषामेषा भवति॥ ३८॥ देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो निवर्त्तताम्॥ देवानां
सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरंतु जीवसे॥ देवानां वयं कल्याण्यां मतौ ऋजुगामिनामृजुगा
मिनामिति वा देवानां दानमभि नो निवर्त्ततां देवानां सख्यमुपसीदेम वयं देवा न आयुः प्रवर्द्धयंतु चिरं
जीवनाय विश्वेदेवाः सर्वे देवाः तेषामेषा भवति॥ ३९॥ ओमासश्चर्षणीधृतो विश्वे देवास आगत॥ दाश्वां
सो दाशुषः सुतं॥ अवितारो वा वनीया वा मनुष्यधृतः सर्वे च देवा इहागच्छत दत्तवंतो दत्तवतः सुतमिति
तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते यत्तु किंचिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते य
देव विश्वलिंगमिति शाकपूणिरनत्यंतगतस्त्वेष उद्देशो भवति बभ्रुरेक इति दशद्विपदा अलिंगा भूतांशः
काश्यप आश्विनमेकलिंगमभितष्टीयं सूक्तमेकलिंगं साध्या देवाः साधनास्तेषामेषा भवति॥ ४०॥ य

नि॰उ॰६

५१

यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन्॥ ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः॥ यज्ञेन यज्ञमयजंत देवा अग्निनाग्निमयजंत देवा अग्निः पशुरासीत्तमालभंत तेनायजंतेति च ब्राह्मणं॥ तानि धर्माणि प्रथमान्यासन्॥ ते ह नाकं महिमानः समसेवंत यत्र पूर्वे साध्याः संति देवाः साधनो द्युस्थानो देवगण इति नैरुक्ताः पूर्वं देवयुगमित्याख्यानं वसवो यद्विवसते तेसर्वमग्निर्वसुभिर्वासव इति समाख्यातस्मात्पृथिवीस्थाना इंद्रो वसुभिर्वासव इति समाख्यातस्मान्मध्यस्थाना वसव आदित्यरश्मयो विवासनात्तस्माद्द्युस्थानास्तेषामेषा भवति॥४१॥ सुगा वो देवाः सदना मकर्म य आजग्मुः सवनमिदं जुषाणाः॥ जक्षिवांसः पपिवांसश्च विश्वेऽस्मे धत्त वसवो वसूनि॥ स्वागमनानि वो देवाः सुपथान्यकर्म य आगच्छत सवनानीमानि जुषाणाः खादितवंतः पीतवंतश्च सर्वेऽस्मासु धत्त वसवो वसूनि तेषामेषापरा भवति॥४२॥ ज्मया अत्र वसवो रंत देवा उरावंतरिक्षे मर्जयंत शुभ्राः॥ अर्वाक्पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य॥ ज्मया अत्र वसवोऽरमंत देवा ज्मा पृथिवी तस्यां

५१

भवा उरावंतरिक्षे मर्जयंत गमयंत रमयंत शुभ्राः शोभमाना अर्वाच एनान्पथो बहुजवाः कुरुध्वं शृणुत दूतस्य जग्मुषो नोऽस्याग्नेर्वाजिनो व्याख्याता स्तेषामेषा भवति॥४३॥ शं नो भवंतु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः॥ जंभयंतोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः॥ सुखा नो भवंतु वाजिनो ह्वानेषु देवताता यज्ञे मितद्रवः सुमितद्रवः स्वर्काः स्वंचना इति वा स्वर्चना इति वा स्वर्चिष इति वा जंभयंतोऽहिं च वृकं च रक्षांसि च क्षिप्रमस्मद्यावयंत्वमीवा देवा अश्वा इति वा देवपत्न्यो देवानां पत्न्यस्तासामेषा भवति॥४४॥ देवानां पत्नीरुशतीरवंतु नः प्रावंतु नस्तुजये वाजसातये॥ याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत॥ देवानां पत्न्य उशत्योऽवंतु नः प्रावंतु नस्तुजये प्रजननाय चान्नसंसननाय च याः पार्थिवासो या अपामपि व्रते कर्मणि ता नो देव्यः सुहवाः शर्म यच्छंतु शरणं तासामेषापरा भवति॥४५॥ उत ग्ना व्यंतु देवपत्नीरिंद्राण्यग्नाय्यश्विनी राट्॥ आ रोदसी वरुणानी शृणोतु व्यंतु देवीर्य ऋतुर्जनीनां॥ अपि च ग्ना व्यंतु देवपत्न्य इंद्राणीन्द्रस्य पत्न्यग्नाय्यग्नेः पत्न्य

नि॰उ॰६

५२

अश्विन्यश्विनोः पत्नी राट् राजते रोदसी रुद्रस्य पत्नी वरुणानी च वरुणस्य पत्नी व्यंतु देव्यः काम
यंतां यज्ञं तु कालो जायानां यज्ञं तु कालो जायानां ॥४६॥ ॥ ॥ अथातो द्युस्थाना
वसातिष्ठस्मे हेहजाताम्ना तुर्यु जा प्रातर्म जध्व मुष स्तच्चित्रमेतदुत्याः स्कंकिंशुकं वृषाक
पाय्यपर्णगृहं त्वष्टा दुहित्रे सविता विश्वा रूपाणि जातर्जितमु दुत्यं चित्रं शुक्रं ते पृथस्य
थइदं विष्णुर्विश्वानरो व्याख्यातो विश्वानरस्य येना पावकेति चतुष्कं केत्वय १ ग्निं त्रयः
केशिनः पुनरेहि यास्मिन्वृक्षे पावीरवी यादिंद्राग्नी पुवित्रवंतउत नो हियमिथ वडथा
तो द्युस्थाना देवगणा इमा गिरः सप्त ऋषयुस्तिर्यग्बिलो देवानां भद्रोमासो यज्ञेन सु
गावो देवाज्मया अत्रयो नो भवंतु देवानां पत्नी रुतग्ना व्यंतु षट् चत्वारिंशत् ॥ ॥ ॥
॥ ॥ इति निरुक्ते उत्तरषट्के षष्ठोऽध्यायः ॥ ॥ इति निरुक्ते उत्तरषट्कः समाप्तः ॥ ॥

५२

॥ॐ॥ ॥ अथेमा अतिस्तुतय इत्याचक्षते ऽपि वा संप्रत्यय एव स्यान्माहाभाग्याद्देवतायाः सो
ग्निमेव प्रथममाह त्वमग्ने द्युभिस्त्वमाशुशुक्षणिरिति यथैतस्मिन्सूक्ते न हि त्वदारे निमि
षश्चनेशा इति वरुणस्याऽथैषेंद्रस्य ॥१॥ यद्याव इंद्र ते शतं शतं भूमीरुत स्युः ॥ न त्वा वज्रि
न्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥ यदिंद्र शतं दिवः शतं भूमयः प्रतिमानानि स्यु
र्न त्वा वज्रिन्सहस्रमपि सूर्या न द्यावापृथिव्यावप्यभ्यश्नुवीतामित्यथैषादित्यस्य ॥२॥ यदुदं
चो वृषाकपे गृहमिंद्राजगंतन ॥ क्व१ स्य पुल्वघो मृगः कमगं जनयोपनो विश्वस्मादिंद्र उत्तरः ॥
यदुदंचो वृषाकपे गृहमिंद्राजगमत क्व स्य पुल्वघो मृगः क्व स बह्वादी मृगो मृगो मार्ष्टेर्गतिकर्मणः
कमगमद्देशं जनयोपनः सर्वस्माद्य इंद्र उत्तरस्तमेतद्ब्रूम आदित्यमथैषादित्यरश्मीनां ॥३॥
वि हि सोतोरसृक्षत नेंद्रं देवममंसत ॥ यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिंद्र उ

नि॰उ॰१३

५३

तरः॥ व्यसृक्षत हि प्रसवाय न चेंद्रं देवममंसत यत्रामादयद्वृषाकपिरर्य ईश्वरः पुष्टेषु पोषेषु मत्सखा
मम सखा मदनसखा येन सखायस्ते सोहमिति वा सर्वस्माद्य इंद्र उत्तरस्तमेतद्ब्रूम आदित्यमथैषाश्वि
नोः॥४॥ सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका॥ उदन्यजेव जेमना मदेरू ता मे जराय्वज
रं मरायु॥ सृण्येवेति द्विविधा सृणिर्भवति भर्ता च हंता च तथाश्विनौ चापि भर्तारौ जर्भरी भर्तारावित्यर्थ
स्तुर्फरीतू हंतारौ॥ नैतोशेव तुर्फरी पर्फरीका॥ नितोशस्यापत्यं नैतोशं नैतोशेव तुर्फरी क्षिप्रहंतारौ॥ उ
दन्यजेव जेमना मदेरू॥ उदन्यजेवेत्युदकज इव रत्ने सामुद्रे चांद्रमसे वा जेमने जयमने जेमना मदेरू॥ ता
मे जराय्वजरं मरायु॥ एतज्जरायुजं शरीरं शरदमजीर्णमथैषा सोमस्य॥५॥ तरत्स मंदी धावति धारा सुत

५३

स्यांधसः॥ तरत्स मंदी धावति॥ तरति स पापं सर्वं मंदी यः स्तौति धावति गच्छत्यूर्ध्वां गतिं॥ धारा सुतस्यां
धसः॥ धारयाभिषुतस्य सोमस्य मंत्रपूतस्य वाचा स्तुतस्याथैषा यज्ञस्य॥६॥ चत्वारि शृंगा त्रयो अ

स्य पादा द्वे शीर्षे सप्त हस्तासो अस्य॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥ चत्वारि
शृंगेति वेदा वा एत उक्तास्त्रयो अस्य पादा इति सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये सप्त हस्तासः
सप्त छंदांसि त्रिधा बद्धस्त्रेधा बद्धो मंत्रब्राह्मणकल्पैर्वृषभो रोरवीति रोरवणमस्य सवनक्रमेण
ऋग्भिर्यजुर्भिः सामभिर्यदेनमृग्भिः शंसंति यजुर्भिर्यजंति सामभिः स्तुवंति महो देव इत्येष हि महा
न्देवो यद्यज्ञो मर्त्यां आविवेशेत्येष हि मनुष्यानाविशति यजनाय तस्योत्तरा भूयसे निर्वचनाय॥७॥
स्वर्यंतो नापेक्षंत आद्यां रोहंति रोदसी॥ यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे॥ स्वर्गच्छंत ईजा
ना वा नेक्षंते तेमुमेव लोकं गतवंतमीक्षंतमिति॥ आद्यां रोहंति रोदसी॥ यज्ञं ये विश्वतोधारं सर्वतो
धारं सुविद्वांसो वितेनिर इत्यथैषा वाचः प्रवल्हितेव॥८॥ चत्वारि वाक्परिमिता पदानि तानि विदु
र्ब्राह्मणा ये मनीषिणः॥ गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति॥ चत्वारि वाचः

नि॰उ॰१३

५४

परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मेधाविनो गुहायां त्रीणि निहितानि नार्थं वेदयंते गुहा गू
ह्ने क्षरीयं त्वरतेः कतमानि तानि चत्वारि पदान्योंकारो महाव्याहृतयश्चेत्यार्षं नामाख्याते चोप
सर्गनिपाताश्चेति वैयाकरणा मंत्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिका ऋचो यजूं
षि सामानि चतुर्थी व्यावहारिकीति नैरुक्ताः सर्पाणां वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी
व्यावहारिकीत्येके पशुषु तूणवेषु मृगेष्वात्मनि चेत्यात्मप्रवादा अथापि ब्राह्मणं भवति सा वै वा
क् सृष्टा चतुर्द्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु तुरीयं या पृथिव्यां साग्नौ सा रथंतरे यांतरिक्षे सा
वायौ सा वामदेव्ये या दिवि सादित्ये सा बृहति सा स्तनयित्नावथ पशुषु ततो या वागत्यरिच्यत तां
ब्राह्मणेष्वदधुस्तस्माद्ब्राह्मणा उभयीं वाचं वदंति या च देवानां या च मनुष्याणामित्यथैषाक्षर
स्य ॥९॥ ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ॥ यस्तन्न वेद किमृचा करिष्य

५४

ति य इत्तद्विदुस्त इमे समासते ॥ ऋचो अक्षरे परमे व्यवने यस्मिन्देवा अधि निषण्णाः सर्वे यस्तन्न वेद
किं स ऋचा करिष्यति य इत्तद्विदुस्त इमे समासत इति विदुष उपदिशति कतमत्तदेतदक्षरमोमित्येषा वा
गिति शाकपूणिर्ऋचश्च ह्यक्षरे परमे व्यवने धीयंते नानादेवतेषु च मंत्रेष्वेतद्ध वा एतदक्षरं यत्सर्वां त्र
यीं विद्यां प्रति प्रतीति च ब्राह्मणं ॥१०॥ आदित्य इति पुत्रः शाकपूणेरेषर्ग्भवति यदेनमर्चति प्रत्यृचः
सर्वाणि भूतानि तस्य यदन्यन्मंत्रेभ्यस्तदक्षरं भवति रश्मयोत्र देवा उच्यंते य एतस्मिन्नधि निषण्णा
इत्यधिदैवतमथाध्यात्मं शरीरमत्र ऋगुच्यते यदेनेनार्चति प्रत्यृचः सर्वाणींद्रियाणि तस्य यदविना
शि धर्म तदक्षरं भवतींद्रियाण्यत्र देवा उच्यंते यान्यस्मिन्नात्मन्येकं भवंतीत्यात्मप्रवादाः ॥११॥ अक्षरं
न क्षरतीति न क्षीयते वा अक्षरं भवति वाचोक्ष इति वा अक्षो यानस्यांजनात्तत्प्रकृतीतरद्वर्तनसामान्यादि
त्ययं मंत्रार्थचिंताभ्यूहोऽभ्यूढोऽपि श्रुतितोऽपि तर्कतो न तु पृथक्त्वेन मंत्रा निर्वक्तव्याः प्रकरणश एव तु नि

नि॰उ॰१२

५५

र्वक्तव्यं न त्वेषु प्रत्यक्षमस्त्यनृषेरतपसो वा पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवती
त्युक्तं पुरस्तान्मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन्को न ऋषिर्भविष्यतीति तेभ्य एतं तर्कमृषिं प्रायच्छ
न्मन्त्रार्थचिंताभ्यूहमभ्यूढं तस्माद्यदेव किंचानूचानोभ्यूहत्यार्षं तद्भवति॥१२॥ हृदा तष्टेषु मनसो जवे
षु यद्ब्राह्मणाः संयजंते सखायः॥ अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरंत्यु त्वे॥ हृदा तष्टेषु म
नसां प्रजवेषु यद्ब्राह्मणाः संयजंते समानाख्याना ऋत्विजोऽत्राह त्वं विजहुर्वेद्याभिर्वेदितव्याभिः
प्रवृत्तिभिरोहब्रह्माण ऊहब्रह्माण ऊह एषां ब्रह्मेति वा सेयं विद्या श्रुतिमतिबुद्धिस्तस्यास्तपसा पारमी
प्सितव्यं तदिदमायुरिच्छता न निर्वक्तव्यं तस्माच्छंदःसु शेषा उपेक्षितव्या अथागमो यां यां देवतां नि
राह तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवति॥१३॥ ॥अथेमा यद्यावो यदुदंचो विहिसो तोः स्तण्ये
वृतरत्नभ्रत्वादिशं गोस्सुर्यं तभ्रत्वादिवाग्चो अक्षरमादित्य इत्यक्षरं न क्षरतीति हृदा तष्टेषु त्रयोदश॥

५५

॥इति निरुक्ते त्रयोदशोऽध्यायः॥ ॥ॐ॥ ॥व्याख्यातं दैवतं यज्ञांगं चाऽथात ऊर्ध्वमार्गगतिं व्याख्या
स्यामः सूर्य आत्मेत्युदितस्य हि कर्मद्रष्टाऽथैतदनुप्रवदंत्यथैतं महांतमात्मानमेषर्गणः प्रवदंती
द्रं मित्रं वरुणमग्निमाहुरित्यथैष महानात्मात्मजिज्ञासयात्मानं प्रोवाचाऽग्निरस्मि जन्मना जा
तवेदा अहमस्मि प्रथमजा ऋतस्येत्याभ्यां॥१॥ अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आस
न्॥ अर्कस्त्रिधातू रजसो विमानोजस्रो घर्मो हविरस्मि नाम॥ अहमस्मि प्रथमजा ऋतस्य पूर्वं दे
वेभ्यो अमृतस्य नाभिः॥ यो मा ददाति स इदेवमावा अहमन्नमन्नमदंतमद्मीति सहस्रात्प्रादुर्बभू
वैवं तं व्याजहारायतमात्मानमभ्यात्मजमंतिकमन्यस्मा अच्चक्ष्वेति॥२॥ अपश्यं गोपामनिपद्यमा
नमा च परा च पथिभिश्चरंतं॥ स सध्रीचीः स विषूचीर्वसान आवरीवर्ति भुवनेष्वंतः॥ आवरीवर्ति
भुवनेष्वंतरित्यथैष महानात्मा सत्वलक्षणस्तत्परं तद्ब्रह्म तत्सत्यं तत्सलिलं तदव्यक्तं तदस्पर्शं त

नि॰अ॰१४

५६

दरूपं तदरसं तदगंधं तदमृतं तच्छुक्रं तन्निष्ठो भूतात्मा सैषा भूतप्रकृतिरित्येके तत्क्षेत्रं तदज्ञा
नात्क्षेत्रज्ञमनुप्राप्य निरात्मजं मध्ये एष महानात्मा त्रिविधो भवति सत्त्वं रजस्तम इति सत्त्वं तु मध्ये
विशुद्धं तिष्ठत्यभितो रजस्तमसी इति कामद्वेषस्तम इत्यविज्ञातस्य विशुध्यतो विभूतिं कुर्वतः
क्षेत्रज्ञपृथक्त्वाय कल्प्यते प्रतिभाति लिंगो महानात्मा तमोलिंगो विद्याप्रकाशलिंगस्तमोपि निश्च
यलिंगम् आकाशम् ।।२।। आकाशगुणः शब्द आकाशाद्वायुर्द्विगुणः स्पर्शेन वायोर्ज्योतिस्त्रिगु
णं रूपेण ज्योतिष आपश्चतुर्गुणा रसेन अद्भ्यः पृथिवी पंचगुणा गंधेन पृथिव्या भूतग्रामस्थावर
जंगमास्तदेतदहर्युगसहस्रं जागर्ति तस्यांते सुषुप्स्यन्नंगानि प्रत्याहरति भूतग्रामाः पृथिवीमपि
यंति पृथिव्यप आपो ज्योतिषं ज्योतिर्वायुं वायुराकाशमाकाशो मनो मनो विद्यां विद्या महान्तमा
त्मानं महानात्मा प्रतिभां प्रतिभा प्रकृतिं सा स्वपिति युगसहस्रं रात्रिस्तावेतावहोरात्रावजस्रं परिव

५६

र्तेते स कालस्तदेतदहर्भवति युगसहस्रपर्यंतमहर्यद्ब्रह्मणो विदू रात्रिं युगसहस्रांतां तेऽहोरात्रविदो
जना इति ।।४।। तं परिवर्तमानमन्योनुप्रवर्तते स्रष्टा द्रष्टा विभक्त्याऽतिमात्रोऽहमिति गम्यते स मिथ्या
दर्शने दं पावकं महाभूतेषु चिरेण वाकाशाद्वायोः प्राणश्चक्षुश्च वक्तारं च तेजसोऽद्भ्यः स्नेहं पृथिव्या मू
र्तिः पार्थिवांस्त्वष्टौ गुणान्विद्यात्त्रीन्मातृतस्त्रीन्पितृतोऽस्थिस्नायुमज्जानः पितृतस्त्वङ्मांसशो
णितानि मातृतोऽन्नपानमित्यष्टौ सोयं पुरुषः सर्वमयः सर्वज्ञानोपिक्लृप्तः ।।५।। स यद्यनुरुध्यते त
द्भवति यदि धर्ममनुरुध्यते तद्देवो भवति यदि ज्ञानमनुरुध्यते तदमृतो भवति यदि काममनुरुध्य
ते स च्यवते इमां योनिं संदध्यात्तदिदमत्र मतं श्लेष्मा रेतसः संभवति श्लेष्मणो रसो रसाच्छोणितं
शोणितान्मांसं मांसान्मेदो मेदसः स्नावा स्नाव्नोऽस्थीन्यस्थिभ्यो मज्जा मज्ज्ञातो रेतस्तदिदं योनौ रे
तः सिक्तं पुरुषः संभवति शुक्रातिरेके पुमान्भवति शोणितातिरेके स्त्री भवति द्वाभ्यां समेन न

न॰उ॰१४

५७

पुंस्कोभवतिशुक्रक्षिन्नेनपुमोभवतिशुक्रशोणितसंयोगान्मातृपितृसंयोगाच्चतत्कथमिदंशा
रीरंपरंसंयम्यतेसोम्योभवत्येकरात्रोषितंकललंभवतिपंचरात्राद्बुद्बुदःसप्तरात्रात्पेशीद्विःस
प्तरात्रादर्बुदःपंचविंशतिरात्रःस्वस्थितोघनोभवतिमासमात्रात्कठिनोभवतिद्विमासाभ्यंत
रेशिरःसंपद्यतेमासत्रयेणग्रीवाव्यादेशोमासचतुष्केणत्वग्व्यादेशःपंचमेमासेनखरोमव्या
देशःषष्ठेमुखनासिकाक्षिश्रोत्रंचसंभवतिसप्तमेचलनसमर्थोभवत्यष्टमेबुध्याध्यवस्यति
नवमेसर्वांगसंपूर्णोभवति॥मृतश्चाहंपुनर्जातोजातश्चाहंपुनर्मृतः॥नानायोनिसहस्राणि
मयोषितानियानिवै॥आहाराविविधाभुक्ताःपीतानानाविधास्तनाः॥मातरोविविधादृष्टाः
पितरःसुहृदस्तथा॥अवाङ्मुखःपीड्यमानोजंतुश्चैवसमन्वितः॥सांख्यंयोगंसमभ्यस्येत्पुरु
षंवापंचविंशकमितितश्चदशमेमासेप्रजायते [illegible] जातश्चवायुनास्पृष्टस्तन्नस्मरति

५७

कपालानिद्वादशर

जन्ममरणमंतेचशुभाशुभंकर्मेतिच्छरीरस्यप्रामाण्यं॥६॥अष्टोत्तरंसंधिशतमष्टाकपालंशिरः
संपद्यतेषोडशावपापलानिनवस्नायुशतानिसप्तशतंपुरुषस्यमर्मणामर्द्धचतस्रोरोमाणिको
ट्योहृदयंह्यष्टकपालानिजिह्वावृषणौह्यष्टसुपर्णौनतोपस्थगुदपायवेतन्मूत्रपुरीषंकस्मादाहार
पानसिक्तत्वादनुपचितकर्मणावन्योन्यंजायेतेइतितंविद्याकर्मणीसमन्वारभेतेपूर्वप्रज्ञाचमह
त्स्वज्ञानतमसिमग्नोजरामरणक्षुत्पिपासाशोकक्रोधलोभमोहमदभयमत्सरहर्षविषादेर्ष्यास
यात्मकैर्द्वंद्वैरभिभूयमानःसोस्मादार्जवंजवीभावान्नतन्निर्मुच्यतेसोस्मात्पाल्मेमहाभूमिकाव
च्छरीराण्निमेषमात्रेःप्रक्रम्यप्रकृतिरधिपरास्यतेजसंशरीरंकृत्वाकर्मणोनुरूपंफलमनुभूय
तस्यसंक्षयेपुनरिमंलोकंप्रतिपद्यते॥७॥अथयेहिंसामाश्रित्यविद्यामुत्सृज्यमहत्तपस्तेपिरेचि
रेणवेदोक्तानिवाकर्माणिकुर्वंतितेधूममभिसंभवंतिधूमाद्रात्रिंरात्रेरपक्षीयमाणपक्षमपक्षी

नि.उ.४

यमर्माणपक्षाद्दक्षिणायनं [illegible] दक्षिणायनात्पितृलोकं पितृलोकाच्चंद्रमसं चंद्रमसो वायुं वायोर्वृष्टिं वृष्टेरोषधयश्चैतद्भूत्वा तस्य संक्षये पुनरेवेमं लोकं प्रतिपद्यते ॥८॥ अथ ये हिंसामुत्सृज्य विद्यामाश्रित्य महत्तपस्तेपि[रे] ज्ञानोक्तानि वा कर्माणि कुर्वंति ते र्चिरभिसंभवंत्यर्चिषो हरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षादुदगयनमुदगयनाद्देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं वैद्युतान्मानसं मानसः पुरुषो भूत्वा ब्रह्मलोकमभिसंभवंति ते न पुनरावर्त्तंते शिष्टा दंदशूका यत इदं न जानंति तस्मादिदं वेदितव्यमथाप्याह ॥९॥ न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव ॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति ॥ न तं विदथ या विद्वांसो यमेवं विद्वांसो वदंत्यक्षरं ब्रह्मणस्पतिमन्यद्युष्माकमंतरमन्यदेषामंतरं बभूवेति नीहारेण प्रावृतास्तमसा जल्प्या चासुतृप उक्थशासः प्राणं सूर्यं यत्पथगामिनश्चरंत्य[illegible] विद्वांसः क्षेत्रज्ञम

५८

५८

नुप्रवदंत्यथाहो विद्वांसः क्षेत्रज्ञोऽनुकल्पते तस्य तपसा सहाप्रमादमेत्यथा प्रव्योभवतीति नासंततमिछेन्नेन सख्यमिछेद्दिषहि सखा श्रेष्ठः संजानातीति भूतं भवद्भविष्यदिति ज्ञाता कस्माज्ज्ञायते सखा कस्मात्सख्यते सह भूतेंद्रियैः शेरते महाभूतानि सेंद्रियाणि प्रज्ञया कर्म कारयतीति तस्य यदापः प्रतिष्ठा स्त्रीलिंगमुपत्राम आत्मा ब्रह्मेति स ब्रह्मभूतो भवति साक्षिमात्रो व्यवतिष्ठते बंधो ज्ञानकृतोऽथात्मनो महतः प्रथमं भूतनामधेयान्यनुक्रमिष्यामः ॥१०॥ हंसः । घर्मः । यज्ञः । वेनः । मेधः । कृमिः । भूमिः । विभुः । प्रभुः । शंभुः । शंभुः । बधकर्मा । सोमः । भूतं । भुवनं । भविष्यत् । आपः । महत् । व्योम । यशः । महः । स्वर्णरीकं । स्मृतीकं । स्वृतीकं । सतीकं । सतीनं । गहनं । गभीरं । गह्वरं । कं । अन्नं । हविः । सद्म । सदनं । ऋतं । योनिः । ऋतस्य योनिः । सत्यं । नीरं । हविः । रयिः । सत् । पूर्णं । सर्वं । अक्षितं । बर्हिः । नाम । सर्पिः । अपः । पवित्रं । अमृतं । इंदुः । हेम । स्वः । सर्गाः । शंबरं । अंबरं ।

नि·उ·४

५९

वियत्। व्योम। बर्हिः। धन्व। अंतरिक्षं। आकाशं। आपः। पृथिवी। भूः। स्वयंभूः। अध्वा। पुष्करं। सगरः।
समुद्रः। तपः। तेजः। सिंधुः। अर्णवः। नाभिः। ऊधः। वृक्षः। उर्ध्वं। तत्। यत्। किं। ब्रह्म। वरेण्यं। हंसः। आत्मा।
भवति। वृधं सदूनं। यद्धाक्षिष्या। शरीराणि। अव्ययं च संकुरुते। यज्ञः। आत्मा। भवति। यदेनं तन्व
तेऽथैतं महांतमात्मानमेतानि सहस्राण्येता ऋचोनुप्रवदंति॥११॥ सोमः पवते जनिता मतीनां जनि
ता दिवो जनिता पृथिव्याः॥ जनिताग्नेर्जनिता सूर्यस्य जनितेंद्रस्य जनितोत विष्णोः॥ सोमः पवते
सोमः सूर्यः प्रसवनाज्जनिता मतीनां प्रकाशकर्मणामादित्यरश्मीनां दिवो द्योतनकर्मणामा
दित्यरश्मीनां पृथिव्याः प्रथनकर्मणामादित्यरश्मीनामग्नेर्गतिकर्मणामादित्यरश्मीनां सूर्य
स्य स्वीकरणकर्मणामादित्यरश्मीनामिंद्रस्यैश्वर्यकर्मणामादित्यरश्मीनां विष्णोर्व्याप्तिकर्म
णामादित्यरश्मीनामित्यधिदैवतमथाध्यात्मं सोम आत्माप्येतस्मादेवेंद्रियाणां जनितेत्यर्थः॥

५९

अपि वा सर्वाभिर्विभूतिभिर्विभूततम आत्मेत्यात्मगतिमाचष्टे॥१२॥ ब्रह्मा देवानां पदवीः कवीनामृषि
र्विप्राणां महिषो मृगाणां। श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्॥ ब्रह्मा देवानामि
त्येष हि ब्रह्मा भवति देवानां देवनकर्मणामादित्यरश्मीनां पदवीः कवीनामित्येष हि पदं वेत्ति क
वीनां कवीयमानानामादित्यरश्मीनामृषिर्विप्राणामित्येष हि ऋषिणो भवति विप्राणां व्यापनक
र्मणामादित्यरश्मीनां महिषो मृगाणामित्येष हि महान्भवति मृगाणां मार्गणकर्मणामादित्यर
श्मीनां श्येनो गृध्राणामिति श्येन आदित्यो भवति श्यायतेर्गतिकर्मणो गृध्र आदित्यो भवति गृध्य
तेः स्थानकर्मणो यत एतस्मिंस्तिष्ठति स्वधितिर्वनानामित्येष हि स्वयं कर्मण्यादित्यो धत्ते वनानां व
ननकर्मणामादित्यरश्मीनां सोमः पवित्रमत्येति रेभन्नित्येष हि पवित्रं रश्मीनामत्येति स्तूयमा
न एष एवैतत्सर्वमक्षरमित्यधिदैवतमथाध्यात्मं ब्रह्मा देवानामित्ययमपि ब्रह्मा भवति देवानां देव

न कर्मणामिंद्रियाणां पदवीः कवीनामित्ययमपि पदं वेत्ति कवीनां कवीयमानानामिंद्रियाणामृषिर्वि
प्राणामित्ययमपि ऋषिणो भवति विप्राणां व्यापनकर्मणामिंद्रियाणां महिषो मृगाणामित्ययमपि
महान्भवति मृगाणां मार्गणकर्मणामिंद्रियाणां श्येनो गृध्राणामिति श्येन आत्मा भवति श्या
यतेर्ज्ञानकर्मणो गृध्राणामिंद्रियाणां गृध्यतेर्ज्ञानकर्मणो यत एतस्मिंस्तिष्ठति स्वधितिर्वनानामित्य
यमपि स्वयं कर्मण्यात्मनि धत्ते वनानां वननकर्मणामिंद्रियाणां सोमः पवित्रमत्येति रेभन्नि
त्ययमपि पवित्रमिंद्रियाण्यत्येति स्तूयमानोऽयमेवैतत्सर्वमनुभवत्यात्मगतिमाचष्टे ॥१३॥ तिस्रो
वाच ईरयति प्र वह्निः ऋतस्य धीतिं ब्रह्मणो मनीषां ॥ गावो यंति गोपतिं पृच्छमानाः सोमं यंति मत
यो वावशानाः ॥ वह्निरादित्यो भवति स तिस्रो वाचः प्रेरयत्यृचो यजूंषि सामान्यृतस्यादित्यस्य
कर्माणि ब्रह्मणो मतान्येष एवैतत्सर्वमक्षरमित्यधिदैवतमथाध्यात्मं वह्निरात्मा भवति स तिस्रो

वाच ईरयति प्रेरयति विद्यामतिं बुद्धिमतामृतस्यात्मनः कर्माणि ब्रह्मणो मतान्ययमेवैतत्सर्वमनु
भवत्यात्मगतिमाचष्टे ॥१४॥ सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ॥ सोमः
सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवंते ॥ एतमेव सोमं गावो धेनवो वाश्यमाना वा व
श्यमानाः कामयमाना आदित्यं यंत्येवमेव सोमं विप्रा रश्मयो मतिभिः पृच्छमानाः कामयमा
ना आदित्यं यंत्येवमेव सोमः सुतः पूयते अज्यमान एतमेवार्काश्च त्रिष्टुभश्च संनवंते तत एत
स्मिन्नादित्य एकं भवंतीत्यधिदैवतमथाध्यात्ममेतमेव सोमं गावो धेनव इंद्रियाणि वावश्यमा
नानि कामयमानान्यात्मानं यंत्येवमेव सोमं विप्रा इंद्रियाणि मतिभिः पृच्छमानानि कामयमा
नान्यात्मानं यंत्येवमेव सोमः सुतः पूयते अज्यमान इममेवात्मा च सप्त ऋषयश्च संनवंते
तान्येतस्मिन्नात्मन्येकं भवंतीत्यात्मगतिमाचष्टे ॥१५॥ अक्रान्त्समुद्रः प्रथमे विधर्मञ्जन

नि॰उ॰१४

६१

यन्नूजाभुवनस्यराजा॥ इषापवित्रेअधिसानोअव्येबृहत्सोमोवावृधेस्वानइंदुः॥ अत्य
क्रमीत्समुद्रआदित्यः परमेव्यवनेवर्षकर्मणाजनयन्नजाभुवनस्यराजा सर्वस्यराजाइषा
पवित्रेअधिसानोअव्येबृहत्सोमोवावृधेस्वानइंदुरित्यधिदैवतमथाध्यात्ममत्यक्रमीत्
समुद्रआत्मापरमेव्यवनेज्ञानकर्मणाजनयन्नजाभुवनस्यराजासर्वस्यराजाइषापवित्रेअ
धिसानोअव्येबृहत्सोमोवावृधेस्वानइंदुरित्यात्मगतिमाचष्टे॥१६॥ महत्तत्सोमोमहिष
श्चकारापांयद्गर्भोवृणीतदेवान्॥ अदधादिंद्रेपवमानओजोजनयत्सूर्येज्योतिरिंदुः॥ महत्त
त्सोमोमहिषश्चकारापांयद्गर्भोवृणीतदेवानामाधिपत्यमदधादिंद्रेपवमानओजोजनय
त्सूर्येज्योतिरिंदुरादित्यइंदुरात्मा॥१७॥ विधुंदद्राणंसमनेबहूनांयुवानंसंतंपलितोजगार॥
देवस्यपश्यकाव्यंमहित्वाद्याममारसह्यःसमान॥ विधुंविधमनशीलंदद्राणंदमनशीलंयु

६१

वानंचंद्रमसंपलितआदित्योगिरतिसद्योम्रियतेसदिवासमुदितेत्यधिदैवतमथाध्यात्मंवि
धुंविधमनशीलंदद्राणंदमनशीलंयुवानंमहांतंपलितआत्मागिरतिरात्रौम्रियतेरात्रिः
समुदितेत्यात्मगतिमाचष्टे॥१८॥ साकंजानांसप्तथमाहुरेकजंषळिद्यमाऋषयोदेवजाइति॥
तेषामिष्टानिविहितानिधामशः स्थात्रेरेजंतेविकृतानिरूपशः॥ सहजातानांषण्णामृषीणा
मादित्यःसप्तमस्तेषामिष्टानिवाकांतानिवाक्रांतानिवागतानिवामतानिवाँऽद्भिःसहसंमोदंते
यत्रैतानिसप्तऋषीणानिज्योतींषितेभ्यःपरआदित्यस्तान्येतस्मिन्नेकंभवंतीत्यधिदैवतमथा
ध्यात्मंसहजातानांषण्णामिंद्रियाणामात्मासप्तमस्तेषामिष्टानिवाकांतानिवाक्रांतानिवागता
निवामतानिवानतानिवान्नेनसहसंमोदंते तेयत्रेमानिसप्तऋषीणानींद्रियाण्येभ्यःपरआ
त्मायान्य स्मिन्नेकंभवंतीत्यात्मगतिमाचष्टे॥१९॥ स्त्रियःसतीस्ताँउमेपुंसआहुःपश्यदक्षण्वा

नतानिवा ५

नि उ॰ ४

६२

न्न विचेतदंधः॥ कविर्यः पुत्रः स ई मा चिकेत यस्ता विजानात्स पितुष्पितासत्॥ स्त्रिय एवैतिताः श
ब्दस्पर्शरूपरसगंधहारिण्यस्ता अमुं पुं शब्देन निराहारः प्राण इति पश्यन्नक्षण्वान्न विजानात्यंधः
कविर्यः पुत्रः स इमा जानाति यः स इमा जानाति स पितुष्पिता सदित्यात्मगतिमाचष्टे॥ २०॥ स
प्तार्द्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठंति प्रदिशा विधर्मणि॥ ते धीतिभिर्मनसा ते विपश्चितः परि
भुवः परिभवंति विश्वतः॥ सप्तैतानादित्यरश्मीनयमादित्यो गिरति मध्यस्थानो र्ध्वं शब्देभ्य
न्य एतस्मिंस्तिष्ठति तानि धीतिभिश्च मनसा च विपर्ययंति परिभुवः परिभवंति सर्वाणि कर्माणि
वर्षकर्मणेत्यधिदैवतमथाध्यात्मं सप्तेमानींद्रियाण्ययमात्मा गिरति मध्यस्थानो र्ध्वं शब्देभ्यो
न्यस्मिंस्तिष्ठति तानि धीतिभिश्च मनसा च विपर्ययंति परिभुवः परिभवंति सर्वाणींद्रियाणि
ज्ञानकर्मणेत्यात्मगतिमाचष्टे॥ २१॥ न विजानामि यदि वेदमस्मि निण्यः संनद्धो मनसा च

६२

रामि॥ न हि विजानान्बुद्धिमतः पुत्रः परिवेदयंतेयमादित्योयमात्मा॥ २२॥ अपाङ् प्राङेति स्वधया गृभीतो
मर्त्यो मर्त्येना सयोनिः॥ ता शश्वंता विषूचीना वियंता न्यन्यं चिक्युर्न नि चिक्युरन्यं॥ अपां चयति प्रां
चयति स्वधया गृभीतो मर्त्य आदित्यो मर्त्येन चंद्रमसा सह तौ शश्वद्गामिनौ विश्वगामिनौ बहुगामिनौ
वा पश्यत्यादित्यं चंद्रमसमित्यधिदैवतमथाध्यात्ममपां चयति प्रां चयति स्वधया गृभीतो मर्त्य आ
त्मा मर्त्येन मनसा सह तौ शश्वद्गामिनौ विश्वगामिनौ बहुगामिनौ वा पश्यत्यात्मानं न मन इत्यात्मग
तिमाचष्टे॥ २३॥ तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः॥ सद्योजज्ञानो निरिणाति शत्रू
ननु यं विश्वे मदंत्यूमाः॥ तद्भवति भूतेषु भुवनेषु ज्येष्ठमादित्यं यतो जज्ञ उग्रस्त्वेषनृम्णो दीप्तनृ
म्णः सद्योजज्ञानो निरिणाति शत्रून् निरिणातिः प्रीतिकर्मा दीप्तिकर्मा वानुमदंति यं विश्व ऊ
मा इत्यधिदैवतमथाध्यात्मं तद्भवति भूतेषु भुवनेषु ज्येष्ठमव्यक्तं तपो जायत उग्रस्त्वेषनृम्णो ज्ञा

नन्वमणोः सद्योजज्ञानो निरिणाति शत्रून्निरिणाति नाशयति कर्मादीप्ति कर्मवानुमदं तियं सर्वदुमा
इत्यात्मगतिमाचष्टे ॥२४॥ को अद्य युंक्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ॥ आसन्नि
षून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥ क आदित्यो धुरि गा युंक्ते रश्मीन्कर्मवतो भा
नुमतो दुराधर्षानसून्यस्कूनवतीषू निषुणवंतिम योभून्निस्करव भूनियइमं संभर्तवेद कथं स जी
वती सधि दैवतमथाध्यात्मं क आत्मा धुरि गा युंक्ते इंद्रियाणि कर्मवतो भानुमतो दुराधर्षानसू
न्यस्कूनवतीषू निषुणवंतिम योभून्निस्करवभू नियइमं संभर्तं वेद चिरं जीवतीत्यात्मगतिमा
चष्टे ॥२५॥ क ईषते तुज्यते को बिभाय को मंसते संतमिंद्रं को अंति ॥ कस्तोकाय क इभायोत राये
धि ब्रवत्तन्वे३ को जनाय ॥ क एव गच्छति को ददाति को बिभेति को मंसते संतमिंद्रं कस्तोकायापत्याय
महते च नो रणाय रमणीयाय दर्शनीयाय ॥२६॥ को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभि

ध्रुवेभिः ॥ कस्मै देवा आवहानाशु होम को मंसते वीतिहोत्रः सुदेवः ॥ क आदित्यं पूरयति हविषा च घृ
तेन च स्रुचा यजाता ऋतुभिर्ध्रुवेभिरिति कस्मै देवा आवहानाशु होमार्थान्को मंसते वीतिहोत्रः सुदेवः
कल्याणदेवः इत्यधिदैवतमथाध्यात्मं क आत्मानं पूरयति हविषा च घृतेन च स्रुचा यजाता ऋतुभिर्ध्रु
वेभिरिति कस्मै देवा आवहानाशु होमार्थान्को मंसते वीतिहोत्रः सुप्रज्ञः कल्याणप्रज्ञ इत्यात्मगतिमाच
ष्टे ॥२७॥ त्वमंग प्रशंसिषो देवः शविष्ठ मर्त्यं ॥ न त्वदन्यो मघवन्नस्ति मर्डितेंद्र ब्रवीमि ते वचः ॥ त्वमंग प्रशं
सीर्देवः शविष्ठ मर्त्यं न त्वदन्योस्ति मघवन्पाता वा पालयिता वा जेता वा सुखयिता वेंद्र ब्रवीमि ते वच
स्तुतियुक्तं ॥२८॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमस
द ब्जा गोजा ऋतजा अद्रिजा ऋतं ॥ हंस इति हंसाः सूर्यरश्मयः परमात्मा परं ज्योतिः पृथिवी व्याप्तेति
व्याप्तं सर्वं व्याप्तं वनन कर्मणा नभ्यासेनादित्यमंडले नेति स्पयतीति लोको स्पयतीति हंसं स्पयतीति ह

नि·उ·१४ सा: परमहंसा: परमात्मा सूर्यरश्मिभि: प्रभृतगभीरं वसतीति त्रिभिर्वसतीति वा रश्मिभिर्वसती
तिवावह्निर्वसतीति वा सवर्णरेता: पूषागर्भा रश्मिभेतिरिभंता वनकुटिलानि कुर्वंतारिभंतांत
रिक्षाचरत्यथांतरिक्षाचरदिति दिविभु विगमनं वा सभानु: सप्रभूतो होता दित्यस्य गताभ
वंत्यतिथिर्दुरोणसत्सर्वेदुरोणसद्भवं सर्वेरसाविकर्षयतिरश्मिर्विकर्षयति वह्निर्विकर्षय
तिवननं भव स्वप्रगोजा अद्रिगोजांधारित्रिगोजा: सर्वेगोजा ऋतजा बद्धत्रा प्राभवंति निगमो
निगमव्यतिभवत्यथेनिर्वचनाय॥२९॥ द्वासुपर्णासयुजासखायासमानं वृक्षंपरिषस्वजा
ते॥ तयोरन्य: पिप्पलं स्वाद्वत्यनश्नंनन्यो अभिचाकशीति॥ द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मक
र्तारौ दुष्कृतं पापं परिसारकमित्याचक्षते सुपर्णा सयुजा सखायेत्यात्मानं दुरात्मानं परमात्मा
नं प्रत्युत्तिष्ठति शरीर एव तज्जायते वृक्षं रक्षशरीरं वृक्षं पक्षो प्रतिष्ठापयति तयोरन्यद्भुक्तो

६४

६४

न्नमनश्नंनन्यं सरूपतां सलोकतामश्नुते य एवं वेदानश्नन्नन्यो अभिचाकशीतीत्यात्मग
तिमाचष्टे॥३०॥ आयाहीन्द्र पथिभिरीळितेभिर्यज्ञमिमन्नो भागधेयं जुषस्व॥ तृप्तां जहुर्मा
तुलस्येव योषा भागस्ते पैतृष्वसेयीव पामिव॥ आगमिष्यति शक्रो देवतास्तास्त्रिभिस्तीर्थैरभि:
शक्र प्रतरैरीळितेभिस्त्रिभिस्तीर्थैर्यज्ञमिमं नो यज्ञभागमग्नीषोमभागाविंद्रो जुषस्वतत्तामिवं
मातुलयोगकन्याभागं सर्वकेवसाया देवतास्तास्वस्थाने शक्रं निदर्शनं॥३१॥ विप्रं विप्रासो वसे
दे वं मर्त्तासऊतये॥ अग्निं गीर्भिर्हवामहे॥ विप्रं विप्रासो वसे विद्वेर्वेदविंदते वेदितव्यं विमलशरी
रेण वा मुनाविप्र सूत्र स्यप्रनिलय स्थितमकारसंहितमुकारं पूरयेन्मकारनिलयं गतं विप्रं
प्राणेषु विंदुसितं विकेसितं वह्नितेज: प्रभं कनकपद्मे षमृतशरीरे मम्रतजातस्थितममृतवा
चाम्रतमुखे वदंति॥ अग्निं गीर्भिर्हवामहे॥ अग्निं संबोधयेदग्नि: सर्वा देवता इति तस्योत्तराभ्

नि·उ·

६५

यसेनिर्वचनाय॥ २२॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः॥ सनः पर्षदति दुर्गाणि
विश्वा नावेव सिंधुं दुरितात्यग्निः॥ जातवेदस इति जातमिदं सर्वं सचराचरं स्थित्युत्पत्तिप्रलयन्याये
नाच्छायस्म नवाम सोममिति प्रसवेनाभिषवाय सोमं राजानममृतमरातीयतो यज्ञार्थमिति स्मो नि
श्चयेन निदहाति दहति भस्मीकरोति सो मोददद् इत्यर्थः॥ सनः पर्षदति दुर्गाणि दुर्गमनानि स्थानानि
नावेव सिंधुं यथा कश्चित् कर्णधारो नावेव सिंधोः स्यंदनान्नदीं जलदुर्गां महाकूलां तारयति दुरितात्यग्नि
रिति दुरितानि तारयतीति स्येषापराभवति॥ २३॥ इदंते न्याभिरसमानमद्भिर्याः काश्च सिंधुं प्रवहंति
नद्यः॥ सर्पो जीर्णामिव त्वचं जहाति पापं सशिरस्कोभ्युपेत्य॥ इदंते न्याभिरसमानाभिर्याः काश्च सिंधुं
पतिं कृत्वा नद्यो वहंति सर्पो जीर्णामिव सर्पस्त्वचं त्यजति पापं त्यजं त्याप आप्नोते स्नासामे षा भवति॥
॥२४॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ त्र्यंब

६५

कोरुद्रस्तं त्र्यंबकं यजामहे सुगंधिं सुगंधिं सुष्ठुगंधिं पुष्टिवर्द्धनं पुष्टिकारकमिवोर्वारुकमिव फलं बं
धनादारोधनान्मृत्योः सकाशान्मुंचस्व मां कस्मादित्येषापि तरेषापराभवति॥ २५॥ शतं जीव शरदो
वर्द्धमानः शतं हेमंतान्छतमु वसंतान्॥ शतमिंद्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः॥
शतं जीव शरदो वर्द्धमान इत्यपि निगमो भवति शतमिति शतं दीर्घमायुर्मरुत एनावर्द्धयंति शतमेनमे
व शतात्मानं भवति शतमनंतं भवति शतमैश्वर्यं भवति शतमिति शतं दीर्घमायुः॥ २६॥ मा ते राधांसि
मा त ऊतयो वसोस्मान्कदाचना दभन्॥ विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ॥ मा च ते
धामानि मा च ते कदाचन नः सरिषुः सर्वाणि प्रज्ञानान्युपमानाय मनुष्यहितो यमादित्यो यमात्मा थैतद
नुप्रवदंत्यथैतं महांतमात्मानमेषर्गणः प्रवदति वैश्वकर्मणो देवानां नु वयं जाना नासदासीन्नो सदा
सीत्तदानीमिति च सैषात्मजिज्ञासा सैषा सर्वभूतजिज्ञासा ब्रह्मणः सार्ष्टितां सरूपतां सलोकतां गम

नि॰उ॰

पतिय एवं वेद नमो ब्रह्मणे नमो महते भूताय नमः पारस्कराय नमो यास्काय ब्रह्मशुक्लमसीय ब्रह्म
शुक्लमसीय ॥३७॥ ॥व्याख्यातमग्निरस्मि जन्मना परंयंगोपामा कान्नागुणस्तं परिवर्त्तमानं सयद्ध
नुरूध्यते श्रोत्तरमथयेहि स्वामाश्रित्याथयेहि सामुत्स्त्यजनतं हं सोघर्मः सोमः पवते ब्रह्मादेवानां तिस्रो
वा चईरयति सो मंगा वोक्रान्महत्तत्सोमो विधुंद द्राणं साकं जानां स्त्रियः सतीः सप्ता दुर्गर्भानविज्ञा
नाम्यपाङ् प्राङे॰ तितदिदासको अघयुं क्ते कईषते को अग्निमीडे त्वमंगहं सः श्रुचिषद्वा सुपर्णा या
ही द्रुविप्रा विप्रासो जातवेदस इदं तेन्याभिस्त्यं नकं ग्रातं जीवमातेराधांसीति सप्तत्रिंशात्॥ ॥ ॥
॥ ॥इति निरुक्ते चतुर्दशोध्यायः॥ ॥ ॥इति निरुक्ते पूर्वोत्तरषट्कं समाप्तः॥ ॥संवत् १८
४३ पिंगळनामसंवत्सरे पौषकृष्णैकादश्यां गुरुवासरे तद्दिने भट्टकं बकरोपनामक चिंतामणिदीक्षि
तेन कान्यां विश्वेश्वरसंनिधौ लिखितं॥ ॥ ॥श्रीसीतारामचंद्रार्पणमस्तु॥ ॥श्रीरस्तु॥ ॥

६६

६६

नि॰उ॰

॥ ॥अथेमा यच्छावो यदुदं चो विहिसो तोः स्तण्येवतरत्सश्चत्वारि शृंगा सूर्यतश्चत्वारि वाग चो अक्षर
आदित्य इत्यक्षरं न क्षरति ह दातुष्टेषु व्याख्यातमग्निरस्मि जन्मना॰ मातेराधांसीति पंचाशत्॥ ॥
॥ ॥भट्टकं बकरोपनामक पांडुरंगदीक्षितस्येदं पुस्तकं॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥ ॥ ॥

६७

६७

नि॰ उ॰

६७

॥इतिनिरुक्तेउत्तरषट्कःसमाप्तः॥

६७

[OrderDescription]
,CREATED=19.08.19 11:31
,TRANSFERRED=2019/08/19 at 12:06:15
,PAGES=126
,TYPE=STD
,NAME=S0001494
,Book Name=M-717-NIRUVAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF

FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,